कर्मणां तापनं **तपः** । तदनशनादिरूपं बाह्यं, प्रायश्चित्तादिरूपं चाऽऽभ्यन्तरमिति द्विविधम् । तत्र अनशनमूनोदरता वृत्तिसङ्क्षेपो रसत्यागस्तनुक्लेशो लीनता च **बाह्यं** तपः । प्रायश्चित्तं वैयावृत्त्यं स्वाध्यायो विनयः कायोत्सर्गः शुभध्यानं चाऽऽ**भ्यन्तरं** तपः ।

रत्नत्रयधरेष्वेव भक्तिः शुभैकचिन्ता संसारजुगुप्सा च **भावना** कथ्यते । तदयं निःसीमफलदायकश्चतुर्विधो धर्मः संसारभीरुभिः सावधानं सेवनीयः इति ।

**धन** ऊचे-"चिरादयं धर्मः श्रुतवानस्मि, एतावन्ति दिनानि स्वकर्मभिर्वञ्चित एवाऽस्मि"। ततो गुरुचरणकमलयुगलं मुनींश्चाऽपि वन्दित्वा निजावासं ययौ । तया देशनयाऽऽनन्दितश्च क्षणमात्रवद् रात्रिं क्षपयामास ।

अथ सुप्तोत्थितस्य तस्य मङ्गलपाठकः शङ्खध्वनिमनोहरः पपाठ-"गाढान्धकारा कमलशोभापहारिणी रात्रिः प्रावृडिव व्यतीता। अधुनाऽयं प्रातःकालः शरदृतुरिव नृणां व्यवसायेषु प्रवर्त्तकः सूर्यकिरणप्रकाशितो जृम्भते । तत्त्वबोधेन मुनीनां मनांसीव शरदा नदीनां तडागानां च जलानि निर्मलतां प्रापुः । सूर्यकिरणैः शुष्कपङ्काः पन्थानो भृशं सुगमा जाताः । नद्यस्तटयोर्मध्ये वहन्ति । मार्गाः



पक्वश्यामाकादिभिः पान्थानामातिथ्यमिव कुर्वन्ति । असौ शरत् पवनान्दोल्यमानेक्षुवणशब्दैः पान्थानां प्रयाणोचितं कालं शंसतीव । गर्जन्तः पृथिवीं प्लावयन्तश्च मार्गेषु जलप्रवाहा वर्षर्त्तोर्जलधरा इव नेशुः । शरदृतोर्वारिदाः सूर्यकिरणतप्तानां पान्थानामातपत्रीभवन्ति । सार्थवृषभाः सुखयात्राकृतेऽवनेर्वैषम्यं दूरीकर्त्तुमिव शृङ्गैः स्थली-र्भिन्दन्ति । इह शरदि पदे पदे फलनम्राभिर्लताभिः स्वच्छैस्तोयैश्च मार्गाः पान्थानां कृतेऽयत्नपाथेया जाताः । राजहंसा इवोत्साहवन्तो व्यवसायिनो देशान्तराणि गन्तुं त्वरन्ते"।

तच्छ्रुत्वा **धनो**ऽपि 'प्रयाणसमयं निवेदयती'ति विज्ञाय प्रस्थानवाद्यमवादयत् । ततो वाद्यशब्दात् सार्थोऽपि गोपशृङ्गनादाद् गोवृन्दमिव चचाल । मरीचिभिः सूर्य इव भव्यकमलप्रबोधनिपुणैः साधुभिः परिवारितः सूरिरप्यचलत् । **धनः** स्वयं सार्थस्य रक्षार्थं सर्वत आरक्षकान् नियुज्य प्रतस्थे । ततः सार्थे महाटवीं लङ्घिते सति सूरयः सार्थेशं **धन**मनुज्ञाप्याऽन्यतो विजह्रुः । ततो **धनो**ऽपि पथि निर्विघ्नं चलन् नदीप्रवाहः पाथोधिमिव **वसन्त**पुरं प्राप्तवान् । तत्र च **धनो** धीमतामाशुकारित्वादल्पेनैव कालेन भाण्डानि विक्रीय प्रतिभाण्डानि चाऽऽदाय **क्षितिप्रतिष्ठं** नगरं पुनरप्यागतः । कियता च कालेन पूर्णायुः सन् कालधर्मं प्राप्तवान् स एकान्तसुषमेषू**त्तरकुरु**षु **सीता**नद्या उत्तरतटे जम्बूवृक्षस्य पूर्वतो मुनिदानप्रभावतो युगलिक-रूपेणोत्पेदे ।

❀ ❀ ❀

तत्रो**त्तरकुरु**षु मर्त्याश्चतुर्थे दिवसे भोज्येच्छवः, षट्पञ्चा-शशतद्वयसङ्ख्यकरण्डका, युग्मरूपास्त्रिगव्यूतोच्छ्रयाः, पल्यत्रयायुषश्च-रमावस्थाप्रसवाः, स्वल्पकषाया, ममत्वरहिता, एकोनपञ्चाशद्दिवसम-

पत्ययुगमं पालयित्वा म्रियन्ते, सुरेषूत्पद्यन्ते च । तत्र शर्करामधुर-सिकतावत्यश्चन्द्रिकावद् निर्मलजला भूम्यः स्वभावतो रम्याः । तथा तत्र **मद्याङ्गा** मद्यं, **भृङ्गा** भाजनं, **तूर्याङ्गा** वाद्यानि, **दीपशिखा ज्योतिष्का**श्चाऽद्भुतं प्रकाशं, **चित्राङ्गा** माल्यं, **चित्ररसा** भोज्यं, **मण्यङ्गा** भूषणानि, **गेहाकारा** गृहाणि, **अनग्ना** दिव्यवस्त्राणीत्येवं दशविधाः **कल्पवृक्षा** नियतानर्थान् मनुष्येभ्यः प्रयच्छन्ति । अन्येऽपि तत्र सर्वेप्सितप्रदाः कल्पवृक्षाः सन्ति । तत्र युगलिको **धन**जीवो दिवीव कल्पवृक्षसम्पादितसकलार्थो वैषयिकं सुखमन्वभूत् । ततो **धन**जीवो मिथुनायुः पूरयित्वा प्राग्जन्मदानप्रभावतः **सौधर्मे** त्रिदशोऽभवत् ।

ततश्च्युत्वा **धन**जीवो**ऽपरविदेहेषु गन्धिलावत्यां** विजये **वैताढ्य**पर्वते **गन्धारा**ख्यदेशे **गन्धसमृद्धके** नगरे विद्याधरेन्द्रस्य **शतबला**ख्यस्य राज्ञो भार्यायां **चन्द्रकान्ता**ख्यायां पुत्रत्वेन **महाबल**-नामोत्पन्नः । लाल्यमानः पाल्यमानश्च स क्रमाद् वृद्धिं प्राप्तवान् । शनैः शनैः कलानिधिरिवाऽशेषकलापूर्णश्च जातः । पितुरादेशाच्च **विनयवतीं** कन्यामुपयेमे ।

अथ सर्वाङ्गसुन्दरो **धन**जीवो यौवनं प्राप्तवान् । तत एकदा तत्त्वज्ञः **शतबल**श्चिन्तयामास-"स्वभावेनाऽपवित्रमिदं शरीरं संस्कारै-र्नवं नवं विधाय कियत्कालं रक्षणीयम् ? खलोपमः खल्वयं कायो यदैव न सत्क्रियते, तदैव विक्रियां याति । अहो ! प्राणिनः कायान्तःस्थितैर्बहिर्निःसृतैर्विष्ठा-मूत्र-कफादिभिः किं न ह्रणीयन्ते ? अस्मिन् देहेऽत्यन्तातङ्कदायिनो रोगाः समुद्भवन्ति । स्वभावतश्चञ्चलः शारदमेघवदयं कायः । तत्रेयं यौवनश्रीर्विद्युदिव दृष्टनष्टा । आयुः पताकावच्चलं, श्रियस्तरङ्गवत् तरलाः, भोगाः सर्पफणतुल्याः, सङ्गमाः स्वप्नसदृशाः । काम-क्रोधादिभिस्तापैर्दिवानिशं ताप्यमानः शरीरस्थ



आत्मा पुटपाकवत् पच्यते । अहो ! अशुचौ कीट इवाऽतिदुःखेषु विषयेषु सुखमानी जनो मनागपि न विरज्यति । अन्धः पादाग्रस्थितं कूपमिव मृत्युं न पश्यति । विषतुल्यैर्विषयैर्मूर्च्छित आत्मा स्वहिताय न चेतति । धर्मा-ऽर्थ-काम-मोक्षाणां पुरुषार्थत्वे तुल्येऽपि पापयोरर्थ-कामयोरेवाऽऽत्मा प्रवर्त्तते, न पुनर्धर्म-मोक्षयोः । अस्मिन्नपारे संसारसागरे प्राणिनां महारत्नमिव मानुष्यमतिदुर्लभमस्ति । तत्राऽपि भगवानर्हन् देवताः सुसाधवो गुरवश्च पुण्यादेव प्राप्यन्ते । ततो यद्यस्य मानुष्यकस्य फलं नाऽऽददामि, तदधुना वञ्चितोऽस्मि । तस्मादद्य यूनि कुमारेऽस्मिन् **महाबले** राज्यभारं समारोप्य स्वसमीहितं करोमि" ।

ततः **शतबलः** सिंहासने **महाबल**मुपवेश्याऽभिषिच्य स्वहस्तेन तिलकमङ्गलं चक्रे । तदा मङ्गल्यदुन्दुभिर्दध्वान । **महाबलं** च द्वितीय**शतबल**मिव सामन्ता मन्त्रिणश्च प्रणेमुः । ततः **शतबलः** सूरिपादपार्श्वे प्रव्रज्यामाददे । रत्नत्रयधारकः, समचित्तो, जितेन्द्रियो, निष्कषाय, आत्मरामो, मौनव्रती, परीषहान् सहमानो, मैत्र्यादि-भावनायुक्तः, शुचिध्यानवान्, तपस्वी च सो निजायुः पूरयित्वा स्वर्गमाससाद । **महाबलो**ऽपि बलिभिः खेचरैश्चः परिवारित आखण्डल इव पृथ्वीं पालयन्ननुपमं विषयसुखमन्वभूत् ।

❀ ❀ ❀

अथ स एकदा निजसभामधितस्थौ । तं सर्वे सभासदो नत्वा यथास्थानमुपाविशन् । तत्र **स्वयंबुद्ध-सम्भिन्नमति-शतमति-महामति**नामानो मन्त्रिणश्चोपाविशन् । तत्र सम्यग्दृष्टिः **स्वयंबुद्ध**-श्चिन्तयामास-"अस्माकं पश्यतामेव स्वामी विषयासक्तो दुर्वाजि-भिरिवेन्द्रियैर्ह्रियते, उपेक्षकानस्मान् धिक् । ततोऽस्माभिर्विज्ञपय्य स्वामी हिते पथि नेतव्यः । नृपाः सारणीवद् यत्र नीयन्ते तत्र यान्ति । स्वामिनो व्यसनेनैव लब्धजीविका अनुजीविनो यद्यप्यपवदिष्यन्ते तथाऽपि वक्तव्यं, मृगभयेन यवा नोप्यन्ते किम् ?"

एवं विमृश्य सुधीः **स्वयम्बुद्धो** रचिताञ्जली राजानं विज्ञपयामास-"आसंसारं सरितांपतिः सरिज्जलैर्वडवानलः सागर-जलैरन्तको जन्तुभिर्हुताशन इन्धनैरात्मा विषयसुखैः कदाचन तृप्यति किम् ? कूलच्छाया दुर्जना विषं विषया दन्दशूकाश्च सेव्यमाना विपत्तय एव भवन्ति । तत्कालसुखोऽन्तविरसः कामः सेव्यमानः कण्डूय्यमाना पामेव निकामं प्रवर्धते । कामिजनो मत्त इव सदाचारपथभ्रष्टः सन् भवगर्ते पतति । मूषको गृहमिव कामोऽर्थं धर्मं मोक्षं च खनति। स्त्रियश्च विषलता इव दर्शन-स्पर्शनोपभोगैर्व्यामोहकारिका एव । किं च कामव्याधपाशरूपाः कामिन्यो हरिणानामिव नृणामनर्थाय जायन्ते । ये च नर्मसुहृदस्तेऽशन-पानैकमित्राण्येव, यतस्ते स्वामिनः परलोकहितं न चिन्तयन्ति । अमी विटाः स्त्रीकथाभिर्गीत-नृत्तैर्नर्मोक्त्या च स्वस्वामिनं मोहयन्तीत्याश्चर्यम्। नीचाः स्वार्थैकतत्परा एव भवन्ति । कुसंसर्गात् कुलीनानामभ्युदयः कुतो भवेत् ? बदरीतरुसन्निधौ कदली कियद् वर्धेत ? तस्माद् हे कुलस्वामिन् ! प्रसीद, स्वयं विज्ञोऽसि । मोहं मा गाः । व्यसनासक्तिं विहाय मनो धर्मे निधीयताम् । धर्मरहितो जनो निर्गन्धपुष्पतुल्य एव, चक्रवर्त्यप्यधर्मः सन् तत्र पुनर्जन्म लभते, यत्र सम्प्राप्तं कदन्नमपि साम्राज्यं मन्यते । महाकुलप्रसूतोऽपि धर्मोपार्जनविमुखो भवान्तरे श्वेव परोच्छिष्टान्नभोजनो भवति । धर्मवर्जिताः प्राणिनो भवे भवे बिडालादियोनिषु जायन्ते ।

किं च धर्मरहिता जना नरकेषु जायन्ते, तत्र च परमाधार्मिकसुरैर्वैरादिव कदर्थ्यन्ते । धर्माच्च बान्धवादिव शर्माणि विन्दति । धर्मेण नावेव विपदापगास्तरति । धर्मार्जनतत्परा नरा जनेषु पूज्यन्ते, लताभिः पादपा इव सम्पद्भिराश्रीयन्ते च । जलेनाऽग्निरिव धर्मेण बाधाकारका आधि-व्याध्यादय आशु शाम्यन्ति । जन्मान्तरे सर्वकल्याणदानाय धर्म एव प्रतिभूः । स्वामिन् ! किं बहुना, जन्तवो धर्मेण निश्रेण्या सौधाग्रमिव लोकाग्रं यान्ति । किं च त्वं विद्याधरेन्द्रत्वं



धर्मेणैव प्राप्तोऽसि । एतदपेक्षयाऽपि श्रेष्ठफललाभाय धर्ममेव समाश्रय"।

ततोऽमावास्यारात्रिरिव मिथ्यात्वतिमिराकरो विषोपममतिः **सम्भिन्नमति**रब्रवीत्-"**स्वयम्बुद्ध** ! साधु साधु, स्वामिनो हित-चिन्तकोऽसि, यत 'उद्गारैराहार इव गिरा भावोऽनुमीयते' । सरल-मतेः सदा प्रसन्नस्य स्वामिनः सुखहेतवे त्वादृशाः कुलामात्या एवेत्थं वदन्ति, नाऽपरे । निसर्गकठिनः क उपाध्यायस्त्वामध्यजीगपत् ? यत् स्वामिनोऽकाण्डवज्रपाततुल्यमिदमवोचः । स्वामी स्वयं भोगार्थिभिः सेवकैः सेव्यते, तैः सेवकैः स्वामी 'भोगान् मा भुङ्क्थाः' इति कथमुच्यताम् ? किं च यदैहिकान् भोगान् त्यक्त्वा परलोकाय यत्नस्तद् हस्तस्थं लेह्यं त्यक्त्वा कूर्परालेहनमेव ।

परलोकफलो धर्म इति कथनमप्ययुक्तम् । यतो नाऽस्ति परलोकः, नाऽपि परलोकवासिनः केऽपि सन्ति । यतो गुड-पिष्टोदकादिभ्यो मदशक्तिरिव पृथिव्यप्-तेजो-वायुभ्यश्चेतना स्वयं समुद्भवति । अतो देहादन्यो न कोऽपि देही वर्त्तते, यः शरीरं त्यक्त्वा परलोकं गमिष्यति । ततो वैषयिकं सुखं निःशङ्कमुपभोक्तव्यम् । स्वात्मा न वञ्चनीयः । यतः स्वार्थभ्रंशो मूर्खतैव । सुखेषु विघ्नकारक एव धर्माधर्मविचारः। यतः खरविषाणवद् धर्मोऽधर्मो वाऽसन्नेव । पाषाणः कं धर्ममधर्मं वाऽकरोत्, येनैको माल्यादिभिः पूज्यते, अपरस्योपरि च जनैरासित्वा मूत्र्यते, पुरीषादि च क्रियते ! ।

किं च यदि जन्तवः कर्मवशत उत्पद्यन्ते विपद्यन्ते च, तर्हि बुद्बुदाः केन कर्मणोत्पद्यन्ते विपद्यन्ते च ? तस्माद यावच्चेतनाऽस्ति, तावद् यथेष्टमाचरणीयम् । यतो मृतस्य पुनर्भवो नाऽस्ति। य एव म्रियते स एवोत्पद्यते' इत्यपि कथनमात्रम् । यतो न तत्र किमपि प्रमाणमस्ति । ततः स्वामी यथेष्टं विषयोपभोगं करोतु । यो निषेधति स शत्रुरेव । यावज्जीवेत् तावद् वैषयिकैः सुखैः सुखं जीवेत् । धर्माय

क्लेशं न कुर्यात् । यतो धर्माधर्मफलमेव नाऽस्ति" ।

ततः **स्वयम्बुद्धः** पुनरब्रवीत्-स्वपरशत्रुभिर्नास्तिकैरन्धैरन्धा इवाऽऽकृष्य जना अधः पात्यन्ते, धिक् । सुख-दुःखज्ञोऽयमात्मा स्वसंवेदनवेद्योऽस्त्येव । नाऽत्र कोऽपि बाधकः । यद्यात्मा नाऽस्ति, तर्हि 'सुखितोऽहं दुःखितोऽह'मिति प्रतीतिः कस्याऽपि कथं स्यात् ? यथा स्वशरीरे स्वसंवेदनसिद्ध आत्माऽस्ति, तथा परशरीरेऽपि बुद्धि-पूर्विकायाः क्रियाया उपलम्भात् स निश्चीयते । नहि कोऽपि विना बुद्धिं क्रियां करोति ? अन्यथा घटादिरपि स्वयं कार्यं कुर्यात् । बुद्धिश्चाऽऽत्मगुण इति सर्वत्र बुद्धिमत्स्वात्मा सिद्ध एव, आत्मनि सिद्धे परलोकोऽपि सिद्ध एव ।

य एव च म्रियते, स एव पुनरुत्पद्यते । एकमेव चैतन्यं पूर्वजन्मतः परजन्मनि याति । यदि हि पूर्वजन्मचैतन्यस्य परजन्मन्यनुवृत्तिर्न स्यात्, कथं तर्हि जातमात्रोऽशिक्षितश्च बालः स्तनं धयेत् ? तस्मादात्मा नित्य इति सर्वमुपपन्नम् । अचेतनेभ्यो भूतेभ्यश्च न चेतनोत्पादसम्भवः । जगति कारणानुरूपमेव कार्यं दृश्यते । यदि कारणमचेतनं तर्हि कार्यमप्यचेतनमेव स्यात् । किं च भूतेभ्यः प्रत्येकं चेतनः स्याद् युगपद् वा ?

यद्याद्यः पक्षस्तदा पञ्चभ्यो भूतेभ्यः पञ्च चेतनाः कथं न भवन्ति ? यदि द्वितीयः पक्षस्तदा 'रूप-गन्ध-रस-स्पर्शगुणा पृथिवी, रूप-स्पर्श-रसगुणा आपः, रूप-स्पर्शगुणं तेजः, स्पर्शगुणो वायु'-रित्येवमाबालप्रसिद्धैर्भिन्नस्वभावैरेभिर्भूतैरेकस्वभावश्चेतनः कथमुत्-पद्येत ? कारणगुणा हि कार्यगुणारम्भका इति कार्यकारणयोर्भिन्न-स्वभावता न युज्यते इति कारणेऽचेतने रूपादिगुणवति च सति कार्यं चेतनमरूपि चेति विरुद्धम् ।



अथ तोयादिभ्यो भिन्नस्वभावानां मौक्तिकानामुत्पत्तिर्दृश्यते, तथा भूतेभ्योऽचेतनेभ्यश्चेतनः स्यादिति चेत्, तदपि न । तोये मौक्तिकादिषु चैकं पौद्गलिकमेव रूपं, ततो न भिन्नस्वभावता तयोः। किं चाऽचेतनेभ्यः पिष्टोदक-गुडादिभ्योऽचेतनैव मदशक्तिर्जायते इति स दृष्टान्तश्चेतने नोपयुज्यते । देहात्मनोरभेद इत्यपि न युक्तम् । कथमन्यथा मृतावस्थायां देहे स्थितेऽपि चेतनस्याऽनुपलम्भो भवेत् ? यदप्युक्तम्-"एकः पाषाणः पूज्यते, अपरस्मिन् मूत्रादि क्रियते" इत्यादि, तदपि न युज्यते । यतो नाऽचेतने पाषाणे सुखदुःखादिर्युज्यते इति कुतस्तेषु धर्माधर्मचिन्ता ? तस्माद् देहाद् भिन्न आत्माऽस्ति, यः परलोकं गच्छति । तथा धर्माधर्महेतुकः परलोकोऽप्यस्त्येव । अग्नितापाद् नवनीतमिव विषयासङ्गाद् मनुष्याणां विवेको विलीयते । तस्मात् पापमित्राणि धर्मविरोधिनो नरकाकर्षणपाशरूपान् विषयांश्च दूरतस्त्यज । एकः प्रेष्योऽपरः स्वामी, एको याचकोऽपरो दाता, एको वाहनमपरोऽधिरोहक इत्यादि धर्माधर्मफलं स्पष्टमेव दृश्यते । तस्माद् दुःखकारणमधर्मोऽसद्वाक्यमिव हेयः, कल्याणैककारणं धर्मश्च सद्वाक्यमिवोपादेयः ।

ततः **शतमति**रुक्तवान्-"क्षणिकात् पदार्थज्ञानादपर आत्मा नाऽस्ति । ननु तर्हि कथमहमित्येवं स्थिरा बुद्धिर्भवति ? घटादयश्च पदार्थाः स्थिरा दृश्यन्ते ? इति चेत्, वस्तुषु स्थिरत्वबुद्धौ पूर्वापरक्षणेष्वभेदबुद्धिरूपा वासना कारणम् । पूर्वेऽपरे च क्षणा भिन्ना एव । तस्मात् तेष्वैक्यबुद्धिर्न वास्तविकी । तस्मात् क्षणिकं ज्ञानमेवा-ऽऽत्मा" ।

ततः **स्वयम्बुद्धः** प्रत्यवादीत्-"वस्तु क्षणिकं नाऽस्ति, कथमन्यथा गोभुक्तं तृणजलादि दुग्धरूपेण परिणमेत् ? किं च वस्तुमात्रं क्षणिकं स्याच्चेत्, क्षणसन्तानोऽपि क्षणिकः स्यादिति कुतः

क्षणिकक्षणसन्तानरूपे घटादौ घटादिबुद्धिर्भवेत् ? ज्ञानोत्पादात् पूर्वमेव वस्तुनाशात् । क्षणसन्तानो नित्य इति चेत् तर्हि 'सर्वं क्षणिक'मिति प्रतिज्ञा नष्टा । किं च सर्वभावानां क्षणिकत्वे न्यासीकृतस्य धनस्य तत्कालमेव नाशात् तस्य प्रतियाचनमनुपपन्नं स्यात् । क्षणिकज्ञानस्यैवाऽऽत्मत्वे चाऽनुभवितुस्तत्क्षण एव नाशात् पूर्वानुभूतार्थस्मरणमनुपपन्नं स्यात् । न ह्यन्योऽनुभवत्यन्यश्च स्मरति । तथा सति चैत्रेणाऽनुभूतस्य मैत्रेण स्मरणापत्तिः स्यात् । "स एवाऽयं देवदत्त" इति प्रत्यभिज्ञा चाऽनुपपन्ना स्यात् । देवदत्तस्य क्षणिकत्वेन पूर्वदृष्टस्य तस्येदानीमभावात् 'स एवाऽय'मिति बुद्धेरनुपपत्तेः । अपि चोत्पन्नस्य पुत्रस्य क्षणिकत्वेन जन्मानन्तरमेव नाशादिदानीन्तनपुत्रस्य च पितृभ्यामजनना"दस्याऽयं पुत्रः, पिता वे"त्यादिव्यवहारोच्छेदः स्यात् । किं च य इहाऽशुभं कर्म कुर्यात् तस्य क्षणिकत्वेन तत्क्षण एव नाशे परलोकेऽन्य एव भवेत् । एवं च कृतनाशोऽकृतागमश्च प्राप्तः । कृतस्य कर्मणः क्षणिकत्वेन नाशात् फलभोगकालेऽकृतस्य कस्यचिदन्यस्यैव कर्मणः फलभोगसम्भवात् । तस्मात् पदार्थानां क्षणिकत्वं निर्युक्तिकमेव" ।

अथ **महामति**रुवाच-"जगद् मायैव, तत्त्वतः किञ्चिदपि नाऽस्ति । यत् किञ्चिद् दृश्यमानं तत् सर्वं स्वप्न-मृगतृष्णादितुल्यम् । न हि स्वप्नो मृगतृष्णा वा तत्त्वतः किञ्चिदस्ति । तद्वज्जगद् मिथ्यैव, न तात्त्विकं किञ्चित् । एवमेव गुरु-शिष्यादिव्यवहारः स्वप्नव्यवहार-वदतात्त्विक एव । यथा शृगाल उपस्थितं मांसं विहाय तीरे मीनाय धावितः, मीनश्च तोये प्राविशत्, मांसं च गृध्रोऽहार्षीदिति शृगाल उभाभ्यां भ्रष्टः, तथैहिकसुखं त्यक्त्वा परलोकसुखाय कृतप्रयासा नरा लोक-परलोकादीनामतात्त्विकत्वेनोभयभ्रष्टा आत्मानं वञ्चयन्त एव। नरकभीरवो जनाः पाखण्डिनां मिथ्योपदेशं श्रुत्वा मोहात् परलोक-



सुखार्थं व्रतादिना देहं दण्डयन्तीति सखेदाश्चर्यम् । यथा लावकाख्यः पक्षी पृथिव्यां पतनशङ्कयैकेनैव पादेन नृत्यति, तथा जन्तुर्नरक-पातशङ्कया तपस्यति । यथा न तस्य पक्षिणः क्वाऽपि पृथिवीपात इति तदाशङ्का मिथ्या, तथा जन्तोर्न कदाऽपि नरकपात इति तदाशङ्कया व्रताद्याचरणं क्लेशमात्रफलम्" ।

तच्छ्रुत्वा **स्वयम्बुद्धः** पुनरब्रवीत्-"यदि जगत् स्वप्न-वदतात्त्विकमेव, मायैवेदृशी, तर्हि स्वप्नस्थो हस्ती कथं न वहनादि-कार्यं करोति ? किं च सर्वपदार्थानामतात्त्विकत्वे कार्यकारणभावस्या-ऽप्यतात्त्विकतया पततो वज्रादेः कथं त्वं बिभेषि ? वज्रादीनां तव मतेऽतात्त्विकत्वात् ततो हानेरसम्भवात् । किं च जगतो मायारूपत्वे 'न त्वं, नाऽहं, न किमपि वाच्यं, न वा कोऽपि वाचक' इतीह सभायामिदानीं कथमुत्तर-प्रत्युत्तरौ सम्पद्येते इति ब्रूहि । तस्मात् सर्वव्यवहारविलोपापत्त्या न जगद् माया, किन्तु तात्त्विकमेव । ततो हे देव ! वितण्डापण्डितैरेभिर्विषयलोलुपैः शुभपरिणामपराङ्मुखैर्नित्यं वञ्चयसे । अतो विवेकमाश्रित्य विषयान् दूरतस्त्यज । इहाऽमुत्र च कल्याणाय धर्ममेवाऽऽश्रय" ।

ततः प्रसन्नो नृपोऽब्रवीत्-"महाबुद्धे ! **स्वयंबुद्ध** ! साधु, साधूक्तवानसि । युद्धेऽस्त्रमिव काले धर्मोऽवश्यमुपादेयः । वयं न धर्मविद्वेषिणः, किन्तु यौवनकालो न धर्मोपार्जनोपयुक्तः, अपि तु विषयोपभोगोपयुक्तः । तस्मात् त्वयाऽयं धर्मोपदेशोऽनवसरे कृतः । वीणायां वाद्यमानायां सत्यां वेदपाठो न शोभते । धर्मस्य परलोकः फलमिति सन्दिग्धमेव । तस्मादैहिकसुखत्यागोऽनवसरेऽनुचितः" ।

ततः **स्वयम्बुद्धः** कृताञ्जलिरुवाच-"धर्मफलं निश्चितमेव, तत्र शङ्कां मा कार्षीः । किं न स्मरसि ? बाल्ये **नन्दनं** वनं गतावावां कान्तरूपं सुरमपश्याव । स च प्रसन्नस्त्वामुवाच-"नृप ! **अतिबल**-

नामाऽहं तव पितामहोऽस्मि । अहं राज्यं त्यक्त्वा दीक्षामग्रहीषम् । तत्प्रभावेण **लान्तका**धिपो जातोऽस्मि । त्वयाऽपि प्रमादिना न भवितव्य''मित्येवमुक्त्वा स सुरस्तिरोहितोऽभवत् । तस्मात् पितामह-वाक्यं स्मरन् परलोकं मन्यस्व । नहि प्रत्यक्षे प्रमाणान्तरावश्यकता भवति । ततो राजोवाच-त्वया पैतामहं वचः साधु स्मारितोऽस्मि । अहं धर्माधर्महेतुकं परलोकं मन्ये'' ।

ततोऽवसरं प्राप्य **स्वयम्बुद्धः** पुनरब्रवीत्-नृप ! पुरा तव वंशे **कुरुचन्द्रो** नृपो बभूव । तस्य भार्या **कुरुमती**, पुत्रश्च **हरिचन्द्रः** । स **कुरुचन्द्रः** शाक्तो दुराचारोऽपि पूर्वोपार्जितपुण्या फलरूपेण राज्यं चिरं बुभुजे । तस्य मरणसमये धातुविपर्ययो जातः । तेन तस्य तूलशय्या कण्टकशय्येवाऽभात् । भोज्यानि निम्बवद् विरसान्यभवन् । पुण्य-नाशात् तस्य सर्वमेव सुखकरं दुःखकरं जातम् । रौद्रध्यानपरश्च स मृतः । ततस्तत्पुत्रो **हरिचन्द्रो** नीत्या राज्यं शशास । धर्मबुद्धिः स नृपो बालमित्रं **सुबुद्धि**मेकदोवाच-''धर्मतत्त्वज्ञेभ्यः प्रत्यहं धर्मं श्रुत्वा मां कथये''रिति । **सुबुद्धि**रपि तत्परो भूत्वा तथा चकार । **हरिचन्द्रो**ऽपि रोगभीतो भेषजमिव पापभीतः सन् प्रत्यहं तत्कथितं धर्मं श्रद्दधौ ।

एकदा बहिरुद्याने **शीलन्धर**मुनेः केवलज्ञाने समुत्पन्ने तमर्चितुं देवाः समीयुः । **सुबुद्धि**ना तत् कथिते सति श्रद्धाशीलः स राजा तं मुनिमुपाजगाम नमस्कृत्य च नृपे समुपविष्टे सति **शीलन्धर**-मुनिर्धर्मदेशनां ददौ । देशनान्ते च नृपो बद्धाञ्जलिस्तं मुनिं पप्रच्छ-''मम पिता मृत्वा कां गतिं प्राप्तवान् ?'' ततो मुनिरुवाच-''तव पिता सप्तमं नरकं प्राप । तादृशानामन्यत्र स्थानं नाऽस्ति'' । तदाकर्ण्य संविग्नः स महीपतिर्मुनिं वन्दित्वोत्थाय निजावासं ययौ । सूनवे राज्यं दत्त्वा **सुबुद्धि**मकथयत्-''अहं प्रव्रजिष्यामि, त्वया मयीवा-ऽस्मिन्नपि व्यवहर्त्तव्यम्'' । स उक्तवान्-''अहमपि प्रव्रजिष्यामि, त्वत्सुताय मत्सुतो धर्मं वक्ष्यति'' । ततस्तौ राजमन्त्रिणौ कर्मभेदकं व्रतं जगृहतुः । चिरं च तत् पालयित्वा शिवं प्रापतुः ।



**स्वयम्बुद्धः** पुनरुवाच-''नृप ! युष्मद्वंशेऽपरोऽपि **दण्डको** नाम पार्थिवो बभूव । तत्पुत्रश्च **मणिमाली**ति विश्रुतो बभूव । तस्य नृपस्य पुत्रादिष्वत्यन्तं ममताऽऽसीत् । कालक्रमाद् **दण्डको** रौद्रध्यानपरः पञ्चत्वं प्राप । स्वभाण्डागारेऽजगरश्च जातः । तत्र भाण्डागारे यो यः प्रविष्टवान्, तं तं सर्वभक्षी हुताशन इव स ग्रस्तवान् । एकदा सोऽजगरो भाण्डागारे प्रविष्टं **मणिमालि**नं दृष्ट्वा प्राग्जन्मस्मरणादुपलक्ष्य च सस्नेहां प्रशान्तां स्वां मूर्तिमदर्शयत् । तेन **मणिमाली** 'अयं मम प्राग्जन्मबन्धुः कोऽपी'ति ज्ञातवान् । ततश्च ज्ञानिमुनिसकाशात् 'सोऽजगरो मम पिते'ति ज्ञात्वा तस्य पुर उपविश्य जैनं धर्मं कथयामास । तदवबुद्ध्य सोऽजगरो वैराग्यं प्रतिपद्य शुभध्यानपरो मृत्वा देवत्वं प्राप । स देवः पुत्रप्रेम्णा स्वर्गादागत्य **मणिमालि**ने दिव्यमुक्ताहारं ददौ । स हारोऽद्याऽपि त्वद्धृदि विद्यते'' ।

भवान् **हरिचन्द्र**वंशे जातोऽस्ति, अहं च **सुबुद्धे**र्वंशे जातोऽस्मि । एवं परम्परागताप्तभावतो भवन्तं धर्मे प्रवर्त्तयामि । अद्य यदनवसर एवाऽचकथं, तत्र कारणं शृणु-''अहमद्य **नन्दने** वने चारणमुनी अद्राक्षम् । तौ च मया भवदायुषः प्रमाणं पृष्टौ, ताभ्यां 'मासत्रयमायुरस्ती'ति ज्ञात्वा भवन्तं धर्मप्रवृत्तये त्वरयामि'' ।

तच्छ्रुत्वा **महाबल** उक्तवान्-''**स्वयम्बुद्ध** ! त्वं मम बन्धुरसि, यतो मदर्थं प्रयतसे । तस्मात् किं करोमि, तदुपदिश । आयुरत्यल्पमेव वर्त्तते । अधुना मया कथं धर्म उपार्जनीयः ? अग्नौ गृहे लग्ने कूप-खननं कीदृशम्?'' **स्वयम्बुद्ध** उवाच-''नृप! मा विषीद । दृढो भव । परलोकैकमित्रं यतिधर्मं गृहाण ! एकदिवसमपि परिव्रज्यां गृहीतो जीवो मोक्षमपि प्राप्नुयात्, स्वर्गस्य का कथा ?'' तत् स्वीकृत्य **महाबलो** राज्ये सुतं स्थापयामास । दीना-ऽनाथजनेभ्यो दयादानमदत्त सः । चैत्येष्वष्टाह्निकोत्सवमकार्षीत् । तथा स्वजनपरिजनान् क्षमयित्वा

सूरिपादान्ते दीक्षामग्रहीत् । ततः सर्वसावद्ययोगविरतिपूर्वकं चतुर्विधाहारप्रत्याख्यानं च चकार । एवं समाहितः पञ्चपरमेष्ठि-नमस्कारं स्मरन् द्वाविंशतिदिनानशनं कृत्वा कालधर्मं प्राप ।

❀ ❀ ❀

अथ **महाबल**जीव **ऐशान**कल्पे **श्रीप्रभे** विमाने शयनसम्पुटे जातः पुण्यलक्षणलक्षितोऽवधिज्ञानी **ललिताङ्ग** इति यथार्थनामा सुरोऽभवत् । तत्र तदा मङ्गलगीत-वादित्राणि च जातानि । तत्राऽदृष्टपूर्वं दृष्ट्वा विस्मितं तं द्वारपालः सविनयमुवाच-''स्वामिन् ! अयमै**शान**कल्पः । अत्र त्वत्पुण्योपार्जितमिदं **श्रीप्रभं** विमानम् । एते तव सभासदः सामानिकाः सुराः । एते त्वदाज्ञाकारिण-स्त्वदादेशमपेक्षन्ते । अत्रैते पारिषद्याः, एते तव देहरक्षकाः, अमी लोकपालाः, एते सेनापतयः, इमे प्रकीर्णकसुराः, अमी आभियोग्याः, इमे किल्बिषिकाश्च तव स्वनामानुरूपं त्वत्कार्यकारिणः । एते च रम्यरमणीसहिताः प्रासादा, वाप्यो, नद्य, उद्यानानि, सभागृहं, चामरहस्ता वेश्या, गन्धर्ववर्गश्च सर्वे त्वत्सेवासमुत्सुका वर्त्तन्ते'' ।

ततो **ललिताङ्गो** दत्तोपयोगोऽवधिज्ञानतः पूर्वजन्माऽस्मरत् । तथाहि-''अहं **महाबलः स्वयम्बुद्ध**मन्त्रिणा जैनं धर्मं बोधितः प्रव्रज्यां प्रतिपन्नोऽनशनमकरवम् । तत्फलमिदं सर्व''मिति स्मृत्वा समुत्थाय सिंहासनमलङ्कृतवान्। ततो देवैरस्याऽभिषेकादीनि चक्रिरे। ततः समुत्थाय च **ललिताङ्ग**श्चैत्ये शाश्वतार्हत्प्रतिमा अस्तावीत्, पुस्तकानि च वाचयामास । माणवस्तम्भस्थितान्यर्हतामस्थीनि च पूजया-मास । तदनन्तरं स लीलागृहं जगाम । तत्र च सर्वसामुद्रिकलक्षण-लक्षितां रत्नाभरणभूषितामप्सरोभिः परिवेष्टितां **स्वयम्प्रभां** देवीं ददर्श । दूरात् कृताभ्युत्थानया तया सहैकपर्यङ्के निषसाद च । प्रियया



तया सह रममाणः स भूयांसं कालमेकां कलामिव गमयामास ।

अथ **स्वयम्प्रभा** तस्मात् स्वर्गादच्योष्ट। तेन दुःखितो **ललिताङ्गो** मुहुर्मुहुर्विललाप । क्वाऽपि च तस्य मनो न रेमे । 'हा प्रिये ! क्वाऽसी'त्येवं विलपंश्च सर्वतो बभ्राम । तत्र च **स्वयम्बुद्धो**-ऽपि **महाबल**मरणेन जातवैराग्यः **सिद्धाचार्य**सन्निधौ दीक्षां गृहीत्वा चिरं व्रतं पालयित्वा कालधर्मं प्राप्यै**शान**कल्पे जातो **दृढधर्मा**ख्यः **स्वयम्बुद्ध**जीव इन्द्रसामानिकः सः पूर्वभवसम्बन्धात् प्रेमयुक्तो **ललिताङ्ग**माश्वासयितुमुक्तवान्-''देव ! स्त्रीहेतुकं मोहं मा गाः । नैषा धीराणामवस्थे''ति । **ललिताङ्गो**ऽप्युवाच-''कान्ताविरहः सुदुःसहः, कान्तया विना सर्वसम्पदोऽसाराः प्रतिभासन्ते'' । ततः स ईशान-सामानिकः सुर उपयोगं दत्वाऽवधिज्ञानाद् ज्ञात्वाऽब्रवीत्- महाभाग ! मा विषीद । स्वस्थो भव । भवतः प्रिया मया प्राप्ताऽस्ति ।

पृथिव्यां **धातकीखण्डे प्राग्विदेहे**षु **नन्दि**ग्रामे **नागिलो** नामाऽत्यन्तदरिद्रो गृहपतिरस्ति । **नागश्री**नाम्नी च तस्य पत्नी । तस्यां चाऽस्य षट् कन्या जाताः । पुनरपि तस्यां गर्भिण्यां जातायां स **नागिलो**ऽचिन्तयत्-''इदं कस्य कर्मणः फलम् ? यदहं मर्त्यलोकेऽपि नरकपीडामनुभवामि । दारिद्र्येण पीडित एव कन्यकाभिराभिरपि नितान्तमर्दितोऽस्मि । अधुना यदि पुनरपि कन्यकैव भविष्यति, तदैतत्कुटुम्बं त्यक्त्वा देशान्तरं यास्यामि'' ।

अथ कन्यां सुषुवे तस्य भार्या । तच्छ्रुत्वा च स **नागिलो** देशान्तरं जगाम । **नागश्री**श्च प्रसवजे दुःखे सत्येव पतिप्रवासगमन-व्यथयाऽत्यन्तं पीडिता तस्याः सद्यो जातायाः सुताया नामाऽपि नाऽकार्षीत् । तेन सा लोकैः '**निर्नामिके**'ति नाम्नाऽऽहूता । साऽ-पालिताऽपि क्रमशो वृद्धिं गताऽन्यगृहे कर्म कुर्वती कालमजीगमत् । एकदा चोत्सवदिनेऽन्यबालककरेषु मोदकान् दृष्ट्वा साऽपि मातरं

याचितवती । माता क्रुद्धा सत्युवाच-"यदि मोदकमिच्छसि, तदा रज्जुमादायेन्धनभारानयनायाऽ**म्बरतिलका**ख्यं पर्वतं गच्छ" । ततः सा तेन वचसा दुःखिता रुदती रज्जुमादाय तं पर्वतं ययौ ।

तदैव तस्य पर्वतस्य शिखरे एकरात्रिकप्रतिमास्थितस्य **युगन्धर**मुनेः केवलज्ञानमुत्पन्नम् । ततः समीपस्थदेवताभिस्तस्य केवलज्ञानमहिमाख्यो महोत्सवश्चक्रे । ततस्तत्पर्वतसमीपस्थनगर-ग्रामवासिनो जनास्तं वन्दितुमुपाययुः । सा **निर्नामिका** तत्र गच्छतो जनान् दृष्ट्वा विस्मिता परम्परया लोकागमनकारणं ज्ञात्वा दारुभारं त्यक्त्वा तैर्जनैः सह तं गिरिमारुरोह । महामुनेः पादौ कल्पवृक्षवद् मन्यमाना सा सानन्दं वन्दितवती । ततो विश्वोपकारको महामुनिः स मेघगम्भीरया गिरा धर्मदेशनां चक्रे । देशनान्ते च सा कृताञ्जलि-र्मुनिमूचे-"भवता संसारो नृपे रङ्के च दुःखसदनमित्युक्तम् । किमत्र मत्तोऽप्यधिकदुःखितः कोऽपि" ।

ततो मुनिरुवाच-"दुःखितमानिनि ! भवत्याः कीदृशं दुःखम् ? अपरान् दुःखितान् श्रृणु-स्वकर्मपरिणामेन नारका भेदनच्छेदन-दारण-निपीडनादिरूपमत्युग्रं दुःखं लभन्ते । पीडां विना क्षणमपि स्थातुं न लभन्ते । इहाऽपि जल-स्थला-ऽऽकाशचारिणः प्राणिनो वध-बन्धादि विविधं दुखं स्वकर्मवशाल्लभमाना दृश्यन्ते । मनुष्या अपि जन्मान्ध-बधिर-पङ्गु-कुष्ठिनो विविधव्याधि-दास्यादिभिरत्यन्तं पराभवं सहमाना दृश्यन्ते । देवानामपि च परस्परपराभवाभिभूतानां स्वस्वामिभावप्रतिबद्धानां निरन्तरं दुःखमेव । अतिदारुणेऽस्मिन् संसारे वारिधौ जलजन्तूनामिव दुःखानामवधिर्न दृश्यते । तत्र च जिनोक्तो धर्म एव प्रतीकारः । अहिंसादीनि पञ्च महाव्रतानि देशतोऽप्यवश्यं पालनीयानि । तेन हि जन उत्तरोत्तरं कल्याणसम्पदं प्राप्नोति" ।

तच्छ्रुत्वा च सा **निर्नामिको**त्कृष्टं संवेगं प्राप । अभेद्योऽपि



तस्याः कर्मग्रन्थिरभिद्यत । ततः सा तस्य महामुनेः पुरः सम्यक्त्वं गृहीतवती । जिनोपदिष्टं गृहिधर्मं च भावतः स्वीचकार । एवमणुव्रतानि प्रतिपद्य मुनिं प्रणम्य दारुभारं गृहीत्वा च कृतकृत्येव मुदिता सा स्वगृहं जगाम । ततः प्रभृति च सा मुनिवचनं स्मरन्ती नानाविधं तपस्तेपे । तां च दुर्भगां यौवनेऽपि न कश्चित् परिणिनाय । ततोऽतिशयितसंवेगा सा पुनस्तत्र पर्वते समागतवतो **युगन्धर**मुने-रग्रेऽधुना गृहीतानशना वर्त्तते । तत्र गच्छ, तस्याः स्वरूपं दर्शय । त्वयि रक्ता सती मृता सा तव पत्नी भवेत् । यतोऽन्ते यथा मतिस्तथैव गतिर्भवति ।

अथ तच्छ्रुत्वा **ललिताङ्गो**ऽपि तथैव चक्रे । **निर्नामिका**ऽपि तस्मिन् रक्ता सती मृता पूर्ववत् **स्वयम्प्रभा**नाम्नी तत्पत्नी जाता । ततः स तां प्रियां पुनः प्राप्याऽभ्यधिकं रेमे ।

अथ कियत्यपि काले गते **ललिताङ्गः** स्वच्यवनचिह्नानि व्यलोकयत् । तस्याऽऽभरणानि वसनान्यङ्गानि च मलिनानि जातानि । तथा स दैन्यं निद्रां च प्राप । तस्य हृदयेन समं कल्पवृक्षा अपि चकम्पिरे । नीरुजोऽपि तस्य सर्वाङ्गोपाङ्गसन्धयोऽभज्यन्त । पदार्थ-ग्रहणेषु च तस्य दृष्टिरसमर्था जाता । स सज्वरगजवद् रम्येष्वपि क्रीडापर्वतादिषु रतिं न लेभे । ततः **स्वयम्प्रभा**ऽपृच्छत्-"किं मया किमप्यपराद्धं, येन विमनस्को लक्ष्यसे ?" **ललिताङ्ग** उवाच-"प्रिये ! त्वया न किमप्यपराद्धं, मया स्वयमेवाऽपराद्धं, यत् प्रागल्पं तपः कृतम् । अहं पूर्वजन्मनि भोगेषु प्रवृत्तो धर्मे प्रमादी विद्याधरे-श्वरोऽभूवम् । तत्राऽऽयुःशेषे **स्वयम्बुद्धे**न मन्त्रिणा जैनं धर्मं प्रबोधितः प्रपन्नवान् । तद्धर्मप्रभावादियत्काले **श्रीप्रभे** प्रभुः सञ्जातः । अधुना च मम च्यवनसमयः प्राप्तः"। एवं कथयन्तं **ललिताङ्ग**मिन्द्रप्रेषितो **दृढधर्म**नामा देवः समुपेत्योवाच-"**ऐशान**कल्पेन्द्रो **नन्दीश्वरा**दिषु

जिनेन्द्रप्रतिमापूजां कर्तुं यास्यति, तदाज्ञया त्वमप्येहि'' । ततः स्वभाग्यं प्रशंसन् **ललिताङ्गः** सभार्यः प्रमुदितः प्रतस्थे । **नन्दीश्वरे** गत्वा च शाश्वतीरर्हत्प्रतिमा आनर्च । ततोऽप्यन्येषु तीर्थेषु गच्छन् क्षीणायुश्चुच्युवे ।

❀ ❀ ❀

ततो **जम्बूद्वीपे पूर्वविदेहे**षु **सीता**नद्या उत्तरे तटे **पुष्कलावत्यां** विजये **लोहार्गल**पुरे **सुवर्णजङ्घ**नृपस्य **लक्ष्मी**नाम्न्यां पत्न्यां पुत्ररूपेणाऽजनि सः । पितरौ च तस्य **वज्रजङ्घ** इति नाम चक्रतुः ।

अथ **स्वयम्प्रभा**ऽपि धर्मपरायणा कियता कालेन चुच्युवे । तत्रैव **पुष्कलावत्यां** विजये **पुण्डरीकिणी**पुरे **वज्रसेन**नृपस्य **गुणवती**नाम्न्यां पत्न्यां पुत्रीरूपेणोदपद्यत । पितरौ च श्रीयुक्तायास्तस्याः **श्रीमती**ति नाम चक्रतुः । तत्र सा धात्रीभिर्लाल्यमाना क्रमशो वृद्धिं प्राप । कियता कालेन कान्तिमती सा तारुण्यं प्राप । एकदा क्रीडया **सर्वतोभद्र**प्रासादमधिरूढा सा **मनोरमो**द्याने महामुनेः **सुस्थित**स्य केवलज्ञाने समुत्पन्ने सति समागच्छतः सुरान् ददर्श । 'मयेमे क्वाऽपि दृष्टा' इत्येवं चिन्तयन्ती सा पूर्वजन्म स्मृतवती । तेन मूर्च्छिता च तत्कालं भूमौ निपपात । सखीभिः कृतेन शीतोपचारेण लब्धसंज्ञा सा समुत्थिता च चित्तेऽचिन्तयत्–''मम पूर्वजन्मपति–र्**ललिताङ्गः** सम्प्रति क्व जातोऽस्ति ? तदज्ञानमतीव पीडाकरं मम । स एव मम हृदयेश्वरो नाऽन्यः । यदि तेन नाऽऽलपामि, तदाऽन्येन सहाऽऽलप्याऽल''मिति सा मौनं गृहीतवती । सखीभिराधिदैविकादिदोषशङ्कया कृतोपचाराऽपि सा मौनं न मुमोच । प्रयोजने च सति साऽक्षराणि लिखित्वा भ्रू-हस्तादिसंज्ञया वा परिजनं नियोजयति स्म।

एकदा क्रीडोद्याने गतां तां **श्रीमती**मेकान्तेऽवसरं प्राप्य **पण्डिता**ख्या धात्री कथयामास–''त्वं मम प्राणा इवाऽसि, तव



चाऽहं मातेवाऽस्मि । आवयोरन्योन्यमविश्वासकारणं नाऽस्ति । तस्माद् मौनधारणकारणं कथय । तव दुःखं ज्ञात्वा तत्प्रतीकारायाऽहं यतिष्ये। न ह्यज्ञातस्य रोगस्य चिकित्सा कर्तुं शक्यते'' । ततो विश्वस्ता **श्रीमती** पूर्वजन्मभवं सर्वं वृत्तान्तं यथावत् कथयामास । उपायपण्डिता **पण्डिता**ऽपि सर्वं तद् वृत्तान्तं पटे विलिख्य दर्शयितुं शीघ्रं बहिर्ययौ । तदा **वज्रसेन**स्य चक्रिणो वर्षग्रन्थौ बहवो नृपाः समागताः । **पण्डिता** च राजमार्गे तमालेख्यपटं विस्तार्य तस्थौ । अत्राऽवसरे **दुर्दर्शन**नृपस्य पुत्रो **दुर्दान्त**स्तत्र समाययौ । स च पटं प्रेक्ष्याऽलीकमूर्च्छया भूमावपतत् लब्धसंज्ञ इवोत्थितश्च । मूर्च्छाकारणं पृष्टश्च जनेन स सकपटमुवाच–''मम पूर्वजन्मचरितं पटे केनाऽप्यलिख्यत । तद् दृष्ट्वा मम जातिस्मरणमुत्पेदे । अहं **ललिताङ्गो**ऽस्मि, मम देवी **स्वयम्प्रभा**, यदत्र पटे लिखितं सर्वं तत् तथैवाऽस्ति'' । ततः **पण्डित**या ''कोऽयं सन्निवेशविशेष'' इति पृष्टः स ऊचे–''एष **मेरुः**, इयं **पुण्डरीकिणी**पुरी'' । पुनः **पण्डित**या मुनेर्नाम पृष्टो विस्मृतमस्य नामेत्यब्रवीत् । पुनस्तया 'मन्त्रिपरिवृत्तः कोऽयं नृपः, तपस्विनी च केयमि'ति पृष्टोऽहं न वेद्मीत्युवाच सः । तदाऽयं मायावीति ज्ञात्वा तया स सोपहासं विसर्जितः क्वाऽप्यगात् ।

तदा **वज्रजङ्घो**ऽपि **लोहार्गल**पुरात् समायातश्चित्रलिखितं चरितं ददर्श, मुमूर्च्छ च । कृतशीतोपचारश्च लब्धसंज्ञः समुत्थितः जातिस्मरणं प्राप । 'कुतश्चित्रं दृष्ट्वा मूर्च्छितोऽसी'ति **पण्डित**या पृष्टश्चाऽब्रवीत्–''अत्र पटे सभार्यस्य मम पूर्वजन्मवृत्तान्तो लिखितोऽस्ति । तद् दृष्ट्वा मूर्च्छितो जातः । अयमै**शान**कल्पः, इदं **श्रीप्रभ**-विमानम्, एषोऽहं **ललिताङ्गः**, एषा मम प्रिया **स्वयम्प्रभा** । इयं **निर्नामिका**, अयं **युगन्धर**मुनिः । इयं पुनर्जाता **स्वयम्प्रभा** । अयं

**नन्दीश्वरे** जिनार्चापरोऽहम् । इयं चैकाकिनी दीना च्यवमाना **स्वयम्प्रभे**ति मन्ये । तयैव जातिस्मरणेनेदं सर्वं लिखितमित्यनुमिनोमि । न ह्यन्यानुभूतमन्यो जानाति" । तदा **पण्डिता** 'आम्' इत्युक्त्वा ततः **श्रीमत्याः** समीपमागत्य सर्वं वृत्तान्तमवोचत्। ततः प्रमुदिता **श्रीमती पण्डिता**मुखात् सर्वं वृत्तान्तं पित्रे कथयामास । ततः प्रमुदितो **वज्रसेनो वज्रजङ्घ**माहूय समुद्रो लक्ष्मीं विष्णुनेव तेन कुमारेण **श्रीमतीं** परिणाययामास । ततस्तौ **वज्रसेना**नुज्ञातौ **लोहागर्ल**पुरं जग्मतुः । ततः **स्वर्णजङ्घो** नृपो योग्यं **वज्रजङ्घं** राज्ये निवेश्य स्वयं दीक्षामुपाददे । **वज्रसेनो**ऽपि **पुष्कलपाल**नाम्ने स्वपुत्राय निजां राज्यलक्ष्मीं प्रदाय प्राव्राजीत्, तीर्थकरश्चाऽजनि । **वज्रजङ्घो**ऽपि कान्तया **श्रीमत्या** सह कुञ्जरः पङ्कजमिव लीलया राज्यधुरमूहे । क्रमाद् भोगान् भुञ्जानयोस्तयोः सुतः समुदपद्यत ।

अथ **पुष्कलपाले**न शासनमवमन्यमानानां द्वेषिणां सीमसामन्तानां साधनायाऽऽहूतो **वज्रजङ्घः श्रीमत्या** सहैव प्रतस्थे । स च गच्छन्नर्धमार्गे 'पुरो महाशरवणे दृग्विषो महाहिरस्ती'ति पान्थैर्विज्ञप्तोऽन्येन मार्गेण **पुण्डरीकिण्या**मागत्य सर्वसामन्तमण्डलं **पुष्कलपाला**ज्ञावशवर्त्तिनं चकार । तत्र **पुष्कलपाले**न विहितां सत्क्रियां स्वीकृत्य तदनुज्ञातः **श्रीमत्या** सह प्रतिनिवर्त्तमानः सो मार्गे शरवणे "द्वयोरनगारयोः केवलज्ञानमुत्पेदे तत्र देवागमनप्रभावाद् दृग्विषः सर्पो निर्विषोऽजनी"त्यध्वन्यैर्निवेदितस्तत्रैव निजसोदरयोस्तयोः केवलिनोः **सागरसेन-मुनिसेना**ख्ययोर्महामुन्योर्दर्शनाय तस्थौ । देववृन्दवृतौ देशनां कुर्वाणौ तौ मुनी भक्त्या सभार्योऽवन्दत सः । देशनान्ते चाऽशन-पानादिभिस्तौ मुनी प्रत्यलाभयदचिन्तयच्च-"निर्ममावेतौ सोदरौ मुनी धन्यौ, अहं त्वीदृशो नाऽस्मि, गृहीतव्रतस्य पितुरनुगामिनावेतावेवौरसौ पुत्रौ । अहं तु क्रीतपुत्र



इवाऽस्मि । अधुनाऽपि न किञ्चिद् गतं, यदि प्रव्रजामि । प्रव्रज्या हि गृहीतमात्राऽपि दीप इव तमोनाशाय जायते । तत इदानीं पुरीं गत्वा राज्यं पुत्राय दत्त्वा च हंसस्य गतिं हंस इव पितुर्गतिं श्रयिष्ये" । एवं बहुशश्चिन्तयन् स **श्रीमत्या** सह **लोहार्गल**पुरं प्राप । तदा च राज्यलुब्धोऽस्य पुत्रो धनैः प्रकृतिमभेदयत् । प्रातः स्वयं व्रतादानं सुतस्य च राज्यदानं चिन्तयित्वा निशायां प्रसुप्तयोः पित्रोः सतोः पुत्रो गृहे विषधूपं धूपयामास । तद्विषधूपधूमैर्घ्राणप्रविष्टैस्तौ दम्पती मृत्युमापतुः।

❀ ❀ ❀

अथ तावुत्त**रकुरु**षु युगलिकरूपेणोत्पन्नौ क्षेत्रानुरूपमायुः पूरयित्वा विपद्य **सौधर्मे** सुरौ जातौ । ततो **वज्रजङ्घ**जीवश्च्युत्वा **जम्बूद्वीपे विदेहे**षु **क्षितिप्रतिष्ठिते** नगरे **सुविधे**र्वैद्यस्य पुत्रो **जीवानन्दा**ख्योऽभूत् । तदैव तस्मिन्नगरे चत्वारोऽन्येऽपि बालकाः समुत्पन्नाः । तत्रे**शानचन्द्र**स्य राज्ञः **कनकवती**नामभार्यायां **महीधर**नामा, **शुनाशीर**नाम्नो मन्त्रिणो **लक्ष्मी**नामपत्न्यां **सुबुद्धि**नामा, सार्थेशस्य **सागरदत्त**स्याऽ**भयमती**नामभार्यायां **पूर्णभद्र**नामा, **धना**ख्यश्रेष्ठिनः **शीलमती**नामभार्यायां **गुणाकर**नामा च पुत्रोऽजनि । सर्वे ते लाल्यमानाः क्रमशो ववृधिरे । **श्रीमती**जीवश्चाऽपि तत्रैव नगरे **ईश्वरदत्त**स्य श्रेष्ठिनः **केशव**नामा पुत्रो जातः । पञ्चेन्द्रियमनांसीव मिलितास्ते षड् मित्राणि जज्ञिरे । तेषु **जीवानन्द** आयुर्वेदज्ञो वैद्येषु सूर्य इवाऽग्रणीर्बभूव ।

एकदा तस्य गृहे **पृथ्वीपाल**नाम्नो नृपस्य सुतो **गुणाकर**नामा राज्यं त्यक्त्वा गृहीतव्रतस्तपसा कृशोऽकालापथ्यभोजनात् कुष्ठाभिभूतः षष्ठस्य पारणे समाययौ । तदा **महीधरो जीवानन्दं** सपरिहासमुवाच-"व्याधि-भेषजयोर्ज्ञानं चिकित्साकौशलं च तवाऽस्ति । केवलं कृपा नाऽस्ति । रुग्णं गृहागतमीदृशं पात्रं चेदुपेक्षसे, धिक् ते परिश्रमम्"।

तच्छ्रुत्वा **जीवानन्दो**ऽब्रवीत्-''महामुनिरयं मया चिकित्सनीयः, किन्तु भेषजसामग्र्येव विघ्नतां याति । लक्षपाकतैलं मे समीपेऽस्ति, गोशीर्षचन्दनं रत्नकम्बलं च भवन्तः समानयन्तु'' । तथाऽस्त्वित्युक्त्वा ते पञ्चाऽपि विपणिश्रेणिं ययुः । मुनिरपि स्वस्थानमगात् ।

तत्र दीनारलक्षाभ्यां द्वे वस्तुनी क्रीणतस्तान् विक्रेता वृद्धवणिगब्रवीत्-''आभ्यां वः किं प्रयोजनम्?'' ''साधुश्चिकित्सनीय'' इत्येवं तद्वचनं श्रुत्वा सोऽचिन्तयत्-'क्वेमे युवानः, एषामेष वृद्धोचितो विवेकश्च क्व? ईदृशं हि कार्यं मादृशां योग्यम्' । ततः स जगाद-''विना मूल्यमेव द्वे अपि वस्तुनी गृह्येताम् । अनयोर्हि मूल्यमक्षयं धर्ममेवाऽहं ग्रहीष्यामि'' । ततस्तेभ्यो गोशीर्ष-कम्बलौ दत्वा भावितात्मा स श्रेष्ठी प्रवव्राज परं पदं चाऽऽप । **जीवानन्द**सहिताश्च ते सर्वेऽपि भेषजमादाय मुनिसमीपं जग्मुः । कायोत्सर्गस्थं च तं मुनिं नत्वोचुः-''तव चिकित्सां करिष्यामः, तदनुजानीहि''। ततो मुनेरनुज्ञां प्राप्य नवं गोमृतकमानीय मुनेः प्रत्यङ्गं तैलेनाऽभ्यङ्गं व्यधुः । तैलेनाऽऽकुलाः कुष्ठकृमयश्च मुनिदेहाद् निर्गत्य तत्रैव स्थिते रत्नकम्बले प्रविष्टाः । **जीवानन्द**श्च कम्बलमान्दोलयन् तान् कृमीन् गोशवोपरि पातयामास। एवं क्रमेण च मुनेस्त्वग्गता मांसगता अस्थिगताश्च कृमयो निष्कासिताः। पश्चाच्च गोशीर्षचन्दनानुलेपनैः कृत्वा मुनेस्तैलपीडां स जहार । संरोपणौषधैश्च जातनवत्वक् कान्तिमान् मुनिर्भक्तिदक्षैस्तैः क्षमितोऽन्यत्र विजहार ।

ते च षडपि तदवशिष्टभेषजं विक्रीय तन्मूल्येन स्वद्रव्येण च चैत्यं कारयामासुः । तत्र जिनान् पूजयन्तो गुरूपासनतत्पराश्च ते कञ्चित्कालं गमयित्वा जातसंवेगा दीक्षामादाय विहरन्तः परीषहान् सहमानास्तपोभिश्चारित्रमुज्ज्वलयन्तः क्षमादिभिश्चतुरोऽपि कषायान् जिग्युः । तथा द्रव्यतो भावतश्च संलेखनां कृत्वाऽनशनं स्वीकृत्य समाधिस्थाः ते पञ्चपरमेष्ठिनमस्क्रियां स्मरन्तो देहं तत्यजुः ।



अथाऽ**च्युत**कल्पे जाताश्च ते शक्रसामानिकाः षडपि द्वाविंशतिसागरोपमं क्षेत्रायुः पूरयित्वा ततश्चुच्युविरे । **जम्बूद्वीपे पूर्वविदेहे**षु **पुष्कलावती**विजये **पुण्डरीकिणी**पुर्यां **वज्रसेना**ख्यभूपते**र्धारिणी**-नामराज्ञ्यां **जीवानन्द**जीवश्चतुर्दशस्वप्नसूचितो **वज्रनाभ**नामा, **महीधर**जीवो बाहुनामा, **सुबुद्धि**जीवः **सुबाहु**नामा, **पूर्णचन्द्र**जीवः पीठनामा, **गुणाकर**जीवो **महापीठ**नामा च पञ्चपुत्रा जाताः । षष्ठः **केशव**जीवश्चाऽन्यस्य राज्ञः पुत्रः **सुयशो**नामा संजातः । तेषु **वज्रनाभ-सुयश**सोर्बाल्यादेव प्राग्भवसम्बन्धात् स्नेहो नितरां ववृधे । षडपि लाल्यमाना बाल्यमुल्लङ्घ्य सकलकलासम्पन्नास्तारुण्यं प्रतिपेदिरे ।

अथ **लोकान्तिकै**र्देवैः ''स्वामिन् ! तीर्थं प्रवर्त्तये'' ति विज्ञप्तो **वज्रसेन**नृपो **वज्रनाभं** राज्ये निवेश्य सांवत्सरिकदानं दत्त्वा देवा-ऽसुर-नृपैः कृतनिष्क्रमणोत्सव उद्यानं गत्वा दीक्षामादायोत्पन्नमनः-पर्यायज्ञानो मेदिनीं विहर्त्तुं प्रावर्त्तत । घातिकर्मक्षयाच्च तस्य केवलज्ञानमुत्पेदे । तदा च **वज्रनाभ**नृपस्याऽऽयुधशालायां चक्रं प्रविवेश । अन्यानि च त्रयोदशरत्नानि तस्याऽभवन् । नव निधयश्च तस्य सेवका जाताः । **सुयशा**श्च तस्य तरणेररुण इव सारथिरभूत् । स भ्रातृभ्यः प्रत्येकं विषयान् ददौ । तथा सोऽशेषं **पुष्पकलावती**विजयं स्वाधीनमकरोत् । सर्वैश्च नृपैस्तस्य चक्रवर्त्तित्वाभिषेकश्चक्रे । भोगान् भुञ्जानस्याऽपि च तस्य भववैराग्याधिक्याद् धर्मे बुद्धिर्नित्यमवर्धत ।

तत्रैकदा जिनेश्वरो **वज्रसेनः** समायातः । स समवसरणे चैत्यतरुतले धर्मदेशनां ददौ । सबन्धु**र्वज्रनाभो**ऽपि तत्राऽऽगत्य जिनेश्वरं त्रिःप्रदक्षिणीकृत्य प्रणम्य च पृष्ठतः समुपविश्य बोधिदां देशनां श्रुत्वा चिन्तयामास-''असावपारः संसारः सागर इव दुस्तरः ।

एष मम तातश्च दिष्ट्या ततस्तारकः समुपस्थितः । मोहाभिभूतैश्चाऽस्माभिरात्मनैवाऽऽत्मा कियच्चिरं वञ्चितः"। ततो जिनेश्वरं भक्तिपूर्वकं विज्ञपयामास-"युष्मद्दत्तं राज्यं यथाऽहमपालयं, तथा युष्मद्दत्तं शमसाम्राज्यमपि पालयिष्यामि । तव पुत्रो भूत्वाऽपि भवे भ्रमामि चेत्, को विशेषो मयि ? राज्यं शासतो मम धर्मोऽपि पापानुबन्धक एव स्यात्, तस्माद् दीक्षादानेनाऽनुगृहाण" । ततः सबन्धुः प्रव्रज्यां गृहीतवान् । तस्य **सुयशाः** सारथिरपि च प्रवव्राज । तत्र **वज्रनाभो** द्वादशाङ्गीपारीणो जातः । क्षयोपशमवैचित्र्याच्च **बाह्वा**दयोऽप्येकादशाङ्गीपारीणा जाताः । जिनेश्वरो **वज्रसेन**श्चरमशुक्लध्यानश्रितो निर्वाणं प्राप ।

अथ **वज्रनाभो**ऽपि मुनिभि**र्बाह्वा**दिभिः परिवृतः पृथिवीं विजहार । योगप्रभावेण च तेषां **खेला**दिलब्धय प्रादुरासन् । यन्महिम्ना तेषां श्लेष्मलवोऽपि कुष्ठहरः, कर्ण-नेत्रादिभवो मलश्च कस्तूरिकावत् सुगन्धिः सर्वरोगिणां रोगहरश्चाऽभूत् । तथा तेषां शरीरस्पर्शोऽपि नीरोगकारकः, तच्छरीरस्पृष्टं जलं चाऽपि सर्वरोगहरणमभूत् । तदङ्गस्पर्शिवायुश्च विषादिदोषनाशकोऽभूत् । विषयुक्तमन्नादि च तत्पात्र-मुखादिसम्बन्धाद् निर्विषं जातम् । तद्वचनश्रवणाद् महाव्याधयोऽप्यनशन् । तेषां नखादयश्चाऽपि भेषजरूपा जाताः ।

**अणिमा**ख्यसिद्ध्या च ते मूर्त्तिं सङ्क्षिप्य तन्तुवत् सूचीरन्ध्रेऽपि प्रवेष्टुं समर्था जाताः । **महिम**सिद्ध्या ते वपुर्वर्धयित्वा **मेरु**शैलमपि जानुदघ्नं कर्त्तुं समर्था जाताः । **लघिम**सिद्ध्या च ते मारुतादपि लघवो जाताः । **गरिम**सिद्ध्या च शक्राद्यैरप्यसह्या अभूवन् । **प्राप्ति**सिद्ध्या च भूमिष्ठा अपि ते ग्रहादीनां स्पर्शनेऽपि समर्था जाताः । **प्राकम्य**सिद्ध्या पृथिव्यामिव जलेषु सञ्चारसमर्थाः, जलेष्विव पृथिव्यामपि निमज्जनोन्मज्जनसमर्थाश्च जाताः । **ईशित्व**सिद्ध्या च ते



स्वस्य चक्रवर्त्यादिसमृद्धिं कर्त्तुं समर्था जाताः । **वशित्व**सिद्ध्या च क्रूरजन्तूनपि वशगानकार्षुः । **अप्रतिघातित्व**शक्त्या च तेषां गमनमद्रि-मध्येऽपि न प्रतिहतम् । **अन्तर्धान**शक्त्या च तेऽदृश्यभवने समर्था अभवन् । **कामरूपित्व**शक्त्या च नानारूपैर्लोकान् पूरयितुं समर्था अभवन् । **बीजबुद्धित्व**शक्त्या चैकार्थबीजतोऽनेकार्थबीजप्ररोहका जाताः । **कोष्ठबुद्धित्व**शक्त्या च स्मरणं विनैव श्रुता अर्थास्तेषां तथैव स्थिताः । **पदानुसारि**लब्ध्या च श्रुतादेकपदादपि ग्रन्थसर्वार्थबोद्धारो-ऽभूवन् ।

**अवगाहन**शक्त्या चाऽन्तर्मुहूर्त्तेनैव श्रुतसमुद्रमध्यादपि वस्तु समुद्धर्त्तुं समर्था **मनोबलि**नो जाताः। मातृकाक्षरेणाऽपि पठनलीलयाऽन्तर्मुहूर्त्तमात्रेण सर्वश्रुतं परावर्त्तयन्तस्ते **वाग्बलि**नो जाताः । **कायाबले**न च चिरं प्रतिमां प्रपद्याऽपि श्रम-क्लमरहिता जाताः । **अमृतादिस्रुति**लब्ध्या च पात्रस्थकदन्नस्याऽप्यमृतादिरसास्रविणोऽमृतक्षीरमध्वाज्यास्रविणोऽभूवन् । **अक्षीणमहानस**द्धर्या च पात्रस्थान्नादिरल्पोऽप्यतिदानतोऽप्यक्षयो जातः । **अक्षीणमहालय**लब्ध्या चाऽल्पदेशेऽप्यङ्ख्यानां प्राणिनां सुखासनकरा जाताः । **सम्भिन्नस्रोतो**लब्ध्या चैकेनाऽपीन्द्रियेणाऽन्येन्द्रियार्थोपलब्धारोऽभूवन् ।

**जङ्घाचारण**लब्ध्या चैकेनोत्पातेन **रुचकद्वीपं,** ततः प्रत्यागमने चैकेनोत्पातेन **नन्दीश्वरं,** ततो द्वितीयेन च पूर्वोत्पातस्थानमागन्तुं समर्था जाताः । ऊर्ध्वगत्या चैकेनोत्पातेन **पाण्डकं,** ततश्च प्रत्यागमन एकेनो-त्पातेन **नन्दनं** वनं, ततो द्वितीयेनोत्पातेन च पूर्वोत्पातस्थानमागन्तुं समर्था आसन् । **विद्याचारण**लब्ध्या चैकेनोत्पातेन **मानुषोत्तरं,** ततो द्वितीयेन च **नन्दीश्वरं**, ततश्चैकेनोत्पातेन पूर्वोत्पातस्थानमागन्तुं च क्षमा आसन् । तिर्यगिव च क्रमेणोर्ध्वमपि गमनागमनयोः क्षमा जाताः । **आशीविष**द्धर्या च निग्रहा-ऽनुग्रहसमर्था अभूवन् । एवं तेषामन्या अपि नानाविधा

लब्धयोऽभूवन् । किन्तु निरीहा मुमुक्षवस्ते कदाचन लब्धीनामुपयोगं न जगृहुः ।

तत्र **वज्रनाभे**न विंशतिस्थानकैस्तीर्थकृन्नामगोत्रकर्म समुपार्जितम् । तत्राऽर्हतां तत्प्रतिमानां च पूजा-ऽवर्णवादनिषेध-सद्भूतार्थस्तवाः प्रथमम् । सिद्धिस्थानेषु सिद्धानां प्रतिजागरणोत्सवादिभिः सिद्धत्वकीर्त्तनं द्वितीयम् । ग्लानादीनामनुग्रहः प्रवचनवात्सल्यकरणं च तृतीयम् । गुरूणा-माहारादिदानाद् विनयकरणाच्च चतुर्थम् । विंशत्यब्दपर्यायाणां षष्ठिवर्षपर्यायाणां समवायाङ्गभृतां च त्रिविधानामपि स्थविराणां भक्तिः पञ्चमम् । बहुश्रुतानामन्नादिदानेन वात्सल्यकरणं षष्ठम् । तपस्विनां भक्ति-विश्रामणा-दानैर्वात्सल्यकरणं सप्तम् । द्वादशाङ्गे श्रुते सूत्रार्थ-गतज्ञानोपयोगोऽष्टमम् । शङ्कादिदोषरहितस्थैर्यादिगुणभूषितशमादिलक्षणं सम्यग्दर्शनं नवमम् । ज्ञान-दर्शन-चारित्रोपचारैः कर्मणां विनयनाच्च चतुर्विधो विनयो दशमम् । इच्छा-मिथ्याकाराद्यावश्यकयोगेषु यत्नादतीचारपरीहार एकादशम् । अहिंसादि-समित्यादिमूलोत्तरगुणेषु निरतीचारा प्रवृत्तिर्द्वादशम् । अप्रमादेन शुभध्यानकरणं त्रयोदशम् । यथाशक्ति तपःकर्म चतुर्दशम् । तपस्विषु मनो-वाक्कायशुद्ध्या भक्तान्न-पानादीनामसंविभागः पञ्चदशम् । आचार्यादीनां दशानां भक्त-पाना-ऽऽसनादिभिर्वैयावृत्त्यकरणं षोडशम् । निरपायं चतुर्विधसङ्घमनः-समाधिजननं सप्तदशम् । प्रत्यहमपूर्वसूत्रार्थोभयग्रहणमष्टादशम् । श्रद्धानादिना श्रुतज्ञानभक्तिरेकोनविंशम् । धर्मकथादिभिः शासनप्रभावना च विंशतितमं स्थानकम् ।

एतेषामेकमपि तीर्थकृन्नामकर्मणो बन्धकारणं, स भगवाँश्च सर्वैरपि तद् बबन्ध । **बाहु**ना च साधूनां वैयावृत्त्यं कुर्वता चक्रवर्त्तित्व-फलं कर्मोपार्जितम् । **सुबाहु**ना च साधूनां विश्रामणां कुर्वता लोकोत्तरं बाहुबलमर्जितम् । **पीठ-महापीठा**भ्यां च **वज्रनाभ**कृतां **बाहु-**



**सुबाहु**-प्रशंसां श्रुत्वाऽपरबन्धुष्वीर्ष्यावद्भ्यां माया-मिथ्यात्वयुक्ताभ्यां स्त्रीत्वफलं कर्मोपार्जितम् ।

एवं ते षडपि चतुर्दशपूर्वलक्षान् यावदनतीचारां प्रव्रज्यां पालयित्वा संलेखनापूर्वकं पादपोपगमनानशनं प्रपद्य कालधर्मं प्राप्ताः **सर्वार्थसिद्धा**ख्यं दिवं गत्वा त्रयस्त्रिंशाब्ध्यायुषः सुरवरा अभूवन् ।

***इति प्रथमपर्वणि धनादिद्वादशभववर्णनात्मकः***

***प्रथमः सर्गः ॥ १ ॥***

## द्वितीयः सर्गः

अथेतो **जम्बूद्वीपेऽपरविदेहे**ष्व**पराजिता**पुर्यामी**शानचन्द्र**नामा नृपो बभूव । तत्रैव च धर्मात्मनामग्रणीः श्रेष्ठी **चन्दनदास**स्तत्पुत्रः **सागरचन्द्र**श्चाऽऽसीत् । स **सागरचन्द्र** एकदा नृपदर्शनार्थं राजकुलं ययौ । नृपेणाऽऽसन-ताम्बूलादिदानतः सत्कृतश्च । तस्मिन्नेवाऽवसरे केनचिद् मङ्गलपाठकेन समागत्य ‘‘अद्य वसन्तश्रीसमन्वितमुद्यानं सम्भावये’’ति पठिते राजा द्वारपालमादिशत्-‘‘प्रातरखिलैर्जनै-रस्मदुद्यानमागन्तव्य’’मिति नगर्यामुद्घोष्यताम् । तथा ‘‘त्वया-ऽप्युद्यानमागन्तव्य’’मिति प्रसन्नेन नृपेणाऽऽदिष्टः **सागरचन्द्रो** राजानमनुज्ञाप्य स्वावासमागत्य मित्राया**ऽशोकदत्ता**य तां नृपाज्ञाम-वोचत् ।

द्वितीये दिवसे च सपरिच्छदो नृपः पौरलोकाश्च सर्वेऽप्युद्यानं ययुः । **सागरचन्द्रो**ऽपि मलयानिलेन वसन्त इवा**ऽशोकदत्ते**न सहो-द्यानं जगाम । तत्र च नृत्य-गीतादिप्रवृत्तेषु लोकेषु समीपस्थादेकस्मात्-कुञ्जात् ‘‘त्रायध्वं त्रायध्व’’मिति भीतस्त्रीशब्दः शुश्रुवे । तच्छ्रुत्वा ‘किमेत’दिति कुतुकात् समाकृष्ट इव धावितः **सागरचन्द्रः** श्रेष्ठिनः **पूर्णभद्र**स्य सुतां **प्रियदर्शनां** बन्दिभिर्गृहीतामपश्यत् । स तत्र गत्वैकस्य बन्दिनो हस्ताद् बलात् क्षुरिकामागृहीतवान् । ईदृशं च तत्पराक्रमं दृष्ट्वा सर्वे बन्दिनो भयात् पलायाञ्चक्रिरे । इत्थं **सागरचन्द्रे**ण बन्दिभ्यो रक्षिता **प्रियदर्शना** ‘‘परोपकारकुशलः क



एष पुरुषश्रेष्ठः ? मद्भाग्यादेवाऽसावत्र समागतः । कामाकृतिरेष एव मम भर्त्ता भावी’’ति चिन्तयन्ती स्वं धाम जगाम । **प्रियदर्शना**-सक्तहृदयः **सागरचन्द्रो**ऽप्य**शोकदत्ते**न सहितः स्वगृहमगात् ।

तदखिलं च वृत्तान्तं परम्परया ज्ञात्वा **चन्दनदासो**ऽचिन्तयत्-‘‘**सागरचन्द्र**स्य **प्रियदर्शना**यां कमलिन्यां राजहंसस्येवाऽनुरागो युज्यते, किन्तु सपौरुषेणाऽपि वणिजा पौरुषं न विधेयमिति तेन तदा कृतोद्भटताऽसाम्प्रतम् । सरलमतेरस्य च मायाविना**ऽशोकदत्ते**न मैत्र्यप्यनुचिता’’।

ततः **सागरचन्द्रं** समाहूयोपदेष्टुमारभत-‘‘वत्स ! स्वयं शास्त्र-व्यवहारनिपुणोऽसि, वणिजो व्यवहारजीविनोऽनुद्भटाचारवेषाः, यौवनेऽपि गूढपराक्रमा लोकसामान्येऽपि वस्तुनि साशङ्कवृत्तयो भवन्ति । स्वजात्ययोग्यं नाऽऽचरणीयम् । असत्संसर्गश्च त्याज्यः । अयं च मायाविनामग्रणीर**शोकदत्तो**ऽवसरे त्वां सर्वथा दूषयिष्यति’’ ।

ततः **सागरचन्द्रो** हृद्यचिन्तयत्-‘‘अनेनोपदेशप्रकारेणाऽनुमिनोमि यत् ‘कन्याबन्दिवृत्तान्तस्तातेन ज्ञातः । **अशोकदत्त**श्चाऽस्मै न रोचते’’। ततः स सविनयं प्राह-‘‘तातेनोपदिष्टं पुत्रेण मयाऽवश्यकार्यम् । गुर्वाज्ञालङ्घने हि करणादकरणमेव वरम् । किन्तु कदाचित् तादृशे समये समुपस्थिते विचारेण कालक्षेपे कार्यकाल एव व्यत्येति । तथाऽपि प्राणसंशयेऽपि भवदनभिमतं नाऽऽचरिष्यामि । **अशोक-दत्ते**न सह मैत्र्यां च समा जातिः, समा विद्या, समे शील-वयसी, परस्परोपकारकारित्वं, सुख-दुःखभागित्वादि च कारणम् । तस्य दोषो गुणो वा तस्यैव न मम । किं च स न मायावी, कोऽपि मृषैव तातस्याऽऽख्यत् । भवतु वा स तथा, एकत्र स्थितोऽपि काचः काच एव, मणिर्मणिरेव’’ ।

ततश्च**न्दनदासो**-‘‘मतिमानसि, तथाऽपि सावधानेन भवितव्य’’-मिति पुत्रमुक्त्वा तदाशयानुसारेण तदर्थं **पूर्णभद्रा**च्छीलादिगुणपूर्णां

**प्रियदर्शना**मयाचत । **पूर्णभद्रो**ऽपि ''त्वत्सुतेनोपकारक्रीता मत्सुता पूर्वमेवे''त्युक्त्वा तद्वचोऽमन्यत ।

अथ शुभे दिने शुभे लग्ने पितृभिः **सागरचन्द्र**स्य **प्रियदर्शन**या सह विवाहोऽकारि । तौ च वधू-वरौ स्वेष्टविवाहेन मुमुदाते। प्रीतिश्च तयोः परस्परमवर्धिष्ट । एकदा बहिर्गतवतः **सागरचन्द्र**स्य गृहे समेत्याऽ**शोकदत्तः प्रियदर्शना**मुवाच-''**सागरचन्द्रो धनदत्त**श्रेष्ठिनो वध्वा सह नित्यं रहो मन्त्रयते, किं कारणं तत्र ?'' सरलमतिः साऽप्युवाच-''तदेतत् तव मित्रं, त्वं वा जानासि, व्यवसायिनां रहोमन्त्रितं को जानाति ? ज्ञात्वाऽपि गृहे कथं कथयेत् ?''

ततो**ऽशोकदत्ते**न ''जानामि, किन्तु तत् कथं कथ्यते ?'' इत्युक्ते **प्रियदर्शनो**वाच-''किं तदिति कथय'' । ततस्तेन ''त्वया मम यत् प्रयोजनं, तदेव तस्य तये''ति कथितया **प्रियदर्शन**या ''मया किं ते प्रयोजन''मिति पृष्टोऽ**शोकदत्त** उवाच-''रसज्ञस्य कस्य पुंसस्त्वया प्रयोजनं न भवेत् ?'' ततस्तदनिष्टं श्रुत्वा सकोपा नम्रमुखीभूयसा **प्रियदर्शना** साक्षेपमुवाच-''रे पुरुषाधम ! त्वयैतत् कथं चिन्तितम् ? चिन्तितं वा कथमुक्तम् ? धिक् तव साहसम् । किं मम पतिमेवमात्मानुरूपमेव भावयसि ? गच्छ, मा तिष्ठ, त्वद्दर्शनादपि पाप''मित्येवं तया निर्भर्त्सितः स दस्युरिव त्वरितं ततो निर्ययौ ।

मार्गे च विमनस्को गच्छन् **सागरे**ण विलोकितः ''किमुद्विग्न इव दृश्यसे'' इति पृष्टश्च स दुष्टः कपटिश्रेष्ठो दीर्घं निःश्वसन् जगाद-''मित्र ! संसारे उद्वेगकारणे किं पृच्छसि ? अस्थानव्रणमिवाऽऽच्छादनीयमप्रकाशनीयं च किमप्युपस्थितम् । तथाऽपि प्राणसमे त्वयि मित्रे किञ्चिदपि नाऽप्रकाशनीयम् । स्त्रियोऽनर्थकारिण्य इति त्वं जानास्येव । अद्य हि **प्रियदर्शना** मां चिरमयुक्तमुक्तवती । एषा स्वयमेव लज्जिता कदाचरणाद् विरमेदिति मया सेयत्कालमुपेक्षिता ।



अद्य च तया निरुद्धस्तस्या मनोरथमपूरयित्वैव कथञ्चिदात्मानं मोचयित्वेहोपस्थितोऽस्मि । एषा जीवन्तं मां न त्यक्ष्यतीति मर्त्तुं चिन्तयन्-''एषा परोक्षेऽन्यथा मित्रस्य कथयिष्यती''ति त्वां सर्वं वृत्तान्तं कथयामि । यथा त्वमस्यां कृतविश्वासो नाऽपायमुपेयाः । तदेतदुद्वेगकारणं मम'' ।

तद्वचः समाकर्ण्य पीतविष इव क्षणं निःस्पन्दः **सागरो** जगाद-''योषितामिदं सम्भाव्यते, तथाऽपि त्वं मा विषीद । स्वस्थः शुभे व्यवसाये तिष्ठ । तद्वचो न स्मर । तस्या यद्भवतु तद्भवतु, केवलमावयोर्मनोमालिन्यं मा भू''दित्येवं तेनाऽनुनीतः स मुमुदे । ततः प्रभृति च **सागरः प्रियदर्शनां** रोगग्रस्ताङ्गुलीमिव सोद्वेगं धारयामास । **प्रियदर्शना** च ''मित्रयोर्मत्कृतो भेदो मा भू''दि**त्यशोक**वृत्तान्तं **सागराय** न कथयामास ।

अथ संसाराद् विरक्तः **सागरो** धनं दीनादिभ्यः प्रयच्छन् कालेनाऽऽयुः पूरयित्वा कालधर्मं प्राप । **प्रियदर्शना**ऽ**शोकदत्त**श्च तथैव कालधर्मं प्रापतुः । **जम्बूद्वीपे भरत**क्षेत्रे दक्षिणखण्डे **गङ्गा-सिन्धु**मध्येऽवसर्पिण्यां तृतीयारे पल्याष्टमांशशेषे, **सागर-प्रियदर्शने** युगलिकरूपेण समुदपद्येताम् । **ऐरावते**ष्विव **भारते**ष्वपि काल-व्यवस्थाहेतुर्द्वादशारं कालचक्रं प्रवर्त्तते ।

❀ ❀ ❀

तथाहि-अवसर्पिण्युत्सर्पिणीभेदात् कालो द्विविधः । तत्राऽवसर्पिण्यामेकान्तसुषमादयः षड् अराः । तेष्वेकान्तसुषमारश्चतुष्कोटिकोटिसागरोपमः । सुषमारस्त्रिकोटिकोटिसागरोपमः । सुषमदुःषमारो द्विकोटिकोटिसागरोपमः । दुःषमसुषमारश्च द्विचत्वारिंशत्सहस्रवर्षोनैककोटिकोटिसागरोपमः । दुःषमार एकविंशतिसहस्राब्दः । एकान्तदुःषमारश्च तावद्वर्षप्रमाणः । एवमुत्सर्पिण्यामप्यवसर्पिणीवत्

षड् अराः प्रतिलोमक्रमेण तावद्वर्षप्रमाणाः । तदेवमवसर्पिण्यामुत्सर्पिण्यां च मिलित्वा सागरोपमकोटिकोटीनां विंशतिकोटिकोटयः ।

तत्र प्रथमेऽरे मर्त्याः पल्यत्रितयजीविनो, गव्यूतत्रितयोच्छ्रायाश्चतुर्थदिनभोजिनश्चतुरस्रसंस्थाना, वज्रर्षभनाराचसंहननाः, सदासुखा, निष्कषायाः, सर्वदा स्वभावत एवाऽधर्मवर्जिताश्च भवन्ति । तेषां च वाञ्छितान्युत्तर**कुरु**ष्विव दश **मद्याङ्गा**द्याः कल्पवृक्षाः प्रददुः ।

तथाहि—**मद्याङ्गा** मद्यानि, **भृङ्गा** भाजनानि, **तूर्याङ्गा**स्तूर्याणि, **दीपशिखा ज्योतिषिका**श्चोद्योतं, **चित्राङ्गा** विचित्राणि माल्यानि, **चित्ररसा** भोज्यानि, **मण्याङ्गा** भूषणानि, **गेहकाराः** सुगृहाणि, **अनग्ना** वासांसि च प्रददुः । एते च प्रत्येकमन्यान्यपि वस्तून्यनेकशः प्रददुः । तदा च भूमयः शर्करा इव स्वादवो नद्यादिजलानि च मधुराणि भवन्ति स्म । तस्मिन्नरेऽतिक्रामति चाऽऽयुः-संहननादिकं कल्पवृक्षप्रभावाश्च शनैः शनैर्न्यूनानि न्यूनतराणि च भवन्ति स्म ।

द्वितीयेऽरे च मर्त्याः पल्यद्वितयायुषो, गव्यूतद्वितयोच्छ्रायास्तृतीयदिनभोजिनोऽभवन् । किञ्चिद् न्यूनप्रभावाश्च कल्पवृक्षाः, आपो भुवश्च किञ्चिन्माधुर्यहीना आसन् । तृतीयेऽरे च मर्त्या एकपल्यायुष, एकगव्यूतोच्छ्राया, द्वितीयदिनभोजिन आसन् । अस्मिन्नरेऽपि च पूर्ववत् कल्पद्रुमप्रभावो वपुरायुर्नद्यादिमाधुर्यं च क्रमशो न्यूनं जातम् । चतुर्थे त्वरके मर्त्याः पूर्वकोट्यायुषः, पञ्चधनुःशतसमुच्छ्रायाः । पञ्चमे चाऽरे वर्षशतायुषः, सप्तकरोच्छ्रायाः । षष्ठेऽरे च षोडशाब्दायुषो हस्तमात्रसमुच्छ्राया भवन्ति । उत्सर्पिण्यामपि षट्स्वप्यरेषु प्रातिलोम्येन भवन्ति ।

तत्र तौ युगलिनौ तृतीयारान्तजातत्वाद् नवधनुःशतदीर्घौ, पल्यदशमांशायुष्कौ, समचतुरस्रसंस्थानौ, वज्रर्षभनाराचसंहननौ चाऽभूताम् । तत्र पतिः कनकवर्णः, पत्नी च प्रियङ्गुवर्णा जाता । तत्रैवाऽ**शोकदत्तो**ऽपि पूर्वजन्मकृतमायाप्रभावेण श्वेतवर्णश्चतुर्दन्तो गजो बभूव । स इतस्ततो भ्राम्यंश्चैकदा पूर्वजन्ममित्रं युगलिकमीक्षितवान् । तद्दर्शनाच्चाऽतिप्रसन्नस्य तस्य स्नेहोऽभ्यवर्धत । स हस्ती च तं हस्तेन गृहीत्वाऽऽलिङ्ग्याऽनिच्छन्तमपि स्वस्कन्धप्रदेशमधिरोहितवान् । एवं पुनः पुनरन्योन्यदर्शनात् तयोः पूर्वजन्मस्मरणं जातम् । चतुर्दन्तगजस्कन्धारूढं च तं दृष्ट्वाऽन्ये युगलिका विस्मिता विमलगजारूढत्वाद् **विमलवाहन** इत्यूचुः ।



स [१]**विमलवाहन**श्च जातिस्मृत्या रूपवत्वाच्च सर्वजनाधिको जातः । काले गच्छति च कल्पवृक्षाणां प्रभावो मन्दीबभूव । **मद्याङ्गा** विलम्बेन स्तोकं विरसं च मद्यं ददुः। एवमन्येऽपि कल्पद्रुमा विलम्बेन स्तोकं विरूपं च वस्तु वितेरुः। कालप्रभावाच्च युगलिकानां कल्पवृक्षेषु ममत्वं जातम् । तेन चैकेन स्वीकृतं यदाऽन्यः कल्पवृक्षमाश्रयत् तदा परस्परपराभवमापन्नास्ते **विमलवाहनं** स्वामिनं चक्रुः । स च जातिस्मृत्या नीतिज्ञो युगलिकानां कल्पवृक्षान् विभज्य ददौ । मर्यादाभञ्जकदण्डनाय च हाकारनीतिमाविश्चकार । "हा त्वया दुष्कृत"मिति हाकारदण्डभयेन ते मर्यादोल्लङ्घनाद् विरताः । तस्याऽऽयुषि षण्मासावशिष्टे **चन्द्रयशो**नामभार्यायां युगलिकोऽसङ्ख्येयवर्षायुष्कः, सुसंस्थानो, वज्रसंहननः, श्यामवर्णोऽष्टधनुःशतोच्छ्रायश्च जज्ञे। तयोश्च पितृभ्यां **चक्षुष्मांश्चन्द्रकान्ते**ति च नामाऽभिदधौ ।

अथ **विमलवाहन** आयुः पूरयित्वा जरा-रोगौ विना कालधर्मं प्राप्य **सुपर्णकुमारे**षूत्पेदे । **चन्द्रयशाश्च नागकुमारे**ष्वजायत । [२]तत**श्चक्षुष्मान**पि **विमलवाहन**वद् हाकारदण्डनीत्यैव युग्मिनां मर्यादामरक्षयत् । आयुषश्चरमे काले च **चक्षुष्मच्चन्द्रकान्त**यो**र्यशस्वी** च **सुरूपा** चेति युगलिकौ पितुः संहनन-संस्थानवर्णौ किञ्चिन्न्यूनायुष्कौ, सप्तधनुःशतोच्छ्रायौ जज्ञाते । कालधर्मं प्राप्य च **चक्षुष्मान् सुपर्णेषु चन्द्रकान्ता** च **नागे**षु जज्ञाते ।

[३]**यशस्वी** च पितृवद् युगलिकान् पालयन् हाकारदण्डो-ल्लङ्घकाय माकारदण्डं प्रवर्त्तयामास । सोऽल्पेऽपराधे हाकारदण्डं, मध्यमे च माकारदण्डं, महति च दण्डद्वयं प्रायुङ्क्त । चरमे चाऽऽयुषि **यशस्वि-सुरूप**योश्चन्द्रवर्णः पुत्रोऽ**भिचन्द्र** इति, प्रियङ्गु-वर्णा पुत्री च **प्रतिरूपे**ति युगलिकौ पितृतोऽल्पायुष्कौ, सार्धषड्धनुः-शतोच्छ्रायौ जज्ञाते । कालधर्मं प्राप्य **यशस्वी** चाऽ**ब्धिकुमारे**षु **सुरूपा** च **नागकुमारे**ष्वजायेताम् । [४]**अभिचन्द्र**श्च पितेव युगलिकान् ताभ्यां नीतिभ्यां शशास । आयुःशेषे च तयोर**भिचन्द्र-प्रतिरूप**योः पुत्रः **प्रसेनजिदि**ति पुत्री च **चक्षुष्कान्ते**ति युगलिकौ पितृभ्यां न्यूना-युषौ, तमालश्यामलवर्णौ, षड्धनुःशतोच्छ्रायौ जज्ञाते । **अभिचन्द्र**श्च मृत्वाऽ**ब्धिकुमारे**षु, **प्रतिरूपा** च पुन**र्नागकुमारे**षु तदैवोदपद्येताम् ।

[५]**प्रसेनजिद**पि पितृवद् युगलिकान् पालयन् पूर्वोक्तदण्ड-द्वयोल्लङ्घकाय तृतीयां धिक्कारनीतिं प्रवर्त्तयामास, ततश्च चरमे आयुषि तयोः **प्रसेनजिच्चक्षुष्कान्त**योः पुत्रो **मरुदेव** इति पुत्री च **श्रीकान्ते**ति युगलिकौ सुवर्ण-प्रियङ्गुवर्णौ, सार्धपञ्चधनुःशतोच्छ्रायौ जज्ञाते । ततः **प्रसेनजित्** कालधर्मं प्राप्य **द्वीपकुमारे**षु **चक्षुष्कान्ता** च **नागकुमारे**षु तदैव जज्ञाते । तेनैव नीतिक्रमेण युगलिकान् शासतो

[६]**मरुदेव**स्य **श्रीकान्ता**यां पुत्रो **नाभि**रिति पुत्री च **मरुदेवे**ति युगलिकौ पञ्चविंशत्यधिकपञ्चधनुःशतोच्छ्रायौ, सुवर्ण-प्रियङ्गुवर्णौ, पितृभ्यां किञ्चिद् न्यूनपूर्वायुष्कौ समजायेताम् । **मरुदेव**श्च विपद्य **द्वीपकुमारे**षु **श्रीकान्ता** च **नागकुमारे**षु तत्कालमेव जज्ञाते ।

❀ ❀ ❀

तदनु सप्तमः कुलकरो [७]**नाभि**स्ताभिस्तिसृभिर्नीतिभिर्युगलिकान् प्रशशास । तदा तृतीयारशेषे चतुरशीतिपूर्वलक्षेषु सनवाशीतिपक्षेषु सत्स्वाषाढमासस्य कृष्णपक्षे चतुर्थ्यामुत्तराषाढानक्षत्रे त्रयस्त्रिंशत्सागरो-



पमायुर्भुक्त्वा **वज्रनाभ**जीवः **सर्वार्थसिद्धि**तश्च्युत्वा श्री**नाभि**पत्न्या **मरुदेव्याः** कुक्षाववातरत् । तदा त्रैलोक्येऽपि क्षणं महान् प्रकाशः शरीरिणां दुःखोच्छेदात् सुखं च बभूव ।

तद्रात्रौ च प्रसुप्तया **मरुदेव्या** चतुर्दश महास्वप्ना दृष्टाः । तत्राऽऽदौ श्वेतः पीनस्कन्धो दीर्घसरलपुच्छः सकनककिङ्किणीको [१]**वृषः**, चतुर्दन्तः श्वेतवर्णः पादैरुन्नतः क्षरन्मदो [२]**गजराजः**, दीर्घजिह्वो लोलकेशरः पिङ्गाक्ष उत्पुच्छयन् [३]**केसरी,** पद्मनेत्रा दिग्गजोत्तोलित-पूर्णकुम्भोपशोभिता पद्मस्था [४]**लक्ष्मीः**, नानाविधकल्पवृक्षपुष्पगुम्फितं [५]**दाम,** आह्लादकं कान्तिप्रकाशितदिङ्मण्डलं [६]**चन्द्रमण्डलं**, सर्वत-मोहन्ताऽतिप्रकाशमानः [७]**सूर्यः**, सकिङ्किणीकश्चलत्पताको [८]**महा-ध्वजः**, विकसितपद्ममुखः सुधाकुम्भतुल्यः सौवर्णः [९]**पूर्णकलशः,** गुञ्जद्भृङ्गारविन्दमनोहरो महान् [१०]**पद्माकरः**, उत्तालतरङ्गः [११]**क्षीर-निधिः,** अतुल्यकान्ति [१२]**विमानं,** राशीभूतनिर्मलकान्तिर्महान् [१३]**रत्नपुञ्जः,** तेजस्विनां सम्पिण्डितं तेज इव [१४]**निर्धूमोऽग्नि**श्चेत्येते चतुर्दशस्वप्ना मुखे प्रविशन्तो दृष्टाः ।

अथ पश्चिमरात्रे स्वप्नान्ते स्मयमानमुखा **मरुदेवी** गतनिद्राऽति-मुदिता **नाभ**ये स्वप्नान् तथैवाऽकथयत् । स च 'उत्तमः कुलकरस्ते पुत्रो भविते'ति स्वप्नान् विचार्योदतरत् । तदा शक्राणामासनान्य-कम्पन्त । तेन चोपयोगं दत्त्वा ज्ञातवृत्तान्ताः शक्राः **मरुदेव्याः** स्वप्नार्थं कथयितुं समाययुः । कृताञ्जलयश्च ते स्वप्नफलं वर्णयामासुः ।

तथाहि-स्वामिनि ! स्वप्ने **वृष**दर्शनात् ते पुत्रो मोहपङ्कमग्न-धर्मरथोद्धरणसमर्थः, **गज**दर्शनाद् गरीयसामपि गुरुर्महाबलवांश्च, **सिंह**दर्शनाद् धीरो निर्भीकः शूरोऽप्रतिहतविक्रमश्च, **लक्ष्मी**दर्शनात् त्रैलोक्यसाम्राज्यलक्ष्मीनाथः, **स्रग्**दर्शनाद् माल्यवत् शिरसोद्वाह्य-शासनः, **पूर्णचन्द्र**दर्शनात् कान्तो नेत्रानन्दनश्च, **सूर्य**दर्शनाद् मोहत-

मोनाशनेन जगत्प्रकाशकः, **ध्वज**दर्शनाद् महावंशप्रतिष्ठो धर्मध्वजश्च, **पूर्णकुम्भ**दर्शनात् सकलातिशयपूर्णपात्रं, **पद्माकर**दर्शनाज्जगत्ता-पहारकः, **क्षीरनिधि**दर्शनादधृष्योऽभिगम्यश्च, **विमान**दर्शनाद् वैमा-निकसुरसेवितश्च, **रत्नपुञ्ज**दर्शनात् सर्वगुणरत्नाकरः, **अग्नि**दर्शना-दन्यतेजस्वितेजोजेता चेति चतुर्दशभिः स्वप्नैश्चतुर्दशरज्जुप्रमाणे लोके स्वामी भवितेति सूच्यते । एवं स्वप्नफलमुक्त्वा **मरुदेवीं** प्रणम्य च देवेन्द्राः सर्वे क्षणात् स्वं स्वं स्थानं जग्मुः ।

**मरुदेव्य**पि स्वप्नफलश्रवणमुदिता सूर्येण मेघमालेव तेन गर्भेणाऽशोभत । गर्भप्रभावाच्च सा प्रियङ्गुवर्णाऽपि पाण्डुतां, पीवर-स्तनत्वं, विकसितनेत्रत्वं, विपुलनितम्बतटत्वं, गजवद् मन्दगतित्वं, विशिष्टलावण्यश्रियं, त्रैलोक्यमहासारं गर्भं धारयन्त्यपि चाऽखिन्नतां च प्राप । यतो गर्भवासिनामर्हतामयं प्रभाव एव । उदरे वर्धमान-निगूढगर्भप्रभावाच्च **मरुदेवी** विश्ववत्सला, **नाभि**श्च युगलिकानां पितृतोऽप्यधिकमान्यः, कल्पवृक्षाश्च विशिष्टप्रभावाः, पृथिवी च शान्ततिर्यग्नृवैराऽजायत ।

अथ नवसु मासेषु सार्धाष्टमदिनेषु च गतेषु चैत्रकृष्णाष्टम्यामर्धरात्रे उत्तराषाढानक्षत्रे ग्रहेषूच्चस्थेषु च **मरुदेवी** युगलिकं पुत्रं सुखेन सुषुवे । तदानीं च दिशः प्रसन्ना जाताः, लोकाः क्रीडापरा जज्ञिरे । जगत्त्रये कृतलोकनेत्रचमत्कारो विद्युत्प्रकाश इवाऽन्धकारभेदी महान् प्रकाशो बभूव । दिवि दुन्दुभिरनाहतोऽपि मेघगम्भीरनादो ननाद । न केवलं तिर्यङ्-नरा-ऽमराणां, नारकाणामप्राप्तपूर्विणामपि क्षणं सौख्यं सम-जायत । मन्दं मन्दं वहद्भिः समीरणैश्च पृथिव्या रजांसि दूरीकृतानि । मेघाश्च गन्धजलं ववृषुः । पृथिवी च सोच्छ्वासा जाता ।

अथाऽधोलोकवासिन्य आसनकम्पनेन ज्ञातवृत्तान्ता **भोगङ्करा**-प्रमुखा अष्टौ दिक्कुमार्यः समागत्य प्रसूतिगृहे जरायुरक्तादिकलङ्करहितं



तीर्थकरं तन्मातरं च त्रिप्रदक्षिणीकृत्याऽभिवन्द्य चोचुः-''जगन्मातस्तुभ्यं नमः, वयमधोलोकवासिन्योऽष्टौ दिक्कुमारिका अवधिज्ञानतस्तीर्थकृज्जन्म ज्ञात्वा तन्महिम्नः करणार्थमिहाऽऽगताः, तन्न भेतव्यम्'' । एवमुक्त्वा च ताः पूर्वोत्तरे देशे स्थिताः स्तम्भसहस्रसमन्वितं प्राङ्मुखं प्रसूतिकागृहं निर्माय संवर्त्तवातेन परित आयोजनं शर्करा-कण्टकादिकमपनीय संवर्त्तवातं संहृत्य भगवन्तं प्रणम्य तत्समीपमुपविष्टास्तं जगुः ।

तथैवाऽऽसनकम्पेन ज्ञात्वा मेरुगिरिस्थिता ऊर्ध्वलोकवासिन्यो **मेघङ्करा**द्या अष्टौ दिक्कुमारिकाः समागत्य जिनं जिनमातरं च नत्वा स्तुत्वा च नभसि मेघपटलं विचक्रुः । ततः सुगन्धितोयवर्षणेन परित आयोजनं रजांसि शमयित्वा पञ्चवर्णपुष्पाणि जानुदघ्नं वर्षयित्वा प्रहृष्टा जिनगुणान् गायन्त्यो यथोचिते स्थाने तस्थुः ।

तथा प्राग्रुचकाद्रिस्थिता **नन्दा**द्या अष्टौ दिक्कुमार्यो विमानैः समागत्य जिनं जिनमातरं च नत्वा स्तुत्वा च मङ्गलानि गायन्त्यो दर्पणपाणयः प्रागस्थुः । दक्षिणरुचकाद्रिस्थाश्चाऽष्टौ **समाहारा**द्या दिक्कुमार्यः प्रमुदिताः समागत्य जिनं तन्मातरं नत्वा स्तुत्वा च गायन्त्यो भृङ्गारपाणयो दक्षिणेनाऽस्थुः । पश्चिमरुचकाद्रिस्था अप्यष्टौ **इला**देव्याद्या दिक्कुमार्यो जिनं तदम्बां च नत्वा स्तुत्वा च व्यजनहस्ता गायन्त्यः पश्चिमेन तस्थुः । एवमुत्तररुचकाद्रिस्था अप्यष्टौ दिक्कुमार्यो-ऽ**लम्बुसा**द्या आभियोगिकैरमरैः सहाऽऽगत्य जिनं तदम्बां च नत्वा स्तुत्वा च चामरपाणयो गायन्त्य उत्तरेण तस्थुः ।

तथैव विदिग्रुचकाद्रिस्था**श्चित्रा**द्या दिक्कुमारिकाश्चतस्रः समागत्य जिनं तदम्बां च नत्वा स्तुत्वा च गायन्त्यो दीपहस्ता ईशानादिविदिक्षु तस्थुः । तथा रुचकद्वीपतो **रूपा**द्याश्चतस्रो दिक्कुमारिकाः समागत्य जिनस्य चतुरङ्गुलवर्जं नाभिनालं छित्वा भूमौ विवरं निचख्नुः । तत्र तत् क्षिप्त्वा रत्नैर्विवरमापूर्य तदुपरि दूर्वाभिः पीठिकां बद्ध्वा

प्रसूतिगृहात् पूर्वदक्षिणोत्तरदिक्षु त्रीणि श्रीगृहाणि कदलीगृहाणि च विचक्रुः । प्रत्येकं तेषां मध्ये स्वविमानवद् विशालं सिंहासनभूषितं चतुःशालं विचक्रिरे । दक्षिणचतुःशाले कराञ्जलौ जिनं न्यस्य तन्मातरं चोपनीय सिंहासने समुपवेश्य सुगन्धिना लक्षपाकतैलेनाऽभ्यानञ्जुः । दिव्येनोद्वर्त्तनेन सप्रमोदमुद्वर्त्त्य ततः प्राक्चतुःशाले समुपनीय सिंहासने समुपवेश्य निर्मलैरम्भोभिः स्नपयित्वा गन्धकषायवस्त्रैरङ्गानि प्रमृज्य गोशीर्ष-चन्दनरसैश्चर्चयामासुः । देवदूष्ये वस्त्रे चित्राण्याभरणानि च परिधाप्योत्तरचतुःशाले नीत्वा सिंहासनस्योपरि समुपवेश्याऽऽभि-योगिकैर्देवैः **क्षुद्रहिमालय**गिरेर्गोशीर्षचन्दनेन्धनानि शीघ्रं समानाय्या-ऽरणि–काष्ठाभ्याममग्निमुत्पाद्य तत्र होमं वितेनुः । तद्वह्निभस्मना रक्षा-पोट्टलिकां विधाय प्रभोः कर्णान्तिके ''पर्वतायुर्भवे''त्युच्चैरुक्त्वा पाषाणगोलकौ परस्परं समास्फालयामासुः । पुन**र्मरुदेवां** जिनं च सूतिकाभवने शय्यागतौ विधाय मङ्गलानि गायन्त्यस्तस्थुः ।

अथेतश्च स्वर्गेषु युगपच्छाश्वतीनां घण्टानां ध्वनिरुच्चकैर्बभूव । इन्द्राणामासनानि हृदयानि च चकम्पिरे । तेन क्रुद्धः स्फुरदधरः **सौधर्मेन्द्रः** ''कस्य पत्रमद्य कृतान्तेन करे गृहीत''मिति ब्रुवन् वज्रमादित्सते स्म । तं तथा दृष्ट्वा सेनापतिर्व्यजिज्ञपत्–''किङ्करे मयि सति स्वयमावेशस्य किं कारणम् ? कं तव शत्रुं चूर्णयामीति समादिश'' । ततः समाहितमना इन्द्रोऽवधिं प्रयुज्य प्रथमतीर्थकृज्जन्म ज्ञात्वा तत्क्षणाद् विगलितक्रोधः ''मया चिन्तितमिदं धिक्, मम मिथ्यादुष्कृतमस्त्वि''ति ब्रुवन् सिंहासनं विजहौ । स सप्ताष्टपदानि गत्वा शिरस्यञ्जलिं कृत्वा जानुशिरःस्पृष्टभूपृष्ठो नत्वा रोमाञ्चितोऽर्हन्तं स्तोतुं प्रचक्रमे ।

ततो **नैगमेषिणं**–''**जम्बूद्वीपे भरत**दक्षिणार्धमध्यमभूभागे कुलकरस्य **नाभेः** पत्न्यां **मरुदेवा**यां पुत्रः प्रथमतीर्थकरो जातोऽस्तीति



तज्जन्मस्नात्रहेतवे सर्वे सुरा आहूयन्ता''मित्यादिशत् । ततः स योजनविस्तारां **सुघोषा**ख्यां घण्टामवादयत् । तेन च सर्वेषामन्यविमानानां घण्टा नेदुः । तेन च सावधानान् देवानुद्दिश्य सेनापतिः **सौधर्मेन्द्रा**-ज्ञामश्रावयत् । ततश्च सदेव्यादिपरिच्छदाः सर्वे देवाः स्वस्ववाहन–विमानादिभिः **सौधर्मेन्द्र**मुपाजग्मुः । स चेन्द्रः ''अप्रतिमं विमानं क्रियता''मित्याभियोगिकं **पालक**नामानमादिशत् । **पालक**श्च ततः पञ्चशतयोजनमुच्चं लक्षयोजनविस्तारमिच्छानुमानगमनं रत्नस्तम्भ–वेदी–गवाक्ष–ध्वजादिभिरलङ्कृतं विमानं निरमासीत् । ततश्च कोटिसङ्ख्यैः सामानिकादिभिर्देवैः समन्वितेन सपरिच्छदेन **सौधर्मेन्द्रे**णाऽधिष्ठितं तद्विमानमन्यदेवविमानानि चेन्द्रेच्छानुसारेण **सौधर्म**तः प्रतस्थिरे ।

वेगेन च तानि विमानान्यसङ्ख्यातद्वीप–समुद्रानुल्लङ्घ्य **नन्दीश्वर**द्वीपमधिजग्मुः। तत्र दक्षिणपूर्वस्थे **रतिकरा**चले तद्विमान-मिन्द्रः सञ्चिक्षेपः । एवं तत्र तत्र क्रमाद् विमानं सङ्क्षिपन् द्वीप–सागरान् समुल्लङ्घं समुल्लङ्घं चेन्द्रस्तीर्थकृज्जन्मगृहं प्राप । तेन विमानेन सूतिकागृहं प्रदक्षिणयन्नुत्तरपूर्वदिशि विमानमस्थापयच्च। ततो विमानादुत्तीर्य प्रसन्नमनास्तीर्थकृत्समीपं गत्वा प्रणम्य प्रदक्षिणां कृत्वा च पुनर्भक्त्यतिशयेन समातरं तं प्रणम्य मूर्ध्नि विहिताञ्जलि**र्मरुदेवा**-मवोचत–''देवि ! त्वमेव पुत्रिणीषु धन्या पुण्यवती चाऽसि, यत् त्वया प्रथमतीर्थनाथः सुषुवे । अहं **सौधर्मेन्द्र**स्तव पुत्रस्याऽर्हतो जन्म-महिमोत्सवं कर्त्तुमिहाऽऽगमं त्वया न भेतव्यम्'' ।

ततो **मरुदेव्या**मवस्वापनिकाख्यनिद्रां विधाय, **नाभि**सूनोः प्रतिरूपं निर्माय **मरुदेवा**पार्श्वे च तन्निवेश्य स्वात्मानं पञ्चधा विकृतवान्। तेषु पञ्चस्विन्द्रेष्वेकः पुरोभूय प्रणम्य च 'स्वामिन्ननुजानीही'त्युक्त्वा गोशीर्षचन्दनाक्ताभ्यां पाणिभ्यां भगवन्तमाददे । अन्यो भगवतो मूर्धन्यात-पत्रं दधौ । अन्यौ च द्वाविन्द्रौ पार्श्वयोश्चारुचामरे दधतुः । अन्यश्चेन्द्रो

वज्रदण्डं बिभ्राणो जगत्पतेरग्रेसरो द्वाःस्थ इव बभूव । ततो जयजयारावकरैरमरैः परिवृताः पञ्चेन्द्रा उत्पत्याऽम्बरेण **मेरु**पर्वतं प्रापुः । तत्र **पाण्डक**वने चूलिकां दक्षिणेनाऽ**तिपाण्डुकम्बला**ख्यायां शिलायामर्हत्स्नात्रार्हे सिंहासने निजाङ्कस्थापितजिनः **सौधर्मेन्द्रः** सहर्षं पूर्वाभिमुखः समुपाविशत् ।

अत्राऽन्तरे **महाघोषा**ख्यघण्टानादप्रबोधितैरष्टाविंशतिविमानलक्षवासिभिरमरैः परिवृत्तः शूलभृद् वृषवाहनः **पुष्पका**ख्याभियोग्यनिर्मिते **पुष्पका**ख्ये विमाने स्थितः **ऐशान**कल्पाधिपतिः, द्वादशलक्षविमानवासित्रिदशपरिवृतः **सुमनो**विमानस्थः **सनत्कुमारः**, अष्टलक्षविमानस्थदेवैः परिवृत्तः **श्रीवत्स**विमानस्थो **महेन्द्रः**, चतुर्लक्षविमानस्थदेवपरिवृतो **नन्द्यावर्त्त**विमानस्थो **ब्रह्मा**, पञ्चाशत् सहस्रविमानसुरसमन्वितः **कामगव**विमानस्थो **लान्तकः** चत्वारिंशत् सहस्रविमानस्थदेवपरिवृत्तः **प्रीतिगम**विमानस्थः **शुक्रः**, षट्सहस्रविमानस्थवासिसुरसमन्वितो **मनोरम**विमानस्थः **सहस्रारः**, चतुःशतविमानस्थसुरान्वितो **विमल**विमानस्थ **आनत-प्राणतेन्द्रः**, शतत्रयविमानस्थदेवपरिवृत्तः **सर्वतोभ**द्रविमानस्थ **आरणाच्युतेन्द्र**श्च तत्र समाययुः ।

इतश्च **रत्नप्रभा**मेदिन्या अन्तर्निवासिनां **भवन-व्यन्तरे**न्द्राणामासनानि चकम्पिरे । तदा **चमरचञ्चा**पुर्यां **सुधर्मा**यां सभायां **चमरा**ख्ये सिंहासने समासीन**श्चमरा**सुरोऽवधिना जिनजन्म ज्ञात्वा लोकज्ञापनाय सेनापतिना **द्रुमा**ख्येणौ**घस्व**राख्यां घण्टामवादयत् । सदेवीपरिच्छदश्च पञ्चशतयोजनोच्चं पञ्चाशत्सहस्रयोजनविस्तृतं महाध्वजविभूषितं विमानमधिरुह्य **चमरा**सुरः, **बलिचञ्चा**नगर्या असुरेश्वरो **बलि**श्च **महाद्रुमा**ख्येन चमूपतिना **महौघस्वरां** घण्टां वादयित्वा ज्ञापितैः सामानिकदेवादिभिः परिवृतो **मेरु**गिरिं जग्मतुः । **नागेन्द्रो**



**धरण**श्चाऽपि **भद्रसेने**न चमूपतिना **मेघस्वरा**घण्टावादनाज्ज्ञापितैः सुरैर्देवीभिश्च समन्वितः सार्धद्विशतयोजनतुङ्गं पञ्चविंशतिसहस्रयोजनविस्तृतमिन्द्रध्वजभूषितं विमानमारुह्य भगवद्दर्शनोत्सुको **मेरु**गिरिशिखरमाससाद । **नागेन्द्रो भूतानन्द**श्चाऽपि **दक्षा**ख्यचमूपतिना **मेघस्वरा**घण्टावादनाज्ज्ञापितैर्देवैः समन्वितो विमानमारुह्य **मन्दरा**चलं जगाम ।

तथा **विद्युत्कुमाराणा**मिन्द्रौ **हरि-हरिसहौ**, **सुपर्णकुमारा**णामिन्द्रौ **वेणुदेव-वेणुदारिणौ**, **अग्निकुमारे**न्द्राव**ग्निशिखाग्निमाणवौ, समीरणकुमारे**न्द्रौ **वेलम्ब-प्रभञ्जनौ, स्तनितेन्द्रौ सुघोष-महाघोषौ, उदधिकुमारेन्द्रौ जलकान्त-जलप्रभौ, द्वीप-कुमारेन्द्रौ पूर्ण-विशिष्टौ, दिक्कुमारेन्द्रावमितामितवाहनौ, व्यन्तरेषु पिशाचेन्द्रौ काल-महाकालौ, भूतेन्द्रौ सुरूप-प्रतिरूपौ, यक्षेन्द्रौ पूर्णभद्र-माणिभद्रौ, राक्षसेन्द्रौ भीम-महाभीमौ, किन्नरेन्द्रौ किन्नर-किंपुरुषौ, किंपुरुषेन्द्रौ सत्पुरुष-महापुरुषौ, महोरगेन्द्रावतिकाय-महाकायौ, गन्धर्वेन्द्रौ गीतरति-गीतयशसौ**, तथा व्यन्तराष्टनिकायेष्व**प्रज्ञप्तीना**मिन्द्रौ **सन्निहित-समानकौ**, **पञ्चप्रज्ञप्तीना**मिन्द्रौ **धातृ-विधातारौ**, **ऋषिवादितका**नामिन्द्रा**वृषि-ऋषिपालकौ**, **भूतवादिता**नामिन्द्रावी**श्वर-महेश्वरौ, क्रन्दितेन्द्रौ सुवत्सक-विशालकौ, महाक्रन्दितेन्द्रौ हास-हासरती, कुष्माण्डेन्द्रौ श्वेत-महाश्वेतौ, पावकेन्द्रौ पवक-पवकपती, ज्योतिष्काणा**मसङ्ख्यातौ **चन्द्राऽऽदित्यौ** चेति शक्राणां चतुष्षष्टि**र्मेरु**गिरावाजगाम ।

अथाऽ**च्युतेन्द्रेण** "जिनजन्माभिषेकोपकरणान्यानयन्त्वि"-त्यादिष्टा आभियोगिकाः सुराः क्षणादुत्तरपूर्वदिशि किञ्चिदपक्रम्य वैक्रियसमुद्घातेनोत्तमपुद्गलानाकृष्य सुवर्ण-रजत-रत्नादिमयान् प्रशस्यान्

कलशान् प्रत्येकमष्टोत्तरसहस्रं विचक्रुः । प्रत्येकं कलशसङ्ख्यातान् स्वर्णादिमयान् भृङ्गार-दर्पण-रत्नकरण्ड-सुप्रतिष्ठक-स्थाल-पात्रिका-पुष्पचङ्गेरिकादींश्च विकृत्येन्द्राग्रे ढौकयामासुः । तथा ते आभिगोयिका देवास्तान् कलशानादाय **क्षीरो**दधौ वारि-कमलादीनि, **पुस्करोदे** कमलानि, **भरतैरावता**दीनां **मागधा**दितीर्थेषु जलानि प्रशस्तमृत्तिकां च, **गङ्गा**दीनां महानदीनामुदकानि, **क्षुद्रहिमवद्**गिरौ सिद्धार्थपुष्प-कषायगन्धान् सर्वौषधींश्च, **पद्महूदे** सुगन्धीनि पवित्राणि निर्मलानि जलानि कमलानि च, अन्य**वर्षधर**पर्वतेभ्योऽपि जलादीनि, अखिल-क्षेत्र-वैताढ्य-विजयेषु **वक्षारक**गिरि-**देवोत्तरकुरु**षु **भद्रशाल-नन्दन-सौमनस-पाण्डका**दिवनेषु च जल-कमल-गोशीर्षचन्दना-दीनि च गृहीत्वा मेलयित्वा च शीघ्रं **मेरु**शिखरं समाजग्मुः ।

तत **आरणाच्युतकल्पेन्द्रो** दशसहस्रसामानिकदेवैस्तच्चतु-र्गुणात्मरक्षैस्त्रयस्त्रिंशत्त्रायस्त्रिंशैस्तिसृभिः परिषद्भिश्चतुर्भिर्लोकपालैः सप्तभिर्महानीकैः सप्तभिरनीकैश्च परिवारितः शुचिर्जिनं स्नपयितुं समुपास्थित । सुगन्धिना प्रचुरधूपधूमेन धूपायित्वा जिनस्य पुरतो विकसितकल्पतरुपुष्पाञ्जलिं मुमोच । ततो देवैः समानीतान् गन्धजलपूरितान् माल्यसमन्वितान् कुम्भान् ससामानिकदेवोऽ**च्युतेन्द्रः** समादाय स्वशिरःकलशांश्च मनाग् नमयन् जिनं स्नपयितुमारेभे । तदा च केचन पटहान्, दुन्दुभीन्, कांस्यतालानि, भेरीर्गोशृङ्गाणि, मुरजान्, झल्लरीः, शङ्खांश्च वादयन्ति स्म । चारणश्रमणाश्च जयजयारावं चक्रुः । ततोऽ**च्युतेन्द्रो** देवैः सह स्तुतिं पठित्वा जिनमूर्धनि कुम्भान् प्रलोठयामास । भूम्यप्राप्तमेव च जिनस्नात्रजलं केचन जगृहुः, इदं भूयः क्व प्राप्स्यते ? इति मूर्धनि चिक्षिपुश्च । एवं पुनः पुना रिक्तभरितैः कुम्भकोटिभिः स्नात्रं विधायाऽ**च्युतेन्द्रो** दिव्यगन्धद्रव्येण जिनाङ्गं प्रमार्जयामास ।



अथाऽऽभियोगिकदेवोपनीतनानाविधपात्रस्थगोशीर्षचन्दनद्रव-कर्दमैश्च विलेपयितुमारेभे । तदा च केचनोत्तरासङ्गधारिणो देवा उद्दामधूपाग्निपाणयस्तस्थुः । केऽपि तत्र धूपद्रव्यं चिक्षिपुः । केऽपि श्वेतातपत्रं धारयामासुः । केचिच्चामराणि वीजयामासुः । केचिच्च बद्धपरिकराः स्वं स्वमायुधमादाय जिनं परितस्तस्थुः । केचिच्च मणि-स्वर्णव्यजनानि वीजयामासुः । केचिच्च हर्षप्रकर्षाद् दिव्यनाना-विधपुष्पवृष्टिमकार्षुः । केचिच्च नितान्तसुरभिं गन्धद्रव्यचूर्णं जिनं परितो वर्षयामासुः । एवं केचित् स्वर्णवृष्टिं, केचिच्च रत्नवृष्टिं चक्रुः। केचिच्च स्वामिनं नवनवैर्ग्रामरागैर्जगुर्वाद्यानि वादयामासुश्च । केचिच्च नाट्यं प्रवर्त्तयामासुः । केचिच्च नानाविधक्रीडा रासहल्लीसकादीनि च चक्रुः । तथाऽ**च्युतेन्द्रो** विलेपनं कृत्वा विकासिभिः कल्पतरुकुसुमै-र्भक्त्या जिनेश्वरं पूजयामास । ततः किञ्चिदपसृत्य नम्रो जिनेश्वरं ननाम तुष्टाव च । एवमन्येऽपि द्वाषष्ठिः शक्रा अनुज्येष्ठं जिनेश्वरस्य स्नात्रा-ऽङ्गराग-पूजा वितेनुः ।

तत **ऐशानेन्द्र** आत्मानं पञ्चधा विकृत्य जिनमेक उत्सङ्गेऽकरोत् । अन्यश्च जिनमूर्ध्नि श्वेतच्छत्रमधात् । द्वौ जिनं चामराभ्यां वीजयामासतुः । अपरश्च हस्ते शूलमुल्लालयन् जिनस्या-ऽग्रतोऽभवत् ।

अथ **सौधर्मेन्द्रो** जिनस्य चतुर्दिशं चत्वारि स्फाटिकोत्तुङ्गवृषभ-रूपाणि निरमासीत् । तेषां वृषभाणामष्टभ्यः शृङ्गेभ्य उत्पतन्तीभिः सुरासुरवधूजनैः सकौतुकं वीक्ष्यमाणाभिर्जलधाराभिर्जिनस्य स्नपनं चकार । दूरमुच्छलता च जिनस्नपनवारिणा देवानां वासांस्यार्द्राणि जातानि । एवं स्नपयित्वा चतुरोऽपि वृषभानुपसंहृत्य दिव्यवस्त्रेणाऽङ्गं प्रमार्ज्य जिनाग्रे रत्नमये पट्टेऽखण्डै रूप्यतण्डुलैरष्टमङ्गलीमालिखत् । श्रेष्ठेनाऽङ्गरागेणाऽङ्गं विलिप्य विशुद्धैर्दिव्यवासोभिः पूजां विधाय

जिनस्य शिरसि वज्रमाणिक्यमुकुटं स्थापयित्वा, कर्णयोः स्वर्णकुण्डले परिधाप्य, कण्ठे च दिव्यमौक्तिकहारं निक्षिप्य, बाहुदण्डयोरङ्गदे, मणिबन्धयोर्मौक्तिकमणिकङ्कणे, कटिदेशे स्वर्णकटिसूत्रं, पादयोर्माणिक्यपादकटके च परिधापयामास । तदा जिनाङ्गेषु निवेशितानि भूषणानि जिनाङ्गेनैव भूषितानि भान्ति स्म । ततो दिव्यकल्पतरुकुसुमैः सुभक्त्या जिनेश्वरं पूजयित्वा किञ्चिदपसृत्य जिनस्याऽग्रतो भूत्वा **सौधर्मेन्द्र**रारात्रिकं चकार । ततो भक्त्यतिशयेन शक्रो ननाम तुष्टाव च ।

ततः पूर्ववत् पञ्चधाऽऽत्मानं विकृत्य **सौधर्मेन्द्र ऐशानेन्द्रो**त्सङ्गतो जिनमादाय पूर्ववच्चामरादि गृहीत्वा च सर्वैरमरैः समन्वितो **मरुदेवा**गृहमागत्य तीर्थकृत्प्रतिबिम्बमुपसंहृत्य तत्र जिनेश्वरं मातुः समीपे स्थापयामास । तथा **मरुदेवा**या अवस्वापनिकां निद्रामपनीतवान् । ततो जिनस्य मस्तके दिव्यदुकूलद्वयं, भामण्डलभ्रमकारकं रत्नकुण्डलद्वयम्, एकं श्रीदामगण्डमुपरि जिनस्य दृष्टिविनोदाय विताने च स्थापयामास ।

अथ **सौधर्मेन्द्रो** ''हिरण्य-रत्न-स्वर्णानां द्वात्रिंशत्कोटीर्द्वात्रिंशतौ **नन्दासन-भद्रासने,** अन्यच्च मनोहरवस्त्र-नेपथ्यादि, सांसारिकसुखोत्पादि महार्घं वस्तु चाऽस्मिन् जिनभवने सर्वत्र निधेही''ति **कुबेर**मादिशत् । **कुबेर**श्च जृम्भकदेवैः सद्यस्तत्सर्वं तथैव कारयामास । ततः **सौधर्मेन्द्र** आभियोगिकदेवै**र्भवनपति-व्यन्तर-ज्योति-वैमानिकेषु** ''अर्हतस्तज्जनन्याश्च योऽशुभं चिन्तयिष्यति, तस्य शिरोऽर्जकमञ्जरीवत् सप्तधा भेत्स्यते'' इत्युच्चैर्घोषयित्वा, अर्हतां स्तन्यपानाकरणात् क्षुधोदये मुखेऽङ्गुष्ठकरणाच्च जिनाङ्गुष्ठे नानाहाररसामृतं सङ्क्रमय्य, जिनस्य धात्रीकर्माणि कर्तुं पञ्चाऽप्सरसो धात्रीरादिदेश ।

तदा च बहवो देवा जिनस्नात्रानन्तरं **सुमेरु**शिखरादेव **नन्दीश्वरं** ययुः । **सौधर्मेन्द्रो**ऽपि जिनसदनाद् **नन्दीश्वर**द्वीपं जगाम । तत्र



**क्षुद्रहिमवत्**प्रमाणे **देवरमणेऽञ्जनाद्रा**ववतीर्य चतुर्द्वारे चैत्ये प्रविश्य **ऋषभ**प्रभृतीः शाश्वतीरर्हत्प्रतिमा अष्टाह्न्यारम्भपूर्वकं पूजयामास । तस्याऽद्रेश्च चतुर्दिक्स्थमहावापीमध्यवर्त्तिषु स्फाटिकेषु चतुर्ष्वपि **दधिमुख**पर्वतेषु चैत्येषु चत्वारः शक्रदिक्पालाः शाश्वतीनामर्हत्प्रतिमानामष्टाह्निकोत्सवं चक्रुः । **ईशानेन्द्र**श्चोत्तरदिक्स्थे **रमणीया**ख्येऽ**ञ्जना**चलेऽवतीर्य चैत्ये शाश्वतार्हत्प्रतिमानामष्टाह्निकोत्सवं चकार । तद्वत् तल्लोकपाला अपि तद्वापी**दधिमुख**पर्वतेषु शाश्वतार्हत्प्रतिमोत्सवं चक्रुः । तथा **चमरेन्द्रो** दक्षिणदिक्स्थे **नित्योद्योता**ख्येऽ**ञ्जना**चले, तद्दिक्पालाश्च तद्वाप्यन्त**र्दधिमुखा**चलेषु, **बलीन्द्र**श्च पश्चिमदिक्स्थे **स्वयम्प्रभा**ख्येऽ**ञ्जना**चले, तद्दिक्पालाश्च तद्वाप्यन्तःस्थ**दधिमुखा**द्रिषु शाश्वतार्हत्प्रतिमानामष्टाह्निकोत्सवं चक्रुः । इत्थं **नन्दीश्वरे** चैत्यमहिमानं विधाय सर्वे सुरा यथागतेन पथा स्वं स्वं स्थानं ययुः ।

अथ प्रबुद्धा **मरुदेवा** नैशं स्वप्नमिव **नाभ**ये देवागमनमचकथत् । जिनस्योरुप्रदेशे स्वप्ने मात्रा दृष्टो वृषभो लाञ्छनमिति पितृभ्यामुत्सवपुरःसरं **ऋषभ** इति यथार्थं नाम चक्रे । तथा युगलिकतया सहजातायाः कन्याया अपि ''**सुमङ्गले**''ति यथार्थं नाम चक्रे । जिनश्च क्षुधोदये निजाङ्गुष्ठे शक्रसङ्क्रमितां सुधां यथाकालं पिबति स्म । तथा स पितुरुत्सङ्गे शिखरिण उत्सङ्गे सिंहकिशोर इव शुशुभे । शक्रादिष्टास्ताः पञ्च धात्र्यश्च जिनेश्वरं न कदाऽपि मुमुचुः ।

❀ ❀ ❀

अन्यदा जिनस्य जन्मनः किञ्चिदूने संवत्सरे जाते सति **सौधर्मेन्द्रो** वंशस्थापनार्थं ''भृत्येन रिक्तहस्तेन स्वामिदर्शनं न कार्य''मिति विचार्य महतीमिक्षुयष्टिमादाय **नाभ्यु**त्सङ्गस्थितस्य जिनस्याऽग्रतः समुपाजगाम । जिनश्चाऽवधिज्ञानतः शक्रसङ्कल्पं ज्ञात्वा तामिक्षुयष्टिमादातुं करं लम्बयामास । ततः शक्रः प्रणम्य जिनाय

तामिक्षुयष्टिं समर्प्येक्षुग्रहणादि**क्ष्वाकु**रित्याख्यया जिनवंशं प्रतिष्ठाप्य दिवं ययौ ।

जिनस्य जन्मत एव देहः स्वेद-रोगादिरहितः सुगन्धिः, मांस-शोणिते च धवले अविस्रे च, आहार-नीहारक्रिया चाऽदृश्या, श्वासश्च कुमुदगन्धिरित्येते चत्वारोऽतिशया बभूवुः । तथा वज्रर्षभ-नाराचसंहननं, गम्भीरमधुरध्वनिः, संस्थानं समचतुरस्रं च बभूव । स च वयस्यीभूयाऽऽगतैः सुरकुमारैः सह रममाणो धूलिधूसराङ्गो-ऽन्तर्मदावस्थः करिशावक इव बभौ । जिनेन पाणिना गृहीतं वस्तु च देवोऽप्याच्छेत्तुं समर्थो न जातः । बलपरीक्षार्थं च तस्याऽङ्गुलिग्राहक-स्तच्छ्वासपवनोत्क्षिप्तो दूरं ययौ । तथा देवकुमारैः सह कन्दुकादि-क्रीडां कुर्वन् धात्रीभिः सावधानं लाल्यमाश्च जिनः क्रमेण ववृधे । तथाऽङ्गुष्ठपानावस्थामतिक्रम्य वयःस्था अपरे जिना गृहवासे सिद्धान्न-भोजनाः, स प्रथमो जिनो देवानीतो**त्तरकुरु**फलानि बुभुजे **क्षीरोदधि**-वारि च पपौ ।

अथ बाल्यात् परतो द्वितीये वयसि जिनस्य मृदू रक्तावुष्णाव-कम्प्रावस्वेदौ समतलौ चक्र-माल्या-ऽङ्कुश-ध्वजरेखायुक्तौ च पादौ, पादतले शङ्ख-कुम्भमुद्रे, पार्ष्णौ स्वस्तिकः, अङ्गुष्ठो मांसलो वर्त्तुलस्तुङ्गश्च, नीरन्ध्रा ऋजवश्चाऽङ्गुल्यः, पदाङ्गुलितलेषु नन्द्यावर्त्ताः, अङ्गुलिपर्वसु च यवाः, पार्ष्णिर्वृत्तायतः पृथुश्च, पादाङ्गुष्ठादिनखाश्च मणितुल्याः, गुल्फौ गूढौ वृत्तौ च, पादोपरिप्रदेशश्च कूर्मवदुन्नतो लोमरहितश्च, जङ्घे क्रमवर्तुले गौरवर्णे च, जानुनी मांसले वर्त्तुले च, ऊरू कदलीस्तम्भवद् मृदुलौ स्निग्धौ क्रमपीवरौ च, मुष्कौ च गूढौ समस्थिती च, वाजिनः कुलीनस्येव पुंश्चिह्नमतिगूढं, कटिरायता मांसला स्थूला विशाला कठिना च, मध्यभागस्तनुः, नाभिर्गम्भीरा, कुक्षी स्निग्धौ मांसलौ सरलौ कोमलौ च, वक्षःस्थलं पृथुलमुन्नतं श्रीवत्सरत्नपीठाङ्कं,



स्कन्धौ दृढौ पीनावुन्नतौ च, कक्षे गन्धस्वेदमलरहिते अल्परोमणी उन्नते च, भुजावाजानुलम्बिनौ पीनौ च, पाणी रक्तौ कोमलौ स्वेदरहितौ निश्छिद्रावुष्णौ दण्डचक्रादिलक्षणयुक्तौ च, पाण्यङ्गुष्ठादयो रक्ताः सरलाश्च, अङ्गुष्ठपर्वसु यवाः, अङ्गुल्यग्रेषु च प्रदक्षिणावर्त्ताः शङ्खाः, मणिबन्धे च तिस्रो रेखाः, कण्ठो वर्त्तुलोऽनतिदीर्घो रेखात्रयाङ्कितश्च, मुखं वर्त्तुलं कान्तिमत् स्वच्छं च, कपोलौ मसृणौ मांसलौ स्निग्धौ च, ओष्ठौ बिम्बवद् रक्तौ, दन्ता द्वात्रिंशत् श्वेताश्च, नासिका च क्रमविशाला क्रमोत्तुङ्गवंशा च, चिबुकं कोमलं वर्त्तुलं मांसलमह्रस्वदीर्घं च, कर्णौ स्कन्धा-वलम्बिनावन्तरावर्त्तौ च, जिह्वा प्रवालारुणा कोमलाऽनतिस्थूला च, पक्ष्माणि कज्जलश्यामानि, भ्रुवौ कुटिले श्यामले च, भालस्थलं विशालं वृत्तं मांसलं समं मसृणं कठिनं च, मौलिश्छत्रवत् क्रमसमुन्नतो वृत्तोत्तुङ्गोष्णीषविभूषितश्च, केशाः कुञ्चिताः कोमलाः स्निग्धाश्च, त्वक् च गौरवर्णा स्निग्धस्वच्छा, तनौ लोमानि च मृदूनि श्यामानि सूक्ष्माण्यद्वितीयोद्गमानि चेत्येतैरसाधारणैर्लक्षणैर्लक्षितः स रत्नै रत्नाकर इव सर्वस्य सेव्यो बभूव ।

तादृशः स **महेन्द्रे**ण दत्तहस्तावलम्बो यक्षैर्वीजितचामरो **धरणेन्द्र**कृतद्वारपालत्वो **वरुणे**न धृतच्छत्रो 'जीव जीवे'ति वादिभिर्देवैः परिवृतो निर्गर्विस्वभावो यथासुखं विजहार । तथा देवानीतासनोपविष्टो **बलीन्द्रा**ङ्कस्थापितचरण**श्चमरेन्द्रा**ङ्कस्थापितोत्तराङ्गः शाटकाञ्चलहस्ता-भिरप्सरोभिरुभयत उपास्यमानोऽनासक्तः सन् दिव्यं सङ्गीतादि प्रेक्षितवान् ।

अथैकदा बालक्रीडां कुर्वन्तौ कावपि युगलिकौ तालवृक्षतलं गतौ । तदैव च दैवात् तालफलं पुरुषमूर्धन्यपतत् । तेन च ततः पूर्वं कस्याऽप्यपमृत्स्वभावात् प्रथमेनाऽपमृत्युना काकतालीयन्यायेन हतः स बालोऽल्पकषायत्वाद् दिवं जगाम । पुरा मृतमिथुनशरीराणां

महाखगैरम्बुधिक्षेपणेऽपि तदानीमवसर्पिण्या भ्रश्यमानस्वभावत्वात् तच्छरीरं तथैव तस्थौ । ततोऽवशिष्टां बालिकां तज्जनकौ युगलिकौ पालयामासतुः, "**सुनन्दे**"ति नाम चक्रतुश्च । ततः कतिपयैर्दिनैः पित्रयोर्मृत्योः सतोः किंकर्त्तव्यविमूढां सर्वाङ्गेषु शुभलक्षणयुक्तामसाधारणसुन्दरीं तां **सुनन्दा**मेकाकिनीं वने भ्राम्यन्तीं मुग्धामवलोक्य युगलिकाः किंकर्त्तव्यविमूढाः सन्तो **नाभि**समीपमुपानीतवन्तः । "एषा **ऋषभ**नाथस्य धर्मपत्नी भवत्वि"ति कृत्वा **नाभि**स्तां प्रतिजग्राह ।

अस्मिन्नेवाऽवसरे शक्रोऽवधिज्ञानतो जिनस्य विवाहसमयं ज्ञात्वा समागत्य प्रणम्य पुरतः स्थित्वा च बद्धाञ्जलिः-"वीतरागेणाऽपि भवतैव मोक्षमार्ग इव लोकव्यवहारमार्गोऽपि प्रकटयिष्यते इति लोकव्यवहाराय भवता विधीयमानं पाणिग्रहमहोत्सवं द्रष्टुमिच्छामि, तत्स्वानुरूपे रूपवत्यौ देव्यौ **सुमङ्गला-सुनन्दे** उद्वोढुमर्हती"ति व्यजिज्ञपत् । जिनोऽपि पूर्वलक्षाणां त्र्यशीतिं यावदवश्यभोक्तव्यं कर्माऽवधिना ज्ञात्वा शिरः कम्पयन्नधोमुखस्तस्थौ । ततो जिनस्याऽभिप्रायमुपलक्ष्य शक्रो विवाहकर्मारम्भाय देवानजूहवत् ।

ततः शक्राज्ञयाऽऽभियोगिका देवाः स्वर्ण-माणिक्य-रजतस्तम्भैः सुवर्णकुम्भैः सुवर्णवेदिकाभिर्मणिभित्तिभिः पाञ्चालिकाभिः सतोरणस्फाटिकद्वारैरार्द्रवंशैरुल्लोचैश्च मनोहरं मण्डपं रचयामासुः ।

ततो **रम्भा**द्या अप्सरसो विवाहसामग्रीं सम्पाद्य मङ्गलस्नानार्थं **सुमङ्गलां सुनन्दां** चाऽऽसने समुपवेश्य सुगन्धितैलेन तयोः सर्वाङ्गमभ्यज्य पिष्टातकैरुद्वर्त्य पुनरन्यस्मिन्नासने समुपवेश्य सुवर्णकुम्भोदकैः स्नपयामासुः । ततो गन्धकाषाय्याऽङ्गप्रमार्जनं विधाय, केशान् सूक्ष्मवस्त्रेण वेष्टयित्वा, क्षौमाणि वस्त्राणि परिधाप्य, पुनरासनान्तरे समुपवेश्य, निर्गलितजलानीषदार्द्रान् तयोः कुन्तलान् दिव्यधूपेन धूपायित्वा



पादानलक्तकरसेनाऽमण्डयन् ताः ग्रीवाभुजादिषु पत्रलतां लिखित्वा ललाटे तिलकं विधाय, नेत्राण्यञ्जयित्वा, समाल्यं धम्मिल्लं बद्ध्वा, पारिणेत्राणि वस्त्राणि परिधाप्य शिरसि मणिकिरीटौ न्यस्य कर्णाद्यवयवेषु मणिमयकुण्डलाद्याभरणानि विनिवेश्य तत आसनादुत्थाप्य मातृकागृहस्थकाञ्चनासने तौ समुपवेशयामासुः ताः ।

अथ शक्रेण विवाहार्थं सज्जीभवनाय विज्ञापितो जिनो "लोके स्थितिर्दर्शनीया, भोग्यकर्म भोक्तव्यं चे"ति चिन्तयित्वा तद्वचोऽमन्यत । ततः शक्रो जिनं स्नपयित्वा, भूषणादि परिधाप्य, देवीषु मङ्गलानि गायन्तीषु, वाद्येषु गन्धर्वैर्वाद्यमानेषु च दिव्ययानेन मण्डपद्वारमानीतवान् । तत्र यानादवतीर्य जिनः शक्रेण दत्तबाहुरतिष्ठत् ।

स्त्रियश्च द्वारि लवणानलगर्भं शरावसम्पुटं मुक्त्वा दूर्वादिमङ्गल्यद्रव्यसहितं रूप्यस्थालं पुरतः स्थापयित्वा जिनाय वरायाऽर्घं ददुः । ततो जिनस्य भालं मन्थानेन त्रिः स्पृष्ट्वा शरावसम्पुटं च तेन पदा दलयित्वा कण्ठे प्रक्षिप्तेन कौसुम्भवस्त्रेणाऽऽकृष्यमाणं जिनं मातृकागृहमुपनीतवत्यः । तत्र च वधू-वराणां हस्तेषु मदनफलोपशोभितं हस्तसूत्रं बबन्धुः । ततो मातृकादेवीनामग्रतः काञ्चनासने जिनं समुपवेश्य शम्यश्वत्थत्वचौ पिष्ट्वा तयोः कन्ययोः पाणौ हस्तालेपं विदधुः । ततो जिनः शुभलग्नोदये हस्ताभ्यां हस्तालेपयुतौ तयोः कन्ययोर्हस्तावग्रहीत्। ततः शक्रः कन्याहस्तस्थहस्तालेपान्तरूर्मिकां चिक्षेप । ततस्तारामेलकविधौ वधू-वराणां नेत्राणि मनांसि च परस्परमयुज्यन्त । तदानीं च सामानिकादयो देवा अनुचरीभूय जिनस्य पार्श्वेषु तस्थुः । पार्श्वस्था नर्मचतुराः स्त्रियश्च कौतुकधवलान् जगुः । जिनश्च "लोकेषु व्यवहारोऽयं दर्शनीय" इति तदुपेक्षितवान् ।

ततः शक्रो जिनस्याऽञ्चलौ वध्वोरञ्चलाभ्यां बबन्ध । कट्यां जिनमारोह्य च भक्त्या वेदिगृहं प्रत्यचलत् । वध्वावपीन्द्राणीभ्यां

कट्यामारोह्य जिनेन समं योजितकराग्रे चालिते । तथा पूर्वद्वारेण वेदिगृहं विविशुश्च । तत्र च कोऽपि त्रायस्त्रिंशसुरो वेदिकुण्डे वह्निमाविश्चकार । तत्र समिधो निक्षेपाच्च धूमलेखा दिवं व्याप्तवती । जिनश्च **सुमङ्गला-सुनन्दा**भ्यां सह तमग्निं परितो भ्राम्यन्नष्टमङ्गलीं पूरयामास । ततः शक्रो मङ्गलगीतपुरस्सरं करमोक्षणमञ्चलमोक्षणं च कारयामास । तदानीं च जिनविवाहोत्सवहर्षात् तत्र सभार्यः शक्रोऽन्येऽपि च देवा ननर्तुः, गन्धर्वाश्च जगुः । ततो जिनस्ताभ्यां वधूभ्यामुभयपार्श्वस्थाभ्यां सह दिव्ययानाधिरूढः स्वस्थानमगमत् । शक्रादयश्च जिनं नत्वा स्वस्थानं जग्मुः । ततः प्रभृति च जिनप्रदर्शितः स विवाहविधिः परार्थमपि प्रावर्त्तत । जिनोऽपि सद्वेदनीयस्याऽपि कर्मणोऽन्यथा क्षयाभावात् पत्नीभ्यां सहाऽनासक्तो भोगान् बुभुजे ।

अथ विवाहानन्तरं किञ्चिदूनेषु षट्सु पूर्वलक्षेषु व्यतीतेषु **बाहु-पीठ**जीवौ **सर्वार्थसिद्धि**तश्च्युत्वा **सुमङ्गला**देव्याः कुक्षौ युग्मत्वेनाऽवातेरतुः। **सुबाहु-महापीठ**जीवौ च **सर्वार्थसिद्धि**तश्च्युत्वा **सुनन्दा**-कुक्षाववातेरतुः । तदैव च **मरुदेवी**व **सुमङ्गला** स्वप्ने चतुर्दश-महास्वप्नान् दृष्ट्वा स्वामिनेऽकथयत् । जिनश्च ''चक्रवर्त्ती तव पुत्रो भविष्यती''त्युदतरत् । ततः **सुमङ्गला भरत-ब्राह्म्या**वपत्ये **सुनन्दा** च **बाहुबलि-सुन्दर्या**वपत्ये सुषुवाते । **सुमङ्गला** चाऽपरानपि एकोनपञ्चाशतं युगलिकानसूत । जिनश्च तैरपत्यैः परिवृतो भूरिभिः शाखाभिर्महाशाखीव शुशुभे ।

❀ ❀ ❀

तदा च कालप्रभावेण कल्पतरवः प्रभावहीना जाताः । युगलिकाश्च सकषायाः सन्तः पूर्वोक्तदण्डनीतित्रयमत्यलङ्घयन् । ततस्ते युगलिका मिलित्वा **ऋषभ**नाथं तदनिष्टं विज्ञपयामासुः । ज्ञानत्रयधरो जातिस्मरो जिनश्च ''मर्यादाभञ्जकानां शासिता राजा भवति, स चाऽत्युच्च आसने प्रथममभिषिक्तश्चतुरङ्गबलोपेतोऽखण्ड-शासनो भवती''त्युक्तवान् । तैश्च तादृशस्याऽन्यस्याऽभावात् त्वमेवाऽस्माकं राजा भवेति प्रार्थितो जिनो ''**नाभिं** कुलकरश्रेष्ठं प्रार्थयत, स राजानं दास्यती''त्युदतरत् । ततस्तैः प्रार्थितेन **नाभि**ना ''**ऋषभो** भवतां राजे''ति कथितास्ते युगलिकाः प्रमुदिताः समागत्य ''**नाभि**ना त्वमेवाऽस्माकं राजाऽर्पितोऽसी''ति **ऋषभ**नाथमूचिरे । तत **ऋषभ**-नाथाभिषेकार्थं जलाय युगलिका ययुः ।



शक्रश्चाऽऽसनकम्पनात् प्रभो राज्याभिषेकसमयमवधिना ज्ञात्वा तत्राऽऽययौ । ततः **सौधर्मेन्द्रः** काञ्चनवेदिकां निर्माय तत्र सिंहासनं निधाय देवानीतैस्तीर्थजलैः **ऋषभ**स्वामिनो राज्याभिषेकं चकार । ततो दिव्यवस्त्राणि परिधाप्य किरीटादीनि रत्नालङ्करणानि प्रभोरङ्गेषु यथास्थानं निवेशितवान् । अत्राऽन्तरे कमलपत्रैर्जलानि गृहीत्वा समागता युगलिका अर्घमादाय भूषितं प्रभुं दृष्ट्वा स्थिताः ''दिव्य-वेषस्य प्रभोः शिरसि क्षेप्तुं न युक्त''मिति पादयोर्जलं चिक्षिपुः । तेन ''इमे साधु विनीता'' इति शक्रः **कुबेरं विनीता**ख्यां पुरीं निर्मातुमा-दिश्य दिवं ययौ । ततः **कुबेरो** द्वादशयोजनदीर्घां नवयोजनविस्तृता-**मयोध्ये**त्यपराख्यां **विनीतां** पुरीं निर्माय तामक्षय्यवस्त्र-नेपथ्य-धन-धान्यैः पूरयामास ।

तदा प्रभुर्जन्मतः पूर्वलक्षाणां विंशतौ गतायां तस्यां नगर्यां नृपाणां प्रथमः प्रजाः पालयितुं नृपो बभूव । निजान्यपत्यानीव प्रजाः पालयामास च । तथाऽसाधुशासने साधुपालने च निपुणान् मन्त्रिणश्चौर्यादिरक्षणे दक्षानारक्षांश्च नियुज्य, राज्ये स्थित्यै सेनाया उत्कृष्टान्यङ्गानि हस्तिनस्तुरगान् रथान् पत्तींश्च परिगृहीतवान् । तत्र च नवसाम्राज्यसौधस्य स्तम्भानिव बलीयसः सेनापतीन् स्थापयामास । गवादींश्चाऽपि तदुपयोगज्ञः प्रभुः परिगृहीतवान् ।

तदा च जनाः कल्पद्रुमेषु समुच्छन्नेषु सत्सु कन्दमूलादीनि बुभुजिरे । तृणवत् स्वयमुत्पन्नाः शालि-गोधूमादयोऽपक्वैव तैः खादिता इति तस्मिन्नाहारेऽजीर्यति तैर्विज्ञप्तः प्रभु"र्हस्तैस्तान् मृदित्वा त्वचयित्वा च खादते"त्यादिशत् । तथाकृतेऽपि कठिनत्वात् तस्मिन्नाहारेऽजीर्यति पुनस्तैर्विज्ञप्तः प्रभुः "पाणिभिः सङ्घृष्य जलैरार्द्रीकृत्य पत्रपुटे धृत्वा खादते"त्यादिशत् । तथाकृतेऽपि तस्मिन्नजीर्यति तैः पुनर्विज्ञप्तः प्रभुः "पूर्वोक्तविधिं विधाय मुष्टौ निधायाऽऽतपे कक्षयोः क्षिप्त्वा खादते"त्यादिशत् । तथाकृतेनाऽप्य-जीर्णेनाऽऽहारेण जनेषु पीडितेषु सत्सु वृक्षसमूहे मिथः शाखाघर्षणात् समुत्थितेन तृण-काष्ठादीन् दहताऽग्निना दीप्ररत्नभ्रमेण गृह्यमाणेन दह्यमानास्ते भीताः प्रभुमुपेत्य नूतनं किमपि वस्तु समुद्भूतमित्यूचिरे। ततश्च प्रभुः "स्निग्धरूक्षकालभावादेषोऽग्निरुत्पन्नः, एकान्तरूक्षे एकान्तस्निग्धे च नाऽस्य सम्भवः, यूयमस्याऽग्नेः पार्श्वतः स्थित्वा समीपस्थं तृणादिकमपसार्य पश्चात् तद् गृहित्वा तत्र पूर्वोक्तविधिना साधिताः शालि-गोधूमाद्यौषधीः क्षिप्त्वा पक्त्वा च खादते"-त्येवमादिशत् । तथाकृते सर्वास्वोषधिषु वह्निना दग्धासु सतीषु मुग्धास्ते पुनरागत्य प्रभुं विज्ञपयामासुः-"प्रभो ! एषोऽग्निर्बुभुक्षितः सर्वा ओषधीः स्वयमेवाऽत्ति, न किञ्चिदप्यस्मभ्यं ददाति" ।

तदानीं गजस्कन्धारूढः प्रभुस्तैरार्द्रं मृत्तिकापिण्डं समानाय्य गजकुम्भे तन्निधाय पाणिना तत्र तद् विस्तार्य तदाकारं शिल्पानां प्रथमं पात्रं चक्रे । ततः प्रभुः "यूयमप्येवमपराण्यपि पात्राणि विधाय तान्यग्नेरुपरि स्थापयित्वौषधीः पक्त्वा खादते"त्येवमुक्तवान् । ततश्च प्रभोराज्ञया तादृशपात्रनिर्मातारः कारूणां प्रथमे कुम्भकारा जाताः । ततश्च प्रभुर्गृहाद्यर्थं वर्धकिनं, लोकानां क्रीडावैचित्र्यार्थं गृहादिषु चित्र-निर्माणाय चित्रकारं, वस्त्रार्थं कुविन्दान्, नखादिवृद्ध्या जने पीडिते



सति नापितांश्चाऽपीति पञ्च शिल्पिनो व्यधात् । तानि च पञ्चाऽपि शिल्पानि प्रत्येकं विंशतिभेदाल्लोके शतधा प्रवृत्तानि । तथा प्रभु-र्लोकानां जीविकार्थं तृणहार-काष्ठहार-कृषि-वाणिज्यकानि कर्माणि, जगद्व्यवस्थार्थं साम-दान-दण्ड-भेदाख्योपायचतुष्टयं चाऽकल्पयत् ।

तत **आदिनाथो भरतं** द्वासप्ततिकलाकाण्डमध्यापयत् । **भरतो**ऽपि तत् स्वसोदरान् सम्यगध्यापयत् । तथा प्रभु**र्बाहुबलि**नं हस्त्यश्व-स्त्री-पुंसानामनेकविधानि लक्षणानि बोधितवान् । **ब्राह्म्या** दक्षिणेन पाणिनाऽष्टादशलिपीः, **सुन्दर्याः** सव्येन पाणिना गणितं च दर्शयामास । तथा मानोन्मानप्रमाणानि वस्तुषु प्रतिमानानि पोतान् प्रोतान् मण्यादींश्च प्रावर्त्तयत् । तथा राजा-ऽध्यक्ष-कुलसाक्षिभिर्वादि-प्रतिवादिनां तदादिष्टो व्यवहारः प्रावर्त्तत । ततः प्रभृति च गजादिनां पूजा, धनुर्वेदश्चिकित्सोपासना रणोऽर्थशास्त्रं बन्ध-घात-वध-गोष्ठ्यः, "असौ मम माता, पिता, धनं, गृहमित्यादिरूपा ममता च लोके समजायन्त । विवाहे प्रभुं प्रसाधितमलङ्कृतं च दृष्ट्वा लोका अपि स्वं ततः परं तथा चक्रुः । प्रभोर्विवाहात् प्रभृत्येव च पाणिग्रहण-चूडाकरणो-पनयनादिव्यवहारा लोके प्रवृत्ताः । एते च सर्वे सावद्या अपि लोकव्यवहारा लोकानुकम्पया स्वकर्त्तव्यज्ञः स्वामी प्रवर्त्तयामास। **आदि**जिनाम्नाता एव कलादयोऽर्वाचीनैर्बुद्धिमद्भिः शास्त्ररूपेण निबद्धाः । प्रभोः शिक्षया चाऽखिलो लोको दक्षोऽभूत् । तथा प्रभुः "आरक्षपुरुषा उग्राः, मन्त्र्यादयो भोगाः, स्वसमानवयसो राजन्याः, अवशिष्टाः क्षत्रिया" इत्येवं जनान् चतुर्धाऽकल्पयत् । एवं प्रभुर्नवां व्यवहारव्यवस्थां कल्पयित्वा राज्यश्रियं बुभुजे ।

स प्रभुर्यथापराधं दण्डनीयेषु दण्डं प्रायुङ्क्त । यतो दण्डभीता लोकाश्चौर्यादिकं न चक्रुः । क्षेत्रादीनां मर्यादां कोऽपि कस्याऽपि नाऽत्यक्रामत् । मेघश्च सस्यार्थं कालेऽवर्षत् । तदानीं जनपदाः सस्य-

क्षेत्रो-द्यान-गोकुलादिभिः सम्पन्ना आसन् । प्रभुणा कृतहिताहितप्राप्ति-परिहारविवेकज्ञैर्लोकैः**भरत**क्षेत्रं **विदेह**क्षेत्रतुल्यं जातम् । एवं पृथ्वीं परिपालयत्**यादि**जिनेश्वरे राज्याभिषेकात् प्रभृति त्रिषष्टिपूर्वलक्षाणि व्यतीतानि ।

अथैकदा प्रभुर्मधुमासे समागते परिवारानुरोधत उद्यानमगात् । तत्र पुष्पवासगृहे पुष्पाभरणभूषितो मूर्त्तः पुष्पमास इवाऽऽसाञ्चक्रे । तत्र गुञ्जद्भिर्भ्रमरैः, कूजद्भिः कोकिलैः, पुष्प-फलसम्पदुपशोभितैश्च लतावृक्षादिभिरतिमनोहर उद्याने स्त्रियः पुष्पाण्यवचेतुमारभन्त । अवचितैश्च पुष्पैर्युवानो माल्यग्रथनादिक्रीडां दोलान्दोलनक्रीडां च कर्त्तुमारभन्त । एवं वसन्तोत्सवे क्रीडादिप्रवृत्तेषु पौरजनेषु सत्सु प्रभुर्दध्यौ-"किमेवंविधा क्रीडाऽन्यत्राऽपि क्वाऽपि प्रवर्त्तते ?" तदाऽवधिना ज्ञातवान्, यत् स्वर्गसुखं स्वयं भुक्तपूर्वमनुत्तरस्वर्गसुखं चोत्तरोत्तरं वर्त्तते ।

ततो विगलन्मोहबन्धनो भूयोऽप्यचिन्तयत्- "यद् विषयाक्रान्तो जन आत्महितं न वेत्ति, धिक् । अहो ? अस्मिन् संसारकूपे जीवा अरघट्टघटीन्यायेन गतागतक्रियां कुर्वन्ति । सर्वथाऽपि मुधैव मोहान्धानां प्राणिनां जन्म गच्छति । धिग् धिक् । एते च रागादयो देहिनामुदीयमानमपि धर्मं मूलादेव छिन्दन्ति । अहो ? मुग्धा जनाः क्रोधं स्वनाशकमेव वर्धयन्ति । मानिनो हि मानवा एतन्न किञ्चिद् गणयन्ति, देहिनामुपतापकरीं मायां च न त्यजन्ति, लोभेन च गुणान् दूषयन्ति । तदेते चत्वारः कषाया भवकारायां यामिकतुल्या यावत् पार्श्वस्था जाग्रति, तावन्नृणां कुतो मोक्षः ? कामासक्ताश्च देहिनो भूतगृहिता इव क्षीयमाणमात्मानं न जानते, स्वयमेव विविधैराहारै-रनर्थाय आत्मोन्माद उत्पाद्यते । यथा लोकः स्वमापातरमणीयैर्वस्तु-भिर्बालं क्रीडनकैरिव प्रतारयति, तथा वात-पित्त-कफैरिवैभिर्विषयैः



प्रबलैर्देहिनां चैतन्यं लुप्यते, धिक्"। एवं प्रभुर्यावत् संसारवैराग्य-चिन्तामग्नो बभूव तावत् **सारस्वता**दयो नवभेदा **ब्रह्मलोका**न्त-वासिनो **लोकान्तिका** देवाः समागत्य बद्धाञ्जलयो व्यजिज्ञपन्- "शक्रमुकुटप्रभाजलमग्नपादपद्म ! **भरत**क्षेत्रविलुप्तमोक्षमार्गप्रदर्शक ! नाथ ! प्रथमा लोकव्यवस्था यथा प्रवर्त्तिता तथा धर्मतीर्थं प्रवर्त्तय । निजं कृत्यं स्मर"। एवं प्रभुं विज्ञपय्य देवाः स्वस्वस्थानं जग्मुः । प्रभुरपि प्रव्रज्येच्छुर्**नन्दनो**द्यानात् स्वसदनमगमत् ।

*इति प्रथमपर्वणि ऋषभनाथजन्म-व्यवहार- राज्यस्थिति-*
*निरूपणात्मको द्वितीयः सर्गः ॥ २ ॥*

# तृतीयः सर्गः

अथ **आदि**जिनेश्वरः सामन्तादीन् **भरत-बाहुबल्या**दीन् तनयानितरांश्चाऽऽहूय ''वत्स ! नो राज्यमादत्स्व, वयमधुना संयमं ग्रहीष्याम'' इति **भरत**मवोचत् । ततो **भरतः** क्षणमधोमुखः स्थित्वा प्राञ्जलिर्नत्वा सगद्गदमेवमुवाच-''त्वत्पादपद्मसमीपस्थस्य मे साम्राज्यसम्पदाऽलं, यतस्त्वत्सेवासुखक्षीराब्ध्यपेक्षया राज्यसुखं बिन्दुव''दिति । ततः प्रभुः ''मया राज्यं त्यक्तं, पार्थिवाभावे च पृथिव्यां मात्स्यन्यायः प्रवर्त्तते । तस्मादिमां पृथिवीं परिपालय । त्वं ममाऽऽदेशकरोऽसि, ममाऽऽदेशोऽप्ययमेवे''त्युवाच । ततो विनीतो **भरतः** प्रभोः सिद्धादेशं लङ्घितुमसमर्थ 'ओम्'इत्युक्त्वा प्रभुं प्रणम्य सिंहासनमलङ्कृतवान् । प्रभोरादेशाच्चाऽमात्य-सामन्त-सेनापत्यादिभि-र्भरतस्य सूरैः प्रभोरिव राज्याभिषेकश्चक्रे । तदा **भरतः** शिरसि श्वेतच्छत्रेण पार्श्वयोश्च चामराभ्यां सुशोभितः, स्वगुणैरिवाऽत्यन्तविशदै-र्वासोभिर्मौक्तिकालङ्करणैश्चाऽलङ्कृतो, महामहिमसम्पन्नो राजवृन्देन सह स्वकल्याणेच्छया प्रभुं नमश्चक्रे । ततः प्रभु**र्बाहुबलि**प्रमुखपुत्रेभ्योऽपि यथोचितं देशान् विभज्य ददौ ।

अथ प्रभुर्जनानां यथेष्टं सांवत्सरिकं दानमारभत । चतुष्पथादिषु च ''यो यदिच्छति, स तद् गृह्णात्वि''ति घोषणामुच्चैरकारयत् । शक्रनिदेशात् कुबेरप्रेषिता जृम्भकाः सुराश्च ददतः प्रभोः स्वर्ण-रत्नादीनि गिरिकुञ्जगतान्यस्वामिकानि गुप्तानि नष्टान्यन्यानि च धनानि सर्वत



आहृत्याऽपूरयन् । **ऋषभ**नाथश्च प्रतिदिनं सूर्योदयाद् भोजनक्षणपर्यन्तं सुवर्णस्यैकां कोटिमष्टौ लक्षाणि च ददानो वत्सरेण सुवर्णस्या-ऽष्टाशीत्यधिकत्रिशतकोटिमशीतिलक्षाणि च ददौ । प्रभोर्दीक्षया जना अपि संसारविरक्ता यथेष्टदानेऽपि शेषामात्रमेवैतदगृह्णन्, नाऽधिकम् ।

अथ वार्षिकदानान्ते कम्पितासनः शक्रः समीपमागत्य पूर्ण-कुम्भहस्तैः सुरवरैः सह दीक्षोत्सवाभिषेकं चक्रे । प्रभुश्च शक्रोपनीतं दिव्यालङ्कार-वस्त्रादिकं परिहितवान् । तथा शक्रनिर्मितां **सुदर्शना**-ख्यां शिबिकां शक्रेण दत्तहस्तः प्रभुरारुरोह । तां च शिबिकामादौ मर्त्या अनन्तरममर्त्या देवाश्चोद्धुः। तदानीं सुरासुरैस्ताडितानि मङ्गलतूर्याणि नेदुः, पार्श्वतश्चामरद्वयं वीजितं, जयजयारावश्च चक्रे । पथि शिबिकारूढं गच्छन्तं प्रभुं द्रष्टुं सर्वेऽपि नागरा अन्वधावन्त । केचिच्च प्रभुं द्रष्टुमुच्चवृक्षशाखासु, केचिच्च मार्गगृहेषु, केचिच्चा-ऽश्वेषु आरुरुहुः । स्त्रियश्चाऽपि काश्चिद् वेगात् त्रुटितहारेण मौक्ति-कानि मुञ्चन्त्यः, काश्चित् कटिस्थबालाः, काश्चित् सखीदत्तावलम्बाः प्रभुं द्रष्टुमधावन् । मार्गगृहस्थाश्च काश्चित् पूर्णपात्राणि दधुः, काश्चिच्च प्रभोर्दर्शनेऽञ्चलान् चामराणीव चालयामासुः, काश्चिच्च लाजान् निचिक्षिपुः, काश्चिच्च ''चिरं नन्द, चिरं जीवे''त्याशीर्वचनानि जगुः । एवं पुरस्त्रियः प्रभुं पश्यन्त्योऽन्वसरन् । आकाशे च चतुर्विधा देवा विमानैः कुञ्जरैस्तुरङ्गैः स्यन्दनैश्चाऽऽगत्य ''असौ प्रभुरसौ प्रभु''रित्येवं मिथः कथयन्तो वाहनानि स्थिरीचक्रुः । तदानीं प्रकृष्टसुर-मानुषैः परिवृतः, पार्श्वयो**र्भरत-बाहुबलि**भ्यामुपसेवितः, विनीतैरन्यैश्च तनयैरष्टानवत्या प्रभुरन्वसारि । माता पत्न्यौ पुत्र्यौ तथाऽन्या अपि स्त्रियः साश्रुनेत्राः प्रभुमन्वगुः ।

अथ प्रभुः **सिद्धार्थ**मुद्यानमासाद्य शिबिकातोऽवारुरोह । तथा कषायानिव तद्वस्त्र-माल्य-भूषणादीनि त्यक्तवान् । शक्रश्च प्रभोः

स्कन्धदेशे कोमलं धवलं सूक्ष्मं च देवदूष्यं न्यधात् । ततश्चैत्र-कृष्णाष्टम्यामुत्तराषाढानक्षत्रे दिवसस्य पश्चिमे भागे नराऽमरेषु जयजयारावं कुर्वत्सु सत्सु प्रभुश्चतसृभिर्मुष्टिभिः स्वशिरसः केशानुच्चखान । तांश्च केशान् **सौधर्मेन्द्रो** वस्त्राञ्चले प्रतीच्छति स्म । पञ्चमेन मुष्टिना शेषान् केशानुत्खनितुमिच्छन् प्रभुः शक्रेण ''त्वदंसयोः शोभमाना केशवल्लरी तिष्ठत्वि''ति याचितस्तथैव धारयामास । ततः **सौधर्मेन्द्रः** क्षीरोदधौ तान् केशान् क्षिप्त्वा समागत्य तुमुलं मुष्टिसंज्ञयाऽरक्षत् । प्रभुश्च षष्ठतपो विधाय सिद्ध-नमस्कारं च कृत्वा देवा-ऽसुर-मनुष्यसमक्षं ''सकलं सावद्ययोगं प्रत्याख्यामी''त्युदीरयन् मोक्षमार्गस्य रथमिव चारित्रं प्रत्यपद्यत । तदानीं च स्वामिदीक्षोत्सवेन नारकाणामपि क्षणं सुखमासीत् । प्रभोश्च मर्त्यक्षेत्रमनोद्रव्यप्रकाशकं मनःपर्ययज्ञानमुत्पेदे । तदानीं च सुहृद्भिर्वार्यमाणा बन्धुभिर्निरुध्यमाना **भरते**न निषिध्यमाना अपि **कच्छ-महाकच्छा**दयो चत्वारः सहस्रा नृपाः पुत्र-कलत्रादि राज्यं च त्यक्त्वा ''या गतिः प्रभोः सैवाऽस्माकमपी''ति निश्चयाद् मुदा दीक्षां जगृहुः ।

अथ शक्रादयः प्रणम्य विहिताञ्जलय **आदिनाथं** स्तुत्वा जन्माभिषेकव**न्नन्दीश्वर**मध्येन स्वस्थानं जग्मुः । **भरत-बाहुबल्या**-दयोऽपि जिनेश्वरं प्रणम्य कथञ्चिद् निजनिजस्थानं जग्मुः । जिनेश्वरश्चाऽनुप्रव्रजितैः **कच्छ-महाकच्छा**दिभिरनुसृतो मौनी पृथिवीं विहर्त्तुं प्रारेभे । तदैकान्तसरलानां जनानां भिक्षादानानभिज्ञत्वा-ज्जिनेश्वरः पारणादिवसेऽपि कुत्राऽपि भिक्षां न प्राप । ते हि जिनेश्वरं पूर्ववद् राजानमेव जानाना भिक्षार्थमागताय तस्मै वेगवतस्तुरङ्गमान्, गजेन्द्रान्, रूपवत्यः कन्यकाः, तेजस्वीन्याभरणानि, चित्रवर्णानि वासांसि, माल्यानि, सुवर्णराशिं रत्नराशिं वा यथास्वं ढौकयामासुः ।



एवं भिक्षामलभमानोऽपि प्रभुरदीनमना विहरन् पृथिवीं पावयामास । तथा सुस्थितः क्षुत्पिपासादीन् परीषहानधिसेहे । स्वयं प्रव्रजिता राजानश्चाऽपि प्रभुमनुसरन्तस्तथैव विहरन्ति स्म ।

अथ तत्त्वज्ञानरहिताः क्षुत्पिपासादिभिः क्लान्तास्तपस्विनश्च ते राजानः स्वबुद्ध्यनुगुणं दध्युः-''एष प्रभुर्मधुराण्यपि फलानि नाऽत्ति, स्वादून्यपि पयांसि न पिबति, तथा शरीरसंस्कारानपेक्षो न स्नानादि करोति, वस्त्रा-ऽलङ्कार-माल्यानि वा नोपादत्ते, स वातोद्धूत-मार्गरजोभिर्व्याप्यते, मूर्ध्नि नितान्तं ललाटन्तपमातपं सहते, शयनादिविहीनोऽपि न श्राम्यति, शीतोष्णाभ्यां च न परिक्लिश्यते, क्षुधां न गणयति, पिपासामपि न जानाति, निद्रामपि न सेवते, अनुचरीभूतानस्मान् कृतापराधानिव दृष्टिपात-सङ्कथादिभिरपि न प्रीणयति, पुत्र-कलत्रादिपरिग्रहरहितः प्रभुश्चित्ते किं चिन्तयतीति न जानीमः'' ।

अथ तपस्विभिः स्ववर्गाग्रेसरौ प्रभोः समीपसेवकौ **कच्छ-महाकच्छौ** कथितौ-''प्रभुः क्षुत्पिपासादिपरीषहान् सासहिः, न तथा वयम् । तस्मादस्माभिः प्रभोर्व्रतेऽनुसरणं समुद्रलङ्घनविधौ गरुडस्य काकैरिव प्रचक्रमे । किं जीविकार्थं निजानि राज्यानि गृह्णीमः ? तान्यपि **भरते**न गृहीतानि, ततः क्व गम्यताम् ? किं वा जीविकार्थं **भरत**मेव व्रजामः ? प्रभुं विहाय गतानामस्माकं तत एव भयं वर्त्तते । युवां पुराऽपि प्रभोर्नित्यमासन्नौ भावाभिज्ञौ चेति कार्यमूढानामस्माकं किं कार्यम् ? तद् ब्रूतम्'' इति ।

तावप्यूचतुः- ''**स्वयम्भूरमणा**म्बुधेः स्ताघ इव प्रभोर्भावो दुष्प्रापः । पुरा स्वामिनाऽऽदिष्टं नित्यं कुर्वः, अधुना चैष प्रभुर्मौनी न किमप्यादिशति । तद् यथा यूयं न वित्थ, तथाऽऽवां न विद्वः । सर्वेषां समाना गतिः । यूयमेव ब्रूत यदावां किं कुर्वहे'' इति । ततः

सर्वे मिलित्वा विचार्य च **गङ्गा**तीरवनं प्राप्तास्ते कन्दमूल-फलानि यथेष्टं बुभुजिरे । ततः कालादिह भूतले तापसा वनवासिनः कन्दमूल-फलाद्याहाराश्चाऽभवन् ।

अथ **कच्छ-महाकच्छ**तनयौ विनीतौ प्रभोरादेशात् पूर्वं दूरदेशान्तराणि गतौ तद्वनमार्गेणाऽऽयान्तौ **नमि-विनमि**नामानौ स्वपितरौ दृष्ट्वाऽचिन्तयताम्-''**वृषभ**नाथे प्रभौ सत्यपि इमावावयोः पितरौ किमनाथाविवेदृशीं दशां प्राप्तौ ? क्व तच्चीनांशुकं, क्वेदं वल्कलम् ? क्व सोऽङ्गरागः, क्वेदं भूरजः ? क्व समाल्यो धम्मिल्लः, क्वेयं जटा ? क्व तद्गजारोहणं, क्वैष पादचारः?'' एवं विचिन्तयन्तौ तौ पितरौ प्रणम्य पप्रच्छतुः ।

**कच्छ-महाकच्छा**वप्यूचतुः-''प्रभु**र्वृषभ**नाथो राज्यं त्यक्त्वा विषयान् **भरता**दिभ्यो विभज्य दत्त्वा च व्रतमग्रहीत् । तदा स्वामिना सहाऽस्माभिस्सर्वैस्तद् व्रतं गृहीतम् । क्षुधादिपीडितैश्चाऽस्माभिस्तद् व्रतं मुमुचे । प्रभुमनुसर्त्तुमशक्ताश्चाऽपि गार्हस्थ्यं त्यक्त्वाऽत्र वने वसामः'' । ततः ''आवामपि प्रभोर्भूसंविभागमर्थयावहे'' इत्युक्त्वा तौ **नमि-विनमी** प्रभुसमीपं जग्मतुः। निःसङ्गः प्रभुरित्यजानन्तौ तौ प्रतिमास्थितं प्रणम्य तं विज्ञपयामासतुः-''प्रभो ! आवां दूरदेशान्तरं प्रेष्य त्वया **भरता**दिभ्यो भूमिर्विभज्य दत्ता । किन्त्वावाभ्यां गोष्पदमात्राऽपि मही किं न दत्ता ? ततः प्रसद्येदानीमपि देहि । आवयोः कोऽप्यपराधः किम् ? यदुत्तरमपि न वितरसि, देयस्य का कथा ?'' तदा निर्ममः प्रभुस्तकौ न किञ्चिदुदतरत् । तौ च-''यद्यपि स्वामी न किमपि ब्रूते, तथाप्येष एव नौ गति''रिति निश्चित्य प्रभुमुपसेवितुं प्रवृत्तौ । जलाशयाद् नित्यं नलिनीदलैर्जलमानीय प्रभुसमीपे धूलिशमनाय सिषिचतुः । प्रभाते च तस्य पुरतः सुगन्धिपुष्पाणि मुमुचतुः । एवमहर्निशं पारिपार्श्विकौ तौ कृष्टासी



स्वामिनं सिषेवाते । त्रिसन्ध्यं च प्रणम्य कृताञ्जली तौ ''आवयोर्नाऽपरः स्वामी, प्रभो ! राज्यप्रदो भवे''त्येवं ययाचाते च ।

अथाऽन्यदा नागकुमारेश्वरः श्राद्धो **धरणः** प्रभुं विवन्दिषुस्तत्राऽऽययौ । तत्र च प्रभुं सेवमानौ राज्यं याचमानौ च बालाविव सरलौ तौ साश्चर्यं ददर्श । स तौ पप्रच्छ-''कौ युवाम् ? दृढं कृताग्रहौ किं च याचेथे ? प्रभोः सांवत्सरिकमहादानकाले युवां क्व गतौ ? सम्प्रति प्रभुर्वपुष्यपि निर्ममो निष्परिग्रहो रोषादिविनिर्मुक्तश्च वर्तत''। ततस्तौ-''एष प्रभोः सेवकः कश्चि''दिति सादरं तं प्रत्यूचतुः । ''अयं प्रभुरावां भृत्यौ । अयमावां क्वचित् प्रेषितवान् । राज्यं च विभज्य **भरता**दिभ्यो दत्तवान् । प्रदत्तसर्वस्वोऽप्ययमावाभ्यां राज्यं दाता । सेवकानां प्रभोर्निकटेऽस्ति नास्ती''ति वा का चिन्ता ? तैः सेवैव कार्या'' । ततस्तेन ''प्रभुतुल्यः प्रभुपुत्र'' इति **भरतं** गत्वा याचेथामित्युक्तौ पुनरूचतुः-''आवां प्रभुं विहाय नाऽन्यं याचावहे । **भरता**दिभ्यः स्वस्त्यस्तु । तवाऽनया चिन्तया किम् ? अस्मात् प्रभोर्यद्भवति, तदपरस्मात् कुतः'' ?

ततस्तदुत्तरप्रसन्नो **धरणो**-ऽब्रवीत्-''अहं पातालपतिरस्यैव प्रभोः किङ्करोऽस्मि'', ''असावेव स्वामी सेवनीय'' इति वां दृढा प्रतिज्ञा, साधु साधु । अस्य प्रभोः सेवया राज्यसम्पदो **वैताढ्य**गिरौ विद्याधरेन्द्रता भवनपत्यादिश्रियश्चाऽयत्नसुलभाः । किं बहुना ? अस्य प्रभोः सेवया देहीह त्रिभुवनाधीशः परत्र च सिद्धरूपो भवेत् । अहमस्य प्रभोर्दासः । युवामपि सेवकौ । ततः तत्सेवायाः फलं विद्याधरैश्वर्यं युवाभ्यां ददामि । युवां स्वामिसेवाफलमेवैतदिति बुध्येथां, माऽन्यथा । एवं सम्बोध्य स तयो**र्गौरी-प्रज्ञप्ती**प्रमुखां पाठसिद्धिदामष्टचत्वारिंशद्विद्यासाहस्रीं दत्त्वा ''**वैताढ्यं** गत्वा श्रेणिद्वये नगराणि परिष्ठाप्याऽक्षयं राज्यं कुर्वाथा''मित्यादिशत् ।

ततस्तौ जिनेश्वरं नत्वा **पुष्पका**ख्यं विमानं विकृत्याऽऽरुह्य च **धरणे**न समं प्रचलितौ । पित्रोः **कच्छ-महाकच्छ**योस्तत्स्वामि-सेवाफलं कथयित्वाऽ**योध्या**पतेश्च तत्सर्वं निवेद्य सर्वं परिजनं स्वजनं च तत्राऽऽदाय, प्रान्तयोर्**लवणाम्भोधि**वीचिचुम्बितं, दक्षिणोत्तरयोः पञ्चाशतं योजनानि पृथुं, सक्रोशानि षड् योजनानि महीतलेऽवगाढं, पञ्चविंशतियोजनोत्सेधं, **गङ्गा-सिन्धु**नदीभ्यां समाश्लिष्टं, **खण्ड-प्रपाता**ख्य**तमिस्रा**ख्यगुहाद्वयं दधतं, शाश्वतप्रतिमाजुषा **सिद्धायतन-कूटेना**ऽद्भुतां शोभां बिभ्राणं, नानारत्नमयान्युच्चैर्नाकिनां लीला-स्थानानि नवकूटानि बिभ्रतं, योजनविंशत्योर्ध्वं दक्षिणोत्तरपार्श्वयो-र्व्यन्तरावासश्रेण्यौ दधानमामूलचूलं चारुकलधौतशिलामयं, शाखि-लतादिशोभितं **वैताढ्य**गिरिमापतुः ।

तत्र च पर्वते **धरणे**न्द्रादेशा**न्नमिः** पृथिव्या दशयोजनान्यूर्ध्वं दक्षिणश्रेण्यां **किन्नरनरगीताद्या**ख्यानि पञ्चाशतं नगरोत्तमानि निर्माय स्वयं तन्मध्यस्थं **रथनूपुरचक्रवालं** नगरमध्युवास । **नागनाथा**-देशा**द्विनमि**श्चाऽप्युत्तरश्रेण्यां षष्टिं **पुर्याद्या**ख्यानि पुराणि निर्माय स्वयं तेषु प्रधानभूतं **गगनवल्लभा**ख्यं पुरमध्यतिष्ठत् । तथा तावनेकशो ग्रामान् शाखानगराणि च निर्माय स्थानौचित्याज्जनपदानपि स्थापया-मासतुः । तेषु यस्माद् यस्माज्जनपदाद् नरा आनीय निवासिताः, तत्राऽपि तन्नाम्ना एव ते जनपदाः कृताः ।

अथ तौ **नमि-विनमी** तेषु पुरेषु स्वमनसीव सभायां **वृषभ**नाथं जिनेश्वरं स्थापयामासतुः । ततो **धरणेन्द्रो** ''विद्यादुर्मदा विद्याधरा दुर्नयं मा कार्षु''रिति तेषां मर्यादामादिशत् । ''ये दुर्मदा विद्याधरा जिनानां जिनचैत्यानां चरमशरीरिणां प्रतिमाप्रतिपन्नानां सर्वेषामनगारिणां च पराभवं लङ्घनं च करिष्यन्ति, तथा सात्मस्त्रीकं नरं हनिष्यन्ति, अनिच्छन्तीं स्त्रियं च रमयिष्यन्ति, तान् तत्क्षणाद्



विद्यास्त्यक्ष्यन्ति'' । **नागनाथ** इमां मर्यादामुच्चैर्घोषयित्वा रत्नभित्ति-प्रशस्तिष्वलीलिखत् । तथा **नमि-विनमी** विद्याधराधिराजत्वे संस्थाप्य व्यवस्थां च कृत्वा स्वयं तिरोहितवान् । तत्र च विद्याधराणां **गौरी**प्रभृतीनां विद्यानां नाम्ना **गौरेय**प्रभृतयः षोडश निकाया अभवन् । तेषु निकायेष्वष्टौ **नमि**नाऽष्टौ च **विनमि**ना गृहीताः । ताभ्यां च स्वे स्वे निकाये स्वकाये इव भक्तिपूर्वकं विद्या-धिपतिदेवताः स्थापिताः । तथा तौ नित्यं **वृषभ**स्वामिमूर्तिपूजायां कृतोत्सवौ धर्मानाबाधया भोगान् बुभुजाते ।

ते **कच्छ-महाकच्छा**दयो राजन्यतापसाश्च **गङ्गा**या दक्षिणे तटे मृगा इव वनेचरा वल्कलवस्त्रधरा गृहमेधिनामाहारमुद्वान्तमिवा-ऽस्पृशन्तः चतुर्थ-षष्ठादितपःशुद्धं कृशतरं वपुर्धारयन्तः पारणादिवसे-ऽपि शीर्णपर्ण-फलादिकं भुञ्जाना हृदये जिनेश्वरान् ध्यायन्तोऽस्थुः ।

❀ ❀ ❀

जिनेश्वरश्चाऽऽर्या-ऽनार्येषु मौनेन विहरन् संवत्सरं यावन्निराहारो दध्यौ-''तैलेन प्रदीपा इवाऽऽहारेणैव शरीरिणां शरीराणि वर्त्तन्ते, किन्त्वनगारिणा माधुकर्या वृत्त्या काले द्विचत्वारिंशता दोषैरदूषित आहारो ग्राह्यः । यद्यद्याऽपि पूर्वदिनवदाहारं न गृह्णामि, किन्त्वभिग्रहायोत्तिष्ठे, तदा चत्वारः सहस्राः अमी तापसा इवाऽपरे भाविनो मुनयो भङ्गं ग्रहीष्यन्ति'' । एवं विचार्य जिनेश्वरस्ततो भिक्षार्थं चलितो **गजपुरा**ख्यं पुरं प्राप ।

तस्मिन् पुरे **बाहुबलि**पुत्र**सोमप्रभ**नृपकुमारेण **श्रेयांस**नृपेण स्वप्ने ''परितः श्यामलो **मेरु**गिरिर्मया पयस्कुम्भैरभिषिच्याऽधिक-मुज्ज्वलो विहित''इत्यदृश्यत । **सुबुद्धि**श्रेष्ठिना च ''सूर्याच्च्युतं किरणानां सहस्रं **श्रेयांसे**न पुनस्तत्र स्थापितं, येन सूर्योऽतिभासुरो जज्ञे'' इत्यदृश्यत । **सोमयशसा** च ''एको राजा बहुभिः शत्रुभी

रुद्धः **श्रेयांस**साहाय्याज्जयं प्राप्त'' इत्यदृश्यत । ते त्रयोऽपि सदसि स्वस्वस्वप्नानन्योन्यस्य कथयामासुः । तत्फलं चाऽजानन्तः स्वस्वस्थानं ययुः ।

तदा स्वप्नफलं प्रकटयितुमिव जिनो भिक्षार्थं **हस्तिना**पुरं प्राविशत् । मुदितैर्नागरैश्च संवत्सरं निराहारोऽप्यागच्छन् स्वामी ददृशे। ततः सर्वैरेवोत्थाय धावित्वा च स्वामी पर्यवेष्ट्यत । कोऽपि ''स्वामिन् ! इहैहि, नो गृहाण्यनुगृहाण'' । अन्यश्च ''सज्जमिदं स्नानीयवसनादि, इह स्नाहि, प्रसीद'' । अपरश्च ''स्वोपयोगेन मम चन्दनादीनि कृतार्थय'' । इतरश्च ''रत्नालङ्करणानि धारय, अनुगृहाणे''त्येवं जनाः प्रतिस्वं प्रार्थयामासुः । किन्तु जिनेश्वरोऽकल्प्यत्वात् तान्यगृह्णन् प्रतिगृहं जगाम ।

तदा **श्रेयांसः** प्रातःकाले पक्षिणामिव पौराणां कोलाहलं शुश्राव । तेनाऽऽज्ञप्तश्च द्वारपालो वृत्तान्तं ज्ञात्वा कृताञ्जलिर्व्यजिज्ञपत्–''यो देवेन्द्रादिभिः सेव्यते, येन लोकानां जीवनोपायकर्माणि दर्शितानि, येन च दीक्षां जिघृक्षता **भरता**दीनां युष्माकं च स्वं राज्यं विभज्य ददे, यः स्वयं सर्वसावद्यपरिहारपूर्वकं तपः स्वीचकार, स नाथो निःसङ्गो निराहारो महीं पद्भ्यां विहरते, यस्यच्छायाऽऽतपौ शीतोष्णौ च समौ, यश्च युगमात्रं दत्तदृष्टिः कीटिकामप्यमृद्नन् पादचारं करोति, जगत्त्रयदेवः स्वामी स ते पितामहो भाग्यवशादिहाऽऽयाति, तत एवैषोऽधुना पौराणां कलकलः'' ।

अथ युवराजस्तत्क्षणमेव स्वामिनमायान्तं दृष्ट्वा पादचारेणैवाऽधावत । पर्षदपि तथैव तमन्वधावत । गृहाङ्गणगतस्य स्वामिनः पादपङ्कजयोर्लुठित्वा **श्रेयांस**स्त्रिःप्रदक्षिणीकृत्य हर्षाश्रुवारिभिः पादौ क्षालयन्निव ननाम । ऊर्ध्वीभूय च स स्वामिनो मुखपङ्कजं दृष्ट्वा ''मयेदृशं लिङ्गं क्व दृष्ट''मिति चिन्तयन्



जातिस्मरणमाप सस्मार च यत्–''**पूर्वविदेहे**ऽयं **वज्रनाभ**श्चक्रवर्त्यभूत्, अहं च तस्य सारथिर्जातः । तद्भवे एवाऽस्य पिता **वज्रसेन** ईदृशं तीर्थकृल्लिङ्गं धारयन्नीक्षितः । तस्य पादान्त एवाऽयमहं च दीक्षां गृहीतवन्तौ । अर्हतो **वज्रसेन**स्य मुखाच्च ''**भरते**ऽसौ **वज्रनाभः** प्रथमतीर्थकृद्भावी''त्यश्रौषं च । अमुना सहैव च **स्वयम्प्रभा**दीन् भवान् पर्यभ्रमिषम् । स एषोऽधुना मम प्रपितामहो मया दिष्ट्या दृष्टः । एष मामनुग्रहीतुं साक्षाद् मोक्ष इव समागतोऽधुना'' ।

अस्मिन्नवसरे **श्रेयांस**स्योपहारे केनचिद् नवेक्षुरससम्भृता घटाः समर्पिताः । ततः स निर्दोषभिक्षादानविधिज्ञत्वाद् ''अयं कल्पनीयो रस'' इति प्रभुमवदत् । प्रभोश्चाऽञ्जलिरूपे पाणिपात्रे इक्षुरसान् पुनः पुनर्ददौ । अचिन्त्यप्रभावत्वात् प्रभोरञ्जलौ ते रसाः स्तम्भिता इव व्योम्नि लग्नशिखा ममुः । तदा **श्रेयांस**स्य हृदये मुदो न ममुः । ततः पश्यतां सुरासुराणां प्रभुस्तेन रसेन पारणं कृतवान् । तदानीं च दिवि दुन्दुभयो नेदुः । **श्रेयांस**गृहे रत्नवृष्टिरभूत् । देवाः पञ्चवर्णपुष्पवृष्टिं गन्धाम्बुवृष्टिं च चक्रुः । सुरनरैश्चेलोत्क्षेपश्चक्रे । वैशाखशुक्लतृतीयायां तदक्षयं दानमभूदित्यद्याऽपि तत्पर्वाऽ**क्षयतृतीये**ति प्रवर्तते । ततः प्रभृति भूमौ **श्रेयांसो**पज्ञं दानधर्मः प्रवृत्तवान् ।

अथ स्वामिपारणतो देवागमनाच्च विस्मिता राजानो नागराश्चाऽन्ये **श्रेयांस**वेश्मनि समीयुः । ते क्षत्रियतापसाः **कच्छ–महाकच्छा**दयोऽपि तत्र समाजग्मुः । ते च सर्वे पुलकिताः **श्रेयांस**मूचुः–''भो कुमार ! धन्योऽसि, यत् त्वयेक्षुरसाहारः स्वामिना ग्राहितः । अस्माभिस्तु सर्वस्वमपि प्रदीयमानं प्रभुर्न गृहीतवान् । संवत्सरं यावद् ग्रामादीनटन् प्रभुः कस्याऽप्यातिथ्यं नाऽऽदत्त ।

भक्तमानिनोऽस्मान् धिक् । किं बहुना ? स्वामी वाचाऽपि नो न समभावयत् । अनेकशः पूर्वलक्षाणि पुत्रवन्नस्त्रातपूर्वी प्रभुरस्मास्विदानीमपरिचित इव वर्त्तते'' ।

ततः **श्रेयांस**स्तानुवाच-''किमेवमुच्यते ? स्वामी पूर्ववत् परिग्रहपरो नेदानीम् । स्नानादीनि भोगेच्छुः स्वीकरोति, विरक्तस्य तैः किं प्रयोजनम् ? कन्यकाः कामवशो, हस्त्यश्वादि नृपः, फलादि च सजीवं हिंसको गृह्णाति । जितकामस्य विरक्तस्य जीवाभयप्रदस्य च स्वामिनो न ग्राह्याणि तानि । प्रभुस्त्वेषणीयं कल्प्यं प्रासुकं चाऽऽन्नादि गृह्णाति । भवन्तो मुग्धास्तन्न जानन्ति'' । ते पुनरूचुः-''स्वामिना पुरा यत् किञ्चिदपि शिल्पादि ज्ञापितं, जनास्तन्मात्रं जानन्ति, भर्त्रा त्विदं न ज्ञापितमिति वयं तद् न जानीमः । त्वयैतत् कुतो ज्ञातमिति कथय'' ।

ततः कुमार उवाच-''भगवद्दर्शनाद् मे जातिस्मरणमुत्पन्नम्, अमुना स्वामिना सार्धमहमष्टौ जन्मान्तराणि स्वर्गमर्त्ययोः पर्यभ्रमिषम् । इतोऽतीते तृतीये भवे **विदेहे**षु पितु**र्वज्रसेना**ख्यस्य तीर्थकृतोऽन्तिके प्रभुरहं च प्रव्रजितौ । तज्जन्मस्मरणाद् मयैतत् सकलं ज्ञातम् । तथा मम पितुः **सुबुद्धि**श्रेष्ठिनश्च त्रयाणामपि स्वप्नानां फलमधुना प्रत्यक्षम् । तथाहि-तपःकृशः प्रभुरिक्षुरसपारणात् पर्यभादिति मत्स्वप्नफलम् । मया कारितेन पारणकेन परीषहान् पराजितवानिति मत्पितृस्वप्नफलम् । एष प्रभुरादित्यः, केवलज्ञानं गोसहस्रं, तद् भ्रष्टं मया पारणेनाऽयोजि, स बभौ चेति **सुबुद्धि**स्वप्नफलम् । तच्छुत्वा ते सर्वे **श्रेयांसं** साधु साध्विति भाषमाणाः प्रमुदिता निजनिजं स्थानं ययुः ।

ततः कृतपारणकः प्रभुः, छद्मस्थतीर्थकृत एकत्र स्थित्यभावात्, **श्रेयांस**गृहादन्यत्र जगाम । प्रभुपारणस्थानातिक्रमं कोऽपि मा कार्षीदिति तत्र **श्रेयांसो** रत्नमयं पीठं चकार । तथा स तद् रत्नपीठं त्रिसन्ध्यं



भक्त्या पूजयामास । किमेतदिति लोकेन पृष्टश्चाऽऽ**दितीर्थकृ**न्मण्डलमित्युत्तरति स्म । एवं यत्र यत्र प्रभुर्भिक्षामग्रहीत् तत्र तत्र लोकैः पीठं कृतम् । तच्च क्रमादा**दित्यपीठ**मभूत् ।

अथ प्रभुः सायंकाले **बहली**देशे **बाहुबलेस्तक्षशिला**पुरीं सम्प्राप । तस्या बहिरुद्याने च प्रतिमया स्थितः । तत्र नियुक्तैश्च गत्वा **बाहुबल**ये तन्निवेदितम् । ततः स तत्क्षणं पुरारक्षमादिशत्-''नगरमलङ्क्रियताम्'' । तेन च रम्भास्तम्भतोरणादिभिर्नगरमलङ्कृतम् । स्वामिदर्शनोत्सुकस्य **बाहुबले**श्च सा निशा मासोपमा जाता । प्रभुश्चेषद्विभातायां रजन्यां सत्यां प्रतिमां पारयित्वा क्वचिदन्यत्राऽगात् । प्रभाते च मण्डलेश्वरैर्मन्त्रिभिर्गजैस्तुरगै**र्वसन्तश्री**प्रभृतिभिरन्तःपुरस्त्रीभिश्च परिवृतः, सचामराभ्यां वारस्त्रीभ्यां सेवितपार्श्वको, धवलातपत्रविराजितः, सुवर्णदण्डहस्तेन प्रतीहारेणाऽग्रतः शोध्यमानमार्गोऽसङ्ख्यातैः पौरैरिभ्यैरनुगम्यमानो, भद्रगजस्कन्धमारूढः, शिरसि रत्नकिरीटशोभितः, कुण्डलादिभिर्नानाभरणैश्च भूषितो महाबाहु**र्बाहुबलि**र्बन्दिवृन्दकृतजयजयारावपूर्वकं प्रभुपादपवित्रस्योपवनस्य समीपं ययौ । तत्र गजादवतीर्य छत्रादि त्यक्त्वा च प्रविवेश । प्रभुरहितमुद्यानं दृष्ट्वा तेन ''क्व प्रभु''रित्येवं पृष्टा उद्यानपालाः ''किञ्चित्कालपूर्वमेव प्रभुर्ययौ, तत् कथयितुं यावद्यामस्तावद्देवः स्वयं समागत'' इति समुदतरन् । तेन विषण्णश्च स चिन्तयामास-''परिजनैः सह स्वामिनं पूजयिष्यामीति मन्मनोरथो मुधाऽजनि । लोकानुग्रहकाम्यया कृतविलम्बस्य मम मूर्खता जाता, धिग् धिगिमां रात्रिं मम मतिं च । स्वामिदर्शनाभावाद् नेत्रे अपि निष्फले । प्रभुः प्रतिमया स्थितोऽहं च निस्त्रपः सौधे शयितवान्'' ।

अथ **बाहुबलिं** चिन्तामग्नं दृष्ट्वा सचिवो जगाद-''अत्राऽऽगतं स्वामिनं नाऽपश्यमिति किं शोचसि ? स तव हृदये

एव नित्यवास्तव्यः, कुलिशादिचिह्नितैर्दृष्टैः स्वामिपदन्यासैर्भावतः स्वाम्येव दृष्टः''। तच्छ्रुत्वा स सपरिच्छदस्तानि पदबिम्बानि भक्तितोऽवन्दत । एतानि पदानि कोऽपि मा क्रमेदिति तत्र स **बाहुबली** रत्नमयं **धर्मचक्रं** चकार । तच्चाऽष्टयोजनविस्तारं योजनमुच्छ्रितं सहस्त्रारं **धर्मचक्रं** सहस्त्रांशुबिम्बमिव बभौ । पुष्पै राज्ञा पूजितं च तत्पौरैः पुष्पपर्वत इव समालक्षि । तथा स तत्र सङ्गीतादिभिरष्टाह्निकामहोत्सवं चकार । ततस्तत्राऽऽरक्षान् पूजकांश्चाऽऽदिश्य तत् प्रणम्य नृपो निजां नगरीं जगाम ।

❀ ❀ ❀

अथ प्रथमजिनोऽपि नानाविधतपोनिष्ठो, विविधाभिग्रहोद्यतो, **यवना**दिदेशेषु मौनी, अनार्यानपि दर्शनेन भद्रीकुर्वन्, उपसर्गैरनभिभूतः, परीषहान् सहमानश्च वर्षसहस्त्रं विजहार । ततोऽ**योध्या**याः शाखानगरं **पुरिमतालं** ययौ । तस्योत्तरतः स्थितं द्वितीयं नन्दनमिव **शकटमुखा**ख्यं रम्यमुद्यानं न्यविशत । तत्र कृताष्टमतपा न्यग्रोधतरुतले प्रतिमास्थोऽप्रमत्ताख्यं गुणस्थानं प्रपन्नवान् । ततश्चाऽपूर्वकरणमारूढः पृथक्त्ववितर्कसवीचारं शुक्लध्यानं प्रपद्याऽनिवृत्तिं सूक्ष्मसम्परायगुणं च प्राप्य क्षणात् क्षीणकषायत्वं प्रतिपेदे । तथा क्षीणमोहान्तिमक्षणे एकत्ववितर्कमवीचारं द्वितीयं शुक्लध्यानं प्रपद्य, तेन च पञ्चज्ञानावरणानि, चत्वारि दर्शनावरणानि पञ्चाऽन्तरायांश्चाऽनाशयत् । तदा व्रतारम्भदिवसाद् वर्षसहस्त्रेषु गतेषु फाल्गुनकृष्णैकादशीदिने प्रातरुत्तराषाढानक्षत्रे त्रिकालविषयं सकललोकालोकदर्शकं प्रभोः केवलज्ञानमुत्पेदे । तदानीं दिशः प्रसन्ना बभूवुः, सुखदायिनो वायवो ववुः, नारकाणामपि च क्षणं सुखमजायत ।

अथ तदानीं स्वामिकेवलोत्सवाय प्रेरयितुमिवेन्द्राणामासनानि चकम्पिरे । इन्द्रलोकेषु महाघण्टाः प्रणेदुः । तदा जिनपादान्ते



जिगमिषोः **सौधर्मेन्द्र**स्य पुरतश्चिन्तामात्रेणैर**ावणो** लक्षयोजनप्रमाणशरीरो, हिमवच्छ्वेताङ्गप्रभुगण्डस्थलस्त्रवन्मदजलस्तालवृन्तैरिव लोलैः कर्णतालैः कपोलस्थलसम्पातिभ्रमरावलीं निवारयन्, बालसूर्यबिम्बतुल्यगण्डस्थलः, क्रमपीनवृत्तशुण्डो, मधुवर्णनेत्रदन्तः, पार्श्वयोर्घण्टाभ्यामलङ्कृतोऽष्टमुखः, प्रतिमुखाष्टदन्तः, प्रतिदन्तस्थितपुष्करिणीकः, सर्वाङ्गसुन्दरो गजीभूय समुपस्थितोऽभूत् । तद्दन्तस्थितासु पुष्करिणीषु च प्रत्येकमष्टौ कमलानि, प्रतिकमलमष्टौ विशालानि दलानि, प्रतिदलमष्टौ नाटकानि, प्रतिनाटकं द्वात्रिंशत् पात्राणि चाऽऽसन् । आसीनसपरिवारेन्द्रश्च स चलन् क्रमात् स्ववपुः सङ्क्षिपंश्च क्षणाज्जिनेश्वरपवित्रितमुद्यानं प्राप । **अच्युता**दयोऽपीन्द्रा देवगणैः सह सत्वरं तत्राऽऽययुः ।

इतश्च **वायुकुमारा** योजनप्रमाणां समवसरणभूमिममृजन् । **मेघकुमारा** गन्धाम्बुवृष्टिभिस्तां सिषिचुः । **व्यन्तराः** स्वर्ण-रत्नादिभिस्तां भूमिं परितो बबन्धुः । सुगन्धीनि पञ्चवर्णपुष्पाणि तत्राऽवाकिरंश्च । तथा चतसृष्वपि दिक्षु स्वर्ण-रत्नमयानि तोरणानि विचक्रुः । शालभञ्जिका, इन्द्रनीलमया मकराः, श्वेतच्छत्राणि, ध्वजाः, तोरणानामधो मङ्गलस्याऽष्टचिह्नानि स्वस्तिकादीनि च तत्र जज्ञिरे । तथा तत्र **विमानपत**यो रत्नमयमुपरितनं वप्रं नानामणिमयैः कपिशीर्षैः शोभमानं रचयामासुः । **ज्योतिष्पत**यश्च तन्मध्यभागे रत्नमयकपिशीर्षशोभितं कनकमयं प्राकारं चक्रुः । तद्बहिश्च **भवनपत**यः कनकमयकपिशीर्षशोभितं रूप्यमयप्राकारं चक्रुः । तत्र **व्यन्तरा**मराश्च पताकापङ्क्तिराजितान् माणिक्यतोरणान्, प्रतिप्राकारं चत्वारि गोपुराणि, प्रतिगोपुरं द्वारचतुष्टययुक्तां सकाञ्चनकमलां वापीं धूपघटीं च विचक्रुः । तथा द्वितीयप्राकारमध्ये उत्तरपूर्वदिशि स्वामिविश्रामार्थं **देवच्छन्दं** च विचक्रुः ।

तत्र प्रथमप्राकारस्य पूर्वस्मिन् द्वारे स्वर्णवर्णौ **वैमानिक**देवौ, दक्षिणद्वारे **व्यन्तरौ** श्वेतवर्णौ, पश्चिमद्वारे रक्तवर्णौ **ज्योतिष्कौ,** उत्तरद्वारे कृष्णवर्णौ **भवनपती** च द्वारपालास्तस्थुः । तथा चतुर्षु द्वितीयवप्रद्वारेषु पूर्वक्रमेणाऽभय-पाशा-ऽङ्कुश-मुद्गरपाणयश्चन्द्रकान्त-प्रवाल-सुवर्ण-नीलाश्मकान्तयो **जया-विजया-ऽजिता-ऽपराजिता** देव्यस्तस्थुः । अन्त्यप्राकारे च प्रतिद्वारं तुम्बुरुः, खट्वाङ्गायुधो, मुण्डमाली च जटामुकुटमण्डिता द्वारपालास्तस्थुः । समवसरणमध्ये च **व्यन्तरैः** क्रोशत्रयोन्नतश्चैत्यद्रुमो विकृतः । तस्याऽधश्च रत्नमयं पीठं, तस्योपरि मणिमयं छन्दकं, तन्मध्ये पूर्वतः सपादपीठं रत्नसिंहासनं च विचक्रिरे । तथा सिंहासनस्योपरि श्वेतच्छत्रत्रयं, तत्पार्श्वयोर्यक्षाभ्यां धृते सिते चामरे, समवसरणद्वारे स्वर्णकमलस्थितमत्यद्भुतप्रभं धर्मचक्रम्, अन्यच्च करणीयं सर्वं **व्यन्तरा**श्चक्रुः । यतस्ते साधारणे समवसरणेऽधिकारिणः सन्ति ।

अथ चतुर्विधानां देवानां कोटिभिः परिवृतो जिनेश्वरः प्रातः समवसर्त्तुं प्रतस्थे । तदा च देवैः क्रमेण सहस्रदलानि नव कनकमयानि कमलानि विधाय प्रभोः पुरः स्थापितानि । स्वामी च तेषु द्वयोर्द्वयोः पादन्यासं कुर्वन् चचाल । पूर्वद्वारेण च समवसरणं प्रविश्य चैत्यवृक्षस्य प्रदक्षिणां विधाय तीर्थं नत्वा प्राङ्मुखः सिंहासने समुपाविशत् । तदानीं च **व्यन्तरा** अन्यास्वपि दिक्षु रत्नसिंहासनस्थानि प्रभुप्रतिबिम्बानि विचक्रुः । तथा प्रभोः शिरः परितो भामण्डलमाविर्बभूव । दिवि दुन्दुभिर्दध्वान । प्रभोरग्रे रत्नमयो ध्वजश्च शुशुभे ।

अथ प्रथमे प्राकारे **वैमानिक**स्त्रियः पूर्वद्वारेण प्रविश्य तीर्थनाथस्य त्रिः प्रदक्षिणां विधाय तीर्थं च नत्वा साध्वीनां साधूनां च स्थानं विहाय पूर्वदक्षिणदिशि तस्थुः । दक्षिणद्वारेण



पूर्वोक्तविधिना **भवनपति-ज्योतिष्क-व्यन्तर**स्त्रियो नैर्ऋतदिशि तस्थुः । पश्चिमद्वारेण च प्रविश्य **भवनपति-ज्योतिष्क-व्यन्तर**देवाः पूर्वोक्तविधिपूर्वं वायव्यदिशि तस्थुः । **कल्प**देवा नरा नार्यश्चोत्तरद्वारेण प्रविश्य पूर्वोक्तविधिपूर्वकमैशान्यामवतस्थिरे । तत्र चाऽऽदावागतो-ऽल्पर्द्धिर्महर्द्धिकमागच्छन्तं ननाम । प्रागागतं तु नमन् जगाम । तथा तत्र काऽपि नियन्त्रणा विकथा वा नाऽऽसीत् । विरोधिनामप्यन्योन्यं मात्सर्यं भयं वा नाऽऽसीत् । द्वितीयस्य प्राकारस्य मध्ये तिर्यञ्च-स्तृतीयस्य मध्ये च वाहनानि तस्थुः । तथा तृतीयवप्रबाह्यदेशे केऽपि तिर्यङ्-नरा-ऽमराः प्रविशन्तः, केऽपि निर्गच्छन्तश्चाऽऽसन् । तदा च **सौधर्मेन्द्रो** नमस्कृत्य बद्धाञ्जलिः प्रभुं नत्वा स्तुत्वा पुनर्नत्वा च देवादीनामग्रतो निषसाद ।

इतश्च **विनीता**नगर्यां **भरतः** प्रातर्**मरुदेवां** नमस्कर्तुमाजगाम । पुत्रविरहोद्भूतसततताश्रुप्रवाहैर्जातेन नीलिकारोगेण लुप्तलोचनां तां "देवि ! एष ज्येष्ठः पौत्रस्त्वत्पादौ नमती"ति विज्ञपयन् प्रणनाम । **मरुदेवा**ऽपि च **भरता**याऽऽशिषं प्रदायोवाच-"मां त्वां पृथिवीं प्रजां लक्ष्मीं च तृणवद् विहायैकाकी वत्सो गतवान्, अहं तु तथाऽपि न म्रिये, क्व राज्यसौख्यम् ? सर्वाङ्गसन्तापकरं तपश्च क्व?" ततो दुःखाकुलां तां **भरतो** बद्धाञ्जलिः प्रोवाच-"महासत्त्वशिरोमणे-स्तातस्य जनन्या त्वया दुःखं न विधेयम् । तस्य हि तपसि वने विहरतो न किमपि दुःखम् । मद्वाचा न चेत् प्रत्येषि, तथाऽपि तातस्याऽचिरेण जातकेवलोत्सववार्त्तया प्रत्येष्यसि" ।

अत्राऽन्तरे द्वारपालेनाऽऽगत्य **भरत**स्य ज्ञापितौ **यमक-शमकौ** पुरुषावाजग्मतुः । तत्र **यमकः** प्रणम्य **भरतं** व्यजिज्ञपत्-"देव ! दिष्ट्याऽद्याऽनया कल्याणवार्त्तया वर्धसे । **पुरिमताला**ख्ये नगरे **शकटानना**द्याने **युगादि**नाथस्य केवलज्ञानमुदपद्यत" । **शमको**ऽपि प्रणम्य-"इदानीमायुधागारे चक्ररत्नमजायते"ति

तारस्वरं व्यजिज्ञपत् । ततो **भरत**स्तात-चक्रयोः प्रथमं विश्वाभय-प्रदत्वात् प्रथमं तातपूजनं निश्चित्य स्वामिपूजार्थं स्वानादिदेश । यथोचितं पारितोषिकं दत्त्वा तौ **यमक-शमकौ** विसृज्य, **मरुदेवां**-''त्वं सर्वदा हृदये ताम्यसि, पश्य स्वपुत्रस्य सम्पद''मि-त्युक्त्वा गजे आरोहयामास । ततः सुवर्णादिभूषणैस्तुरगैर्गजैः स्यन्दनैः पत्तिभिः सैन्यैश्च गच्छन् दूराद् रत्नध्वजमपश्यत् । ततो **भरतो मरुदेवा**मवोचत्-''देवि ! देवैः प्रभोः समवसरणं निर्मितम् । तत्र देवानां जयजयारावः श्रूयते । दिवि गम्भीर-मधुरं दुन्दुभि-र्ध्वनति । देवविमानानां महान् किङ्किणीनादः श्रूयते । गन्धर्वाश्च गायन्ति । देवाश्च स्वामिदर्शनहृष्टाः सिंहनादं कुर्वन्ति'' ।

तत् श्रृण्वत्याश्च **मरुदेव्या** जातैरानन्दाश्रुभिर्नेत्रयोर्नीलिका नष्टा। पुत्रस्याऽतिशयान्वितां तीर्थकृल्लक्ष्मीं पश्यन्ती च तन्मया जाता । ततः साऽपूर्वकरणक्रमात् क्षपकश्रेणिमारुह्य युगपत् क्षीणकर्मा केवलज्ञानं प्राप्तवती, गजस्कन्धारूढैव चाऽन्तकृत्केवलित्वेनाऽव्ययं पदं प्रपेदे । एतस्यामवसर्पिण्यामसौ प्रथमः सिद्ध इति देवैः सत्कृत्य तद्वपुः क्षीरोदधौ क्षिप्तम् । तत्प्रभृत्येव च लोके मृतकपूजनं प्रववृते । ततस्तन्मोक्षं विज्ञाय हर्ष-शोकाभ्यां समन्वितो **भरतो** राज्यचिह्नानि परित्यज्य पदातिः सपरिच्छद उत्तरद्वारेण समवसरणं प्रविवेश चतुर्भिर्देवनिकायैः परिवृतं प्रभुं त्रिःप्रदक्षिणीकृत्य मूर्ध्नि बद्धाञ्जलि-र्भक्त्या स्तुत्वा क्रमाद् देवेन्द्रस्य पृष्ठतो निषसाद **भरतः** । तत्र समवसरणे योजनमात्रेऽपि क्षेत्रे तीर्थकरप्रभावात् प्राणिनां कोटिकोटयोऽपि निराबाधं ममुः ।

❀ ❀ ❀

अथ प्रभुः सर्वभाषामय्या पञ्चत्रिंशदतिशयजुषा योजन-गामिन्या गिरा देशनां ददौ । तथाहि-''अयं संसारः सर्वेषां प्राणिनां



कृते आधि-व्याध्यादिज्वालाजटिलः प्रदीप्तगृहतुल्यः । तस्मादत्र विदुषा मनागपि प्रमादो न कर्त्तव्यः । अस्मिंश्चाऽनेकयोनिरूपावर्ता-कुले संसाराब्धौ मानुष्यं जन्म महारत्नमिवाऽतिदुर्लभम् । तच्च मानुष्यकं परलोकसाधनेनैव सफलीभवति । विषयाश्चाऽऽपातमधुराः परिणामदारुणाः । संसारवर्तिनां हि सर्वेषां पदार्थानां संयोगा वियो-गान्ता भवन्ति । आयुर्धनं यौवनं चाऽल्पकालेनैवाऽत्र नश्यन्ति'' ।

अस्मिंश्च चतसृष्वपि गतिषु क्वाऽपि कदाचिदपि सुखलेशो नाऽस्ति। क्षेत्रदोषेण परमाधार्मिकसुरैर्मिथश्च क्लिश्यमानानां नारकाणां निरन्तरं दुःखमेव । शीतादिभिः पीड्यमानानां तिरश्चामपि कुतः सुखम् ? गर्भवासादिजनितविविधदुःखभाजां मनुष्याणामपि न सुखम् । मिथो मात्सर्यादिभिर्दुःखैर्देवा अपि नाऽत्र सुखिनः । अज्ञानाच्च प्राणिनः पुनः पुनरधिसंसारमेव पतन्ति । भव्याः ! तस्मादनेन स्वजन्मना संसारं मा पूपुषत । संसारवासजं विविधं दुःखमालोच्य सर्वप्रकारेण मोक्षायैव यतध्वम् । यतो मोक्षे गर्भवा-सजं प्रसवजं वा दुःखं नास्ति। तत्राऽऽधयो व्याधयो जरा-मृत्यू वा बाधका न सन्ति । किन्तु तत्राऽव्ययमद्वैतं च महानन्दं सुखम् । स च ज्ञान-दर्शन-चारित्रात्मकरत्नत्रितयमाराधयद्भिः प्राप्यते ।

तत्र जीवादितत्त्वानां सङ्क्षेपाद् विस्तरतश्च यथावदवबोधः **सम्यग्ज्ञानम्** । तच्च-मति-श्रुता-वधि-मनःपर्याय-केवलभेदात् पञ्चविधम् । तत्राऽवग्रहादिभेदभिन्नमिन्द्रियानिन्द्रियभवं **मतिज्ञानम्**। पूर्वैरङ्गोपाङ्गैः प्रकीर्णकैश्च बहुधा विस्तृतं स्याच्छब्दलाञ्छितं **श्रुतज्ञान**मनेकविधम् । नारक-देवानां भवप्रत्ययः, शेषाणां क्षायो-पशमिकोऽ**वधिः** षड् विकल्पः । ऋजुर्विपुल इत्येवं **मनःपर्यायो** द्विधा। विशुद्ध्यप्रतिपाताभ्यां च विशेषः । सर्वद्रव्य-पर्यायविषयं विश्वदर्शकमनन्तमेकमतीन्द्रियं **केवलज्ञान**म् ।

श्रुतोक्ततत्त्वेषु रुचिः **सम्यग्दर्शनम्**। तच्च **निसर्गादधिगमाद्वा** जायते । तथाहि-अनाद्यनन्तभववर्तिषु प्राणिषु ज्ञानावरणीय-दर्शनावरणीय-वेदनीया-ऽन्तरायाख्यानां कर्मणां सागरोपमकोटीनां-त्रिंशत्कोट्यः परा स्थितिः, गोत्र-नामकर्मणो विंशतिकोट्यः, मोहनीयस्य सप्ततिकोट्यः परा स्थितिः । तदनन्तरं गिरिणदीपाषाण-घोलनन्यायेन क्रमात् फलानुभवात् सर्वकर्माणि स्वयं क्षीयन्ते । सागरोपमकोटीनामेकोनत्रिंशदेकोनविंशत्येकोनसप्ततिकोटीः क्रमशः कर्मणां स्थितिमुन्मूल्य देशोनावशिष्टैकसागरोपमकोटीकोटौ सत्यां प्राणिनो यथाप्रवृत्तिकरणाद् ग्रन्थिदेशं प्राप्नुवन्ति । ग्रन्थिश्च काष्ठादेरिव सर्वदा दुरुच्छेदो दृढतरो दुर्भेदो रागद्वेषपरिणाम उच्यते । ततो रागादिप्रेरिताः केऽपि निवर्त्तन्ते, अपरे तत्परिणामविशेषात् तत्रैवाऽऽसते । भव्यास्त्वपूर्वकरणेन परं वीर्यमाविष्कृत्य सहसा तं ग्रन्थिमतिक्रामन्ति । ततोऽनिवृत्तिकरणादन्तरकरणे कृते मिथ्यात्वं विरलीकृत्य चतुर्गतिकाः प्राणिन आन्तर्मुहूर्तिकं सम्यग्दर्शनं प्राप्नुवन्ति । तद् **निसर्ग**सम्यग्दर्शनमुच्यते । गुरूपदेशाच्च यत् तत्त्वार्थश्रद्धानं तद**धिगम**सम्यग्दर्शनम् ।

तच्चौपशमिकं सास्वादनं क्षायोपशमिकं वेदकं क्षायिकं चेति पञ्चधा भवति । तत्र कर्मग्रन्थिभेदाद् यदन्तर्मुहूर्त्तं प्रथमः सम्यक्त्व-लाभस्तदौ**पशमिकं** प्रथमम् । उपशमश्रेणियोगत उपशान्तमोहस्य मोहोपशमजं द्वितीयमौ**पशमिकम्** । त्यक्तसम्यक्त्वभावस्य मिथ्या-त्वाभिमुखस्याऽभ्युदीर्णानन्तानुबन्धिकस्य प्राणिनो य उत्कर्षेण षडावलिर्जघन्येनैकसमयः सम्यक्त्वपरिणामस्तत् **सास्वादनम्** । सम्यक्त्वपुद्गलोदयपरिणामवतः प्राणिनो मिथ्यात्वमोहक्षयोपशमात् **क्षायोपशमिकम्** । क्षपकश्रेणिगतस्याऽनन्तानुबन्धिनां क्षये तथा मिथ्यात्व-मिश्रयोः सम्यक् परिक्षये जाते क्षायिकाभिमुखस्य



सम्यक्त्वचरमांशवेदिनो **वेदकम्** । शुभभावस्य प्रक्षीणदर्शनसप्तकस्य प्राणिनः पञ्चमं **क्षायिकं** सम्यक्त्वं जायते ।

तच्च सम्यग्दर्शनं गुणतो रोचकं दीपकं कारकं चेति त्रिविधम् । तत्र श्रुतोक्ततत्त्वेषु हेतूदाहरणादिकं विना दृढश्रद्धानं **रोचकम्** । अन्येषां सम्यक्त्वदीपकं **दीपकम्** । संयम-तपःप्रभृतीनां कारकं **कारक**मुच्यते । तत्र शम-संवेग-निर्वेदा-ऽऽस्तिक्या-ऽनुकम्पारूपैः पञ्चभिर्लक्षणैस्तत् सम्यक्त्वं लक्ष्यते । अनन्तानुबन्धिकषायाणा-मनुदयः **शमः** । स च प्रकृत्या कषायाणां विपाकेक्षणतो भवति । कर्मविपाकं संसारासारतां च ध्यायतो जन्तोर्यद् विषयवैराग्यं स **संवेगः** । ससंवेगस्य जन्तोः ''संसारवासः कारैव, बन्धवो बन्धनान्येवे''त्यादिचिन्ता **निर्वेदः** । एकेन्द्रियादीनां प्राणिनां भवाब्धौ मज्जतां क्लेशं पश्यतो जन्तोर्हृदयार्द्रता, तद्दुःखदुःखित्वं, यथाशक्ति तत्प्रतीकारहेतुषु प्रवृत्तिश्चा**ऽनुकम्पा** । तत्त्वान्तरश्रवणे-ऽप्यार्हततत्त्वेषु निराकाङ्क्षा प्रतिपत्तिरा**स्तिक्यम्** । जन्तोस्तदेतत् सम्यग्दर्शनप्राप्तौ क्षणात् पुरातनं मत्यज्ञानं मतिज्ञानतां, श्रुताज्ञानं श्रुतज्ञानतां विभङ्गज्ञानमवधिज्ञानतां च व्रजेत् ।

सर्वसावद्ययोगविरतिश्च **चारित्रम्** । तच्चाऽहिंसा-सत्या-ऽस्तेय-ब्रह्मचर्या-ऽपरिग्रहभेदात् पञ्चधा । तान्यहिंसादीनि पञ्चभिः पञ्चभिर्भावनाभिर्युक्तानि मुक्तये कल्पन्ते । प्रमादयोगेन त्रसानां स्थावराणां च जीवितव्यपरोपणाभावो**ऽहिंसा** । प्रियं पथ्यं तथ्यं वचः **सत्य**व्रतम् । अप्रियमहितं च तथ्यमतथ्यमेव । अदत्तस्या-ऽनादानम**स्तेयम्** । यतोऽर्था नृणां बाह्याः प्राणाः, अतस्तदपहरणं तन्निहननमेव । दिव्यौदारिककामानां कृता-ऽनुमत-कारितैर्मनो-वाक्कायतस्त्यागो **ब्रह्मचर्य**मष्टादशधा । सर्वभावेषु मूर्च्छायास्त्यागोऽ-**परिग्रह**व्रतम् । यतोऽसत्स्वपि मूर्च्छया चित्तविप्लवो जायते । एतच्च

चारित्रं यतीनां सर्वात्मना, अगारिणां च देशतः कथितम् । गृहमेधिनां च पञ्चाऽणुव्रतानि, त्रयो गुणाश्चत्वारि शिक्षापदानि व्रतानि सम्यक्त्व-मूलानि ।

पङ्गुत्वादिकं हिंसाफलं दृष्ट्वा जन्तूनां हिंसां सङ्कल्पतस्त्य-जेत् । कन्या-गो-भूमिविषयकालीकानि- न्यासापहरणं, कूटसाक्ष्यं चेति पञ्च स्थूलासत्यानि मन्मन-काहल-मूक-मुखरोगित्वादि-फलानि सन्त्यजेत् । दौर्भाग्य-प्रेष्यत्व-दास्याङ्गच्छेद-दरिद्रत्वफल-मदत्तादानं ज्ञात्वा स्थूलस्तेयं विवर्जयेत् । षण्ढत्वे-न्द्रियच्छेदा-दिफलमब्रह्मचर्यं ज्ञात्वा स्वदारसन्तुष्टो भवेदन्यदारांश्च सन्त्यजेत् । असन्तोषा-ऽविश्वासा-ऽऽरम्भदुःखादिफलां मूर्च्छां ज्ञात्वा परिग्रहं सन्त्यजेत् । दशस्वपि दिक्षु कृतायाः सीमाया अनुल्लङ्घनं प्रथमं **दिग्विरत्या**ख्यं गुणव्रतम् । शक्त्या भोगो-पभोगसङ्ख्यानियमो **भोगोपभोगमाना**ख्यं द्वितीयं गुणव्रतम् । आर्त्त-रौद्रापध्यान-पापकर्मोपदेशित्व-हिंसोपकारिदान-प्रमादाचरणरूपः शरीराद्यर्थ-दण्डप्रतिपक्षोऽ**नर्थदण्ड**स्तत्त्यागस्तृतीयं गुणव्रतम् । त्यक्तार्त-रौद्र-ध्यानस्य त्यक्तसावद्यकर्मणश्च या मुहूर्त्तं समता तत् **सामायिक**व्रतम्। दिने रात्रौ च दिग्व्रते कृतस्य परिमाणस्य सङ्क्षेपणं **देशावका-शिक**व्रतमुच्यते । चतुष्पर्व्यां चतुर्थादितपः, कुव्यापारनिषेधो, ब्रह्मचर्यं, स्नानादित्यागः **पौषध**व्रतम् । चतुर्विधाहार-पात्रा-ऽऽच्छादन-सद्मनामतिथिभ्यो दानम**तिथिसंविभाग**व्रतं कथितम् । तदेतद् रत्नत्रयं यतिभिः श्रावकैश्च निर्वाणप्राप्तये सततं सम्यगुपासनीयम् ।

❋ ❋ ❋

अथ **भरता**त्मज **ऋषभसेन** एवं देशनामाकर्ण्योत्थाय **वृषभ**स्वामिनं नत्वा व्यजिज्ञपत्-''स्वामिन्निह भवारण्ये कषाय-दावानलदीपिते नूतनजलधरवदनुत्तरं तत्त्वामृतमवर्षः । जगत्पते ! मज्जद्भिस्तरण्ड इव भवभीतैरस्माभिः प्राप्तोऽसि, दयानिधे ! रक्ष



रक्ष । भवभ्रमणहेतुभिः पित्रादिभिः कृतम् । त्वामेवाऽऽश्रित-वानस्मि, दीक्षां देहि, प्रसीद मयि'' इत्युक्त्वा स **भरत**स्य पुत्राणामन्यैरेकोनपञ्चशतैः पौत्राणां सप्तशत्या चाऽन्वितः प्राव्राजीत् । सुरासुरैर्जिनस्य केवलमहिमानं क्रियमाणं दृष्ट्वा **भरत**तनयो **मरीचि**र्व्रतमग्रहीत् । **भरते**न विसृष्टा **ब्राह्म्य**पि व्रतमग्रहीत् । **सुन्दरी** व्रतं जिघृक्षु**र्बाहुबलि**ना विमुक्ताऽपि **भरते**न निषिद्धा प्रथमा श्राविकाऽभवत् । **भरत**श्च प्रभुपादान्ते श्रावकत्वं प्रतिपन्नवान् ।

तदानीं नर-तिर्यक्-सुरेषु केचिद् व्रतं, केचिच्छ्रावकत्वं, केचिच्च सम्यक्त्वं जगृहुः । **कच्छ-महाकच्छौ** विहाय ते राजन्य-तापसाश्चाऽऽगत्य स्वामिनः पार्श्वे दीक्षां जगृहुः । एवं च तत्प्रभृत्येव **पुण्डरीका**दिभिः साधुभिः, **ब्राह्मी**प्रभृतिभिः साध्वीभिः, **भरता**-दिभिः श्रावकैः, **सुन्दरी**प्रभृतिभिः श्राविकाभिश्च प्रवृत्ता चतुर्विध-सङ्घव्यवस्था धर्मस्य परमास्पदभूताऽद्याऽपि प्रवर्त्तते । तदानीं च प्रभुर्गणभृन्नामकर्मणा**मृषभसेन**प्रभृतीनां चतुरशीतेर्व्रतिनां सर्वशास्त्र-मातृकाभूताम्-''उत्पादो विगमो ध्रौव्य''मिति पदत्रयीं दिदेश । ततस्तत्त्रिपद्यनुसारतश्च ते क्रमाच्चतुर्दशपूर्वाणि द्वादशाङ्गानि च विरचयामासुः ।

अथ शक्रो दिव्यचूर्णपूर्णं स्थालमादाय देवैः परिवृतस्तत्र समुपास्थित । ततः प्रभुरुत्थाय स्वयं यथाक्रमं गणभृतां चूर्णक्षेपं कुर्वन् सूत्रेणाऽर्थेन तदुभयेन च द्रव्यैर्गुणैः पर्यायैर्नयैश्चाऽनुयोगानुज्ञां च ददौ । ततोऽमरा नरा नार्यश्च दुन्दुभिध्वानपूर्वकं तेषु वासक्षेपं चक्रुः । ते गणधराश्च बद्धाञ्जलयः प्रभुवाचं प्रतीच्छन्तस्तस्थुः । ततः सिंहासनमारुह्य पूर्वदिङ्मुखेऽनुशासनमयीं देशनां ददति प्रभौ पौरुषी पूर्णा जाता । अस्मिन्नेवाऽवसरे निस्तुषैर्विशदैरखण्डैस्तण्डुलैर्निर्मित-श्चतुःप्रस्थप्रमाणः स्थालसंस्थितो देवक्षिप्तैर्गन्धैर्द्विगुणसौरभी **भरत**कारितः प्रधानपुरुषोत्क्षिप्तो दुन्दुभिध्वानपूर्वकं ललनाजनैः

प्रौद्गीतमङ्गलमन्वीयमानो बलिः समवसरणे पूर्वद्वारेण प्रविश्य प्रभुं प्रदक्षिणीकृत्य पुरोऽक्षिप्यत । अन्तरिक्षाद् निपततस्तस्याऽर्धमन्तराल एवाऽमरैर्भूमिगतस्य च तस्याऽर्धं **भरते**न, शेषं शेषैर्जनैर्जगृहे । यतस्तस्य बलेः प्रभावतः पूर्वोत्पन्नसर्वरोगाः प्रणश्यन्ति, नवाश्च षण्मासान् यावन्नैव पुनर्जायन्ते ।

अथोत्थायोत्तरद्वारमार्गेण निर्गत्य देवेन्द्रैरन्वीयमानः प्रभू रत्नमय-स्वर्णमयप्राकारयोरन्ते ईशानदिक्स्थिते **देवच्छन्दे** व्यश्राम्यत् । तदानीं गणधरमुख्य **ऋषभसेनो** भगवत्पादपीठस्थो धर्मदेशनां विदधे । गणधरदेशनाया हि स्वामिनः खेदापनयः शिष्यगुणदीपनोभयतः प्रत्ययश्च गुणाः । तस्मिन् गणधरे देशनाविरते सति प्रभुं प्रणम्य सर्वे स्वस्वस्थानं ययुः ।

अथ तत्र तीर्थे समुत्पन्नो वराक्षमाला-शालिधराभ्यां दक्षिणबाहुभ्यां, मातुलिङ्ग-पाशधराभ्यां वामबाहुभ्यां च शोभितो हेमवर्णो गजरथो **गोमुखो** नामा गुह्यकः प्रभोः पार्श्वस्थोऽभूत् । तथा तत्तीर्थोत्पन्ना वरेषु-चक्र-पाशदक्षिणकरा धनुर्वज्र-चक्रा-ऽङ्कुशवामकरा हेमाभा गरुडासनाऽ**प्रतिचक्रा** नाम्नी शासनदेवता च प्रभोः पार्श्वस्थाऽभूत् । ततो महर्षिभिः परिवृतः प्रभुरपि विहर्त्तुमन्यत्र जगाम । विहरतश्च प्रभोर्भक्त्या तरवो नता इव, कण्टका अधोमुखाः, शकुना अनुकूलाः, ऋत्विन्द्रियार्थवायुनां चाऽनुकूलता अभवन् । प्रभोः पार्श्वे च जघन्यतो देवानां कोटिरासीत् । तथा प्रभोः कचाः श्मश्रु-नखाश्च नाऽवर्धन्त । प्रभुश्च यत्राऽगात् तत्र वैर-मारीत्यवृष्टिदुर्भिक्षा-ऽतिवृष्टि-स्वान्यचक्रजभयादीनि नाऽभूवन् । एवं विश्वविस्मयकरैरतिशयैः समन्वितो जीवानुग्रहैकमतिः प्रभुर्वायुवदिमां क्षमां विहरति स्म ॥

*इति प्रथमपर्वणि भगवद्दीक्षा-छद्मस्थविहार-केवलज्ञान-समवसरण-व्यावर्णनात्मकः तृतीयः सर्गः ॥ ३ ॥*

# चतुर्थः सर्गः

इतश्च **भरत**श्चक्रस्योत्कण्ठित आयुधागारं ययौ । तत्राऽऽलोकनमात्रेण चक्रं प्रणनाम । तत्र रजोभावेऽपि भक्त्या रोमहस्तकमादाय तं प्रमृज्य पवित्रैर्जलैः स्नपयित्वा गोशीर्षचन्दनैस्तत्र स्थासकान् दत्वा गन्ध-पुष्प-वस्त्र-भूषणादिभिः पूजयामास । तदग्रे रौप्यैस्तन्दुलैरष्टमङ्गलीं लिखित्वा पञ्चवर्णपुष्पैश्चोपहारं प्रकल्प्य दिव्यचन्दन-कर्पूरमयं धूपं दत्त्वा त्रिः प्रदक्षिणीकृत्य सप्ताष्टपदान्यपसृत्य वामं जानु समाकुञ्च्य दक्षिणं च जानु भूमौ न्यस्य **भरत**स्तं चक्रं नमश्चक्रे । तथा तत्रैव कृतावासश्चक्रस्याऽष्टाह्निकोत्सवं चकार चक्री । तथा तदनुसारेण पौरैरपि महर्द्धिभिश्चक्रपूजोत्सवश्चक्रे ।

अथ तस्य चक्ररत्नस्य दिग्विजयरूपमुपयोगमादित्सुर्नृपो मङ्गलस्नानार्थं स्नानागारं जगाम । तत्राऽऽभरणानि विमुच्य स्नानीयवस्त्रं परिधाय स्नानसिंहासने प्राङ्मुखः समुपाविशत् । ततः कलाविदो मर्दनीया-ऽमर्दनीयस्थानविज्ञाः संवाहकनराः सुगन्धिभिः सहस्रपाकप्रमुखैस्तैलैरभ्यज्य मृदु-मध्य-दृढैः करैश्चतुर्भिर्मांसा-ऽस्थि-त्वग्-रोमसुखकरैश्चतुर्विधाभिः संवाहनाभिर्नृपं संवाहयामासुः । तथा सूक्ष्मेण दिव्यचूर्णेनोद्वर्त्तयामासुः । तदानीं काश्चित् स्वर्णकुम्भान्, काश्चिदिन्द्रनीलमयान्, काश्चिद् दिव्यरत्नमयान् कुम्भान् बिभ्रत्यः स्त्रियः सुगन्धिभिः पवित्रजलधाराभिर्नृपं स्नपयामासुः । ततः कृतस्नानः, कृतदिव्यविलेपनः, शुभ्रवस्त्रशोभितो, ललाटे मङ्गल्यं तिलकं दधत्,

मुक्तामयालङ्कारभूषितः, किरीटशोभितो, वारनारीवीज्यमानचामर-द्वयविराजितः, स्वर्णकुम्भयुतेन श्वेतातपत्रेण शोभितः, सर्वदा समी-पस्थैः प्रतीहारैरिव भक्तैः षोडशभिर्यक्षसहस्रैः परिवारितो वासव ऐरावणमिवाऽत्युत्तुङ्गं **रत्नकुञ्जर**मारोहत् ।

तदा पाणीनुत्क्षिप्य बन्दिवृन्दैर्युगपज्जयजयारावश्चक्रे । दुन्दुभि-स्ताड्यमानो नदन् दिशोऽपि नादयामास । सकलसैनिकाह्वान-सूचकानि मङ्गलान्यपराण्यपि तूर्याणि प्रणेदुः । ततो नृपः सिन्दूरा-लङ्कृतकुम्भैर्गजैरश्वैर्महारथैर्महौजोभिः पत्तिभिश्च सह सैन्योत्थैः पांशुभिर्दिशां वासस्तन्वान इव पूर्वं पूर्वां दिशं प्रति प्रतस्थे । तदानीं यक्षसहस्राधिष्ठितं **चक्र**रत्नं तत्सैन्याग्रेसरं बभूव । ततः **सेनानी**रत्नं **सुषेणो दण्डरत्नधरो वाजि**रत्नमारुह्याऽचलत् । निःशेषशान्तिक-विधौ मूर्तिमान् शान्तिमन्त्र इव **पुरोधो**रत्नं नृपेण सहाऽचलत् । सैन्ये प्रतिशिबिरं दिव्यभोजनसम्पादनसमर्थं जङ्गमा सत्रशालेव **गृहि**रत्नं चाऽचालीत् । तथा स्कन्धावारादि निर्मातुं **वर्धकि**रत्नं, सकल-स्कन्धावारविस्तारसमर्थे **चर्म**रत्न**च्छत्र**रत्ने, ध्वान्तविध्वंसनक्षमे **मणि-काकिण्यौ** रत्ने, भासुरं **खड्ग**रत्नं च नृपेण सह प्रचेलुः ।

ततः स **भरतः** पथि सेनया सहितश्चक्रमनुजगाम । अनुकूलेन पवनेनाऽनुकूलैः शकुनैश्च सर्वतस्तस्य दिग्विजयः सूचितः । सैन्यस्य पुरतो व्रजन् सेनानीर्दण्डरत्नेन विषमं मार्गं सुषमीचक्रे । आकाशं सैन्योत्थरजोभिः पताकाभिश्च व्याप्तम् । **भरत**स्य सा चमूरदृश्यमा-नान्ताऽप्रतिहतगतिर्द्वितीया गङ्गेवाऽलक्षि । तच्चक्रं च गत्वा योजना-न्ते समवास्थित । तत्प्रयाणानुसारेण तत्प्रभृति योजनमानं लोके प्रवृत्तम् । एवं योजनमानेन प्रमाणेन व्रजन् नृपः कतिपयैर्दिव-सैर्**गङ्गा**या दक्षिणतटं प्राप्तः । तत्र च विविधानावासान् विधाय व्यश्रमत् ।



ततोऽहोरात्रे व्यतिक्रान्ते पुनः प्रभाते चक्रं चक्रवर्ती चैकं योजनं जगाम । एवं प्रतिदिनं गच्छन् स **मागधं** तीर्थं प्राप्तवान् । तत्र पूर्वाब्धि-तटे नवयोजनविस्तारं द्वादशयोजनदीर्घं स्कन्धावारं निवेशयामास । तत्र वर्धकिः सैन्यानामावासानेकां पौषधशालां च रचयामास । नृपश्च पौषधशालायामनुष्ठानार्थं गजस्कन्धादुत्ततार । तथा तत्र दर्भसंस्तार-कमास्तीर्य **मागधतीर्थकुमारं** देवं ध्यात्वाऽष्टमभक्तं प्रपेदे । तथा स धौतवस्त्रधरस्त्यक्तसर्वनेपथ्यादिः पौषधमाददे । तस्मिन् दर्भसंस्तारके च पौषधं प्रति जाग्रद् निष्क्रियस्तस्थौ । अष्टमान्ते च नृपः पौषधं पूरयित्वा स्नात्वा च यथाविधि बलिक्रियां चकार । ततः पताका-शस्त्रादिसनाथं रथमारुह्य पाथोधिं प्रति जगाम । तथा स रथेनाऽम्भो-धेरम्भो नाभिदघ्नमवगाह्य पाणिस्थं धनुरधिज्यं विधाय ज्यामाकृष्य टङ्कारं विधाय स्वनामाङ्कितं बाणमिषुधेराकृष्य शिञ्जिन्यां संयोज्या-ऽऽकर्णान्तमाकृष्य बहिर्मध्ये मुखे पुङ्खे च नागासुरसुपर्णादिदेवता-धिष्ठितं तमभि **मागधतीर्थेशं** विससर्ज । स बाणश्च क्षणेन द्वादश योजनान्यतिक्रम्य **मागधेश**स्य सभायामपतत् । **मागधेश**श्चाऽकाण्ड-बाणपातेनोच्चैश्चुकोप । ''कः कुधीरस्माकं सदसि शरं चिक्षेपे''ति वदन् रभसादुत्थाय कोशात् खड्गमाकृष्य व्योम्नि भ्रमयामास । तस्य परीवारोऽपि सकलः सकोपो युगपदुत्थितः । ते स्वं स्वं खड्गादिक-मस्त्रमादाय च'जहि जहि''धर धर''तिष्ठ तिष्ठे'त्यादि सरभसमुच्चेरुः ।

तावदेव तस्य **मागधेश**स्याऽमात्यो बाणं सम्यग् निरूप्य तत्र लिखितानि ''यदि वो राज्येन जीवितेन वा प्रयोजनं, ततः स्वसर्व-स्वोपढौकनपूर्वकं नः सेवां कुरुध्वमिति **वृषभ**स्वामिनः सूनुर्**भरत**-श्चक्रवर्ती साक्षादादिशती''त्यक्षराणि दृष्ट्वाऽवधिना तद् विज्ञाय च राजानं तं बाणं दर्शयन्नुच्चैरुवाच–''भो भो राजलोकाः ! रभस-कारिणो वो धिक् ! **वृषभ**स्वामिनः सूनुर्**भरतो भरत**क्षेत्रे प्रथमश्च-

क्रवर्त्त्यभूत् । स एष दण्डं याचते, वो निजं शासनं च धापयितुमिच्छति । स चक्रवर्त्ती महीतले कथञ्चनाऽपि न जेतव्यः । देव ! ततोऽयं लोको वार्यताम् । दण्डः प्रगुणीक्रियताम् । चक्रवर्ती च प्रणम्यताम्'' ।

तां मन्त्रिवाचमाकर्ण्य तान्यक्षराणि दृष्ट्वा च स शान्तो बभूव। तत उपायनं तं चेषुमादाय **मागधाधीशो भरत**मुपेत्य नत्वा च व्यजिज्ञपत्-''भूपते ! दिष्ट्याऽधुना दृष्टिपथं प्राप्तोऽसि, प्रथमतीर्थकृद् **वृषभस्वामी**व भवान् प्रथमश्चक्रवर्त्ती भुवि विजयते । तव कः प्रतिमल्लो भवतु ? तव धनुर्मुक्तं बाणं कः सहिष्णुः ? प्रसादं कुर्वता त्वया मम प्रमत्तस्य कर्त्तव्यज्ञापनायैव वेत्रधरवदिषुः प्रेषितः। अतः परमहं त्वदाज्ञां शिरोमणिमिव मूर्धनि धारयिष्यामि, स्वामिन्! निश्छलभक्तियुक्तोऽस्मिन् **मागध**तीर्थे त्वयाऽऽरोपितः स्थास्यामि । अहं मम सर्वः परिच्छदश्च तवैव, नः शाधि'' इत्युक्त्वा स तं बाणं **मागध**तीर्थजलं किरीटं कुण्डले च चक्रिणे समर्पयामास । **भरत**श्च तत् सर्वं स्वीचकार, तं **मागधेशं** च सच्चकार । ततो रथं वालयित्वा तेन मार्गेणैव **भरतो** निजस्कन्धावारमगात् । तत्र रथादवरुह्याऽङ्गं सम्मार्ज्याऽष्टमभक्तपारणं चकार सः । तदा **मागधनाथ**स्य महर्द्ध्याऽष्टाह्निकोत्सवं च कारयामास ।

अथाऽष्टाह्निकोत्सवान्ते चक्ररत्नं व्योम्नि प्रस्थितम् । ततः दक्षिणस्यां **वरदाम**तीर्थं प्रति ययौ । धातुमुपसर्ग इव तच्चक्रं **भरतो**ऽप्यन्वगात् । योजनमानेन प्रयाणेन गच्छंश्च क्रमान्मानसं हंस इव स दक्षिणाब्धिं प्रापत् । तत्रैला-लवङ्ग-लतादिसघने दक्षिणाब्धितटे सैन्यानि व्यश्रमयत् । वर्धकिश्च नृपशासनात् पूर्ववदावासान् पौषधशालां च रचयामास । ततो नृपो **वरदामाधीशं** ध्यात्वा पौषधमाददे। पौषधान्ते च पौषधगृहाद् निर्गत्य धनुरादाय स्वर्णरचितं रथमारुह्य रथाङ्गनाभिद्वयसं जलनिधेर्जले गत्वा तस्थौ । तत्र च धनुरधिज्यं



विधाय ज्याटङ्कारं च कृत्वा शरं **वरदामाधिपं** प्रति विससर्ज । स च बाणो द्वादशयोजनीं गत्वोल्केव **वरदामेश**पर्षद्यपतत् । तं पतितं बाणं वीक्ष्य च क्रुद्धो **वरदामेशः** ''केनाऽऽसन्नमृत्युनाऽद्य मम पर्षदि बाणो रभसात् क्षिप्तः? तमनेनैव बाणेन हन्मी''ति ब्रुवन्नुत्थाय तं बाणं पाणिनाऽऽगृहीतवान् । तत्र लिखितान्यक्षराणि **मागधेश**वत् संप्रेक्ष्य नागदमनीं दृष्ट्वा सर्प इवोपशान्तो भृत्यानुपायनान्यानेतुं समादिशत्। ततस्तं शरं दिव्यान्युपायनानि चाऽऽदाय **भरत**मुपगत्वा नत्वा ''अद्य प्रभृति त्वया स्थापितोऽहं स्थास्यामी''ति सम्प्रार्थ्य तं बाणं रत्नमयकटीसूत्रं मुक्ताराशिं च **भरत**स्य पुरतो ढौकयामास सः । **भरत**श्च तत् सर्वं स्वीकृत्य **वरदामेश**मनुगृह्य पुनस्तत्रैव स्थापयामास। तमाभाष्य सप्रसादं विसृज्य च निजं शिबिरं जगाम । तत्र रथादवतीर्य स्नात्वा परिजनैः सहाऽष्टमभक्तान्तपारणं विधाय **वरदामेश**महत्त्वदानायाऽष्टाह्निकोत्सवं चकार ।

अथ प्रतीचीं प्रति ततश्चक्रानुगः **प्रभासं** प्रति प्रतिष्ठमानः कतिपयदिवसैः पश्चिमं पयोधिं प्राप । तत्र क्रमुक-नालिकेरादिमनोहरे तटे स्कन्धावारं निवेश्य **प्रभासनाथ**मुद्दिश्य पूर्ववदष्टमभक्तं पौषधं च जग्राह। पौषधान्ते च रथमारुह्य चक्रनाभिदघ्ने पयोधिजले गत्वा धनुरधिज्यं विधाय टङ्कारशब्दं कृत्वा शरं संयोज्याऽऽकृष्य च **प्रभासेशा**भिमुखं चिक्षेप। द्वादशयोजनीमुल्लङ्घ्य स्वपर्षदि पतितं तं बाणं प्रेक्ष्य **प्रभासेशः** क्रुद्धोऽपि तत्र लिखितान्यक्षराणि संप्रेक्ष्योपाशाम्यत् । ततस्तं बाणमुपायनं चाऽऽदाय गत्वा नत्वा ''सामन्त इव त्वच्छासनं मूर्ध्ना सर्वदा धारयिष्यामी''ति सम्प्रार्थ्य तं शरं कटकानि कटीसूत्रं चूडामणिं वक्षःस्थलमणिं निष्कादि च समार्पयत् सः । **भरत**श्च तत् सर्वं स्वीकृत्य तं तत्रैव स्थापयित्वा स्वस्कन्धावारमागत्याऽष्टमपारणं विधाय **प्रभासदेव**स्याऽष्टाह्निकोत्सवं विदधे ।

अथ प्रकाशोऽनुदीपमिवाऽनुचक्रमनुसरन् **भरत**नृपः **सिन्धो**र्दक्षिणं तीरं प्राप । ततस्तेन तटेनैव पूर्वाभिमुखं गत्वा **सिन्धु**सदनसमीपे स्कन्धावारं निवेश्य **सिन्धुं** ध्यात्वाऽष्टममकरोत् । आसनकम्पनेन च **सिन्धु**देव्यवधिना चक्रवर्त्तिनमागतं ज्ञात्वा प्रभूतैर्दिव्यैरुपायनैरर्चितुमुपाजगाम । ततो जय जयेत्याशीर्वचनपूर्वकं नभःस्थितोचे-'चक्रिन् ? तव किङ्कर्यस्मि, किं करवाणि ?' । ततः साऽष्टोत्तरं रत्नकुम्भसहस्रं, रत्नभद्रासने, बाहुरक्षकान्, कटकान्, मृदूनि दिव्यानि वसनानि च ददौ । नृपश्च स तत् सर्वं स्वीकृत्य प्रसादालापेन तां प्रमोद्य च विससर्ज । ततो नृपः स्वर्णपात्रेऽष्टमभक्तान्तपारणं चकार । **सिन्धु**देव्या अष्टाह्निकोत्सवं च विदधे ।

अथ चक्रेण दर्श्यमानमार्गश्चलन्नृप उदक्पूर्वया दिशा **वैताढ्य**पर्वतं प्राप । तत्र दक्षिणे नितम्बे स्कन्धावारं निवेश्याऽष्टमभक्तं चकार । आसनकम्पनेन च **वैताढ्य**कुमारोऽवधिना **भरत**क्षेत्रजातं प्रथमचक्रवर्त्तिनं ज्ञात्वाऽऽगत्य व्योमस्थः ''प्रभो ! सेवकोऽस्मि ते, शाधि माम्'' इत्युक्त्वा महार्घ्याणि रत्नानि रत्नाभरणानि देवदूष्याणि च भद्राणि भद्रासनानि च समार्पयत् । नृपश्च तत् सर्वं स्वीकृत्य सम्भाष्य च सगौरवं तं विससर्ज । अष्टमभक्तान्तपारणं विधाय च नृपो **वैताढ्य**गिरिदेवस्याऽष्टाह्निकोत्सवं चकार ।

अथ चक्रमनुसरन्नृपति**स्तमिस्रा**गुहां प्राप्य तत्समीपे सैन्यान्यावास्य **कृतमाल**देवं ध्यात्वाऽष्टमतपश्चकार । आसनकम्पनेन च सोऽवधिनाऽऽगतं चक्रवर्तिनं ज्ञात्वाऽऽगत्य ''प्रभो ! अत्र **तमिस्रा**द्वारे तव द्वारपाल इवाऽस्मि'' इत्युक्त्वा स्त्रीरत्नयोग्यं तिलकचतुर्दशं दिव्याभरणानि दिव्यमाल्यवसनानि च राज्ञे समार्पयत् । नृपोऽपि तत् सर्वं स्वीकृत्य सप्रसादं सम्भाष्य च तं विससर्ज । ततो भूमिस्थपात्रैः पारणं विधाय **कृतमाल**देवस्याऽष्टाह्निकोत्सवं चकार ।



अथाऽन्येद्युः **सुषेणा**भिधं सेनापतिमाहूय **भरत**नृपः ''चर्मरत्नेन नदीमुत्तीर्य सिन्धुसागरवैताढ्यसीमानं दक्षिणं **सिन्धुनिष्कुटं** साधय । तत्र बदरीवणवद् म्लेच्छानायुधैस्ताडयित्वा चित्ररत्नसर्वस्वमाहरे''रित्यादिशत् । तत ओजस्वी, तेजस्वी, मनीषी, निम्नानां निष्कुटानां जल-स्थलभुवामन्येषां च दुर्गाणां प्रचारवित्, सर्वम्लेच्छभाषापण्डितः स सेनापतिः शिरसा भर्त्तुः प्रसादमिव शासनमादाय नृपं प्रणम्य स्वावासे गत्वा सामन्तादीन् प्रयाणायाऽऽदिदेश ।

अथ स स्नात्वा भूषणभूषितः, संवर्मितः, कृतमङ्गलो, युद्धार्थं सन्नद्धो, गणनेतृ-दण्डनेतृश्रेष्ठिभिः सन्धिपालचराद्यैश्चाऽऽवृतो, गजरत्नमारुह्य सितच्छत्रचामरैः शोभमानोऽङ्कुष्ठेन गजं प्रेरयन् राज्ञोऽर्धसैन्येन समं **सिन्धु**रोधसि जगाम । तथा स्पृष्टं यद् द्वादश योजनं वर्धते, यत्र प्रातरुप्तानि धान्यानि दिनान्ते निष्पद्यन्ते, यच्च नदी-नद-सागरजलेषु तारणक्षमं, तादृशं चर्मरत्नं चमूपतिर्हस्तेन समस्पृशत् । तच्**चर्म**रत्नं च सहजस्वभावतः सलिले प्रक्षिप्तं तटद्वयं व्याप्य प्रससार । सेनापतिश्च सेनया सह तेन चर्मरत्नेन नदीमुत्तीर्य परं तीरं प्राप । **सिन्धो**र्दक्षिणनिष्कुटं सर्वं सिसाधयिषुश्च चमूपतिर्लीलयैव **सिंहला**न्, **बर्बरा**न्, **टङ्कणा**न्, रत्नमाणिक्यपूरितं **जवनद्वीपं**, कालमुखान् **जोनका**ख्यम्लेच्छानपरानपि **वैताढ्य**पर्वतोपत्यकास्थितान् म्लेच्छान् विजित्य प्रौढप्रतापप्रसरोऽनिवारितं प्रसरन् सर्वां **कच्छ**देशोर्वीमर्यमा दिवमिवाऽऽक्रामत् । एवं सर्वानाक्रम्य चमूपतिः **कच्छ**देशस्य समोर्व्यां **सुस्थ**स्तस्थौ । तत्र च म्लेच्छभूपतयो विचित्रोपायनैः समं भक्त्या समाजग्मुः । केचिद् रत्नस्वर्णराशीन्, केचिद् गजेन्द्रान्, केचिज्जात्यवाजिनः, केचिद् रथान्, तथाऽन्येऽन्यानपि सारान् ददुः । तथा''अतःपरं तवाऽऽयुक्ता इवाऽऽदेशकरा वयं स्वस्वविषयेषु

स्थास्याम'' इति सेनापतिमूचुश्च । ततश्चमूपतिस्तान् नृपान् यथार्हं सत्कृत्य विसृज्य च पूर्ववत् **सिन्धु**नदीमुत्तीर्य म्लेच्छेभ्य आहृतं सर्वं तं दण्डं चक्रिणे उपढौक्य तेन चक्रिणा सप्रसादं सत्कृतो विसृष्टश्च प्रहृष्टो निजावासमगमत् । **भरत**श्च तत्राऽ**योध्या**यामिव सुखमस्थात् ।

अथाऽन्येद्युर्नृपश्चमूपतिमाहूय ''**तमिस्त्रा**याः कपाटद्वय-मुद्घाटये''त्यादिशत् । चमूपतिश्च नृपतेस्तदाज्ञां शिरसाऽऽदाय **तमिस्त्रा**या नातिदूरे गत्वा **कृतमाल**देवं ध्यात्वाऽष्टमतपश्चक्रे । ततश्च-मूपतिः स्नातः परिहितश्वेतवस्त्रः स्नानगृहाद् निर्गत्य **सुषेणः** सौवर्णं धूपदहनं पाणिना बिभ्रत् **तमिस्त्रा**द्वारमागत्य कपाटौ दृष्ट्वा प्रणम्य चाऽष्टाह्निकोत्सवे विदधे । ततोऽखण्डैस्तण्डुलैरष्टमङ्गलीमालिख्य स्वहस्तेन **दण्ड**रत्नमादायाऽऽजिघांसुः सप्ताष्टपदान्यपसृत्य तेन दण्डेन कपाटौ त्रिरताडयत् । कपाटौ च तडत् तडदिति कुर्वाणौ वज्र-निर्मितावुज्जघटाते । ततः सेनापतिरु**दग्भरत**खण्डानां जयप्रस्थान-मङ्गलं कपाटोद्घाटनं राज्ञे व्यजिज्ञपत् ।

ततो नृपो हस्तिरत्नं समारूढ**स्तमिस्त्रा**गुहायामागत्य यक्षसहस्रेणा-ऽधिष्ठितं, सर्वोपसर्गनिवारकं, दुःखरोगादिप्रशमनं, भास्करवदुद्योतकं, चतुरङ्गुलं मणिरत्नमादाय गजस्य दक्षिणे कुम्भस्थले तद् निदधे । चतुरङ्गसेनाभिरनुगतश्चक्रानुगो गुहाद्वारं प्रविश्याऽष्टसुवर्णप्रमाणं, षट्तलं, द्वादशास्त्रिकं, समतलं, मानोन्मानप्रमाणयोगसंयुतमष्टकर्णिकं, द्वादशयोजनान्धकारनाशकमधिकरणीसंस्थानं, यक्षसहस्रेणाऽधिष्ठितं, सूर्यादिप्रभं, चतुरङ्गुलं काकिणीरत्नमाददे । तेन गुहाया द्वयोःपार्श्व-योर्योजनान्ते योजनान्ते धनुःपञ्चशतायामानि प्रत्येकमेकयोजनोद्योत-कारीणि यावच्चक्रिजीवितस्थायीन्येकोनपञ्चाशन्मण्डलान्यालिखन् ययौ नृपः । चमूश्चाऽपि तेषां मण्डलानां प्रकाशेनाऽप्रस्खलिता सुखं सञ्चचार । नृप**स्तमिस्त्रा**या मध्यभागे चो**न्मग्ना**-**निमग्ने** नद्यौ प्रापत् ।



ययोरेकस्यां तुम्बीफलमिव शिलाऽप्युन्मज्जति, अन्यस्यां च शिलेव तुम्बीफलमपि निमज्जति । ते च **तमिस्त्रा**याः पूर्वभित्तेर्निर्गते नद्यौ प्रतीच्या भित्तेर्मध्येन **सिन्धौ** सङ्गच्छतः । ततो वर्धकिस्तयोर्नद्योः क्षणेन पाषाणैः पाणिवत् समतलां वज्रवद् द्रढीयसीं पद्यां निरमासीत् । ततो दुस्तरे अपि ते नद्यौ सुखेनैव ससैन्यो नृप उत्ततार । एवं क्रमाद् गच्छन् नृपः सेनया सह गुहाया उत्तरं द्वारं प्राप्तवान् । तद्द्वारकपाटौ च सरत्सरिदितिशब्दं कुर्वाणौ क्षणात् स्वयमेवोद्घटितौ गुहा-पार्श्वभित्तिभ्यां संश्लिष्य संस्थितौ । ततः प्रथमं चक्रं, ततस्तदनुगो नृपः क्रमशो गजा वाजिनः स्यन्दनाः पत्तयश्च निर्जग्मुः । एवं पञ्चाशद्योजनायामां तां कन्दरामतिक्रम्यो**दग्भरत**वर्षार्धं विजेतुं नृपः प्राविशत् ।

अथ तत्र दुर्मदा आढ्या महौजसो दीप्ता अपरिमितहर्म्यवाहना-दिमन्तोऽनल्पस्वर्णादिद्रव्या-ऽनेकपशु-दासादिपरिच्छदाः प्रायोऽजाता-भिभवा अनेकयुद्धेषु पराक्रमिण **आपाता** नाम्नः किराता निवसन्ति स्म । **भरते** प्रसह्य कृतान्त इवाऽऽगच्छति च तेषामनिष्टशंसिनो भूमिकम्प-दिग्दाह-रजोवृष्टि-दुर्वातोल्कापात-वज्रनिर्घात-काक-चिल्लादि-नभोभ्रमणादिरूपा उत्पाता जज्ञिरे । ते च किराताः ससैन्यं सन्नद्धं **भरत**मागच्छन्तं दृष्ट्वा नितरां चुकुपुः । ते मिथो मिलित्वा ''कोऽयं मृगः सिंहगुहामिवाऽस्मद्विषयमायाति ? एवं क्षणाद् दिशो-दिशि क्षिपाम''इत्युच्चैर्ब्रुवाणा **भरतं** प्रति युद्धायोदतिष्ठन्त । कवच-शिरस्त्राण-कोदण्ड-खड्ग-दण्ड-कुन्त-शूल-मुद्गरादिशस्त्राण्यादाय च **भरतं** प्रति युगपदेवाऽभ्यधावन् । **भरत**स्याऽग्रसैन्येन सार्धं योद्धुं प्रवृत्तास्ते शस्त्राणि सर्वतोऽवर्षन् । **भरत**स्याऽग्रसेनायां स कोऽपि नाऽऽसीद् यः किरातानां शिलीमुखैर्न भिन्नः । म्लेच्छसैन्येन पर्यस्तं **भरता**ग्रहयसैन्यं पश्चादवलत् । चक्रिणः करिणो विरसस्वरं रसन्तस्त्रेसुः। पत्तयो दण्डायुधाहताः पेतुः। गदाघातै रथा अभज्यन्त ।

एवं तस्मिन् समरसागरे नृपचमूनक्रचक्रं म्लेच्छैस्तिमिङ्गिलैरिव ग्रस्तत्रस्तं जातम् ।

अथ सेनां पराजितां पश्यन् **सुषेणः** कोपाद् रक्तमुखनेत्रः सन्नद्धो भूत्वा **कमलापीडा**ख्यं वाजिराजं समारुह्य दैर्घ्ये पञ्चाशदङ्गुलं तीक्ष्णधारमतिदृढं खड्गरत्नमाकाशे भ्रमयन् वाजिनं प्रेरयित्वा विद्विषद्बलं विदार्य समराङ्गणं प्राविशत् । निघ्नति च तस्मिन् चमूपतौ केचन त्रस्ताः, केचन पतित्वा नेत्रे निमील्य स्थिताः, केचनोर्ध्वीभूय विषमस्थानमारुह्य स्थिताः, केषाञ्चिदस्त्राणि केषाञ्चिदातपत्राणि च पेतुः । केषाञ्चित् तुरगा नेशुः, स्यन्दनाश्चाऽभज्यन्त । ते म्लेच्छाः **सुषेणे**न पर्यस्ताः स्वीयानप्यनीक्षमाणा दिशोदिशमात्मप्राणान् गृहीत्वा पलायाञ्चक्रिरे ।

ते वायसा इवैकत्र सम्भूय क्षणमालोच्य च म्लेच्छाः **सिन्धुं** महानदीमुपेत्य तस्याः सैकते सिकतोत्करैः संस्तरान् विधायोपविश्य नग्ना उत्तानाश्च स्वकुलदेवता **मेघमुखान् नागकुमारान्** ध्यात्वा-ऽष्टमतपो व्यधुः । तदष्टमतपोऽन्ते तेषां **नागकुमारा**णामासनानि चकम्पिरे । ततस्तेऽवधिना म्लेच्छानार्त्तान् दृष्ट्वा तदग्रतः प्रादुर्भूया-ऽन्तरिक्षस्थिता ''यूयं स्वप्रयोजनं ब्रूते''ति म्लेच्छान् प्रोचुः । ते च म्लेच्छा **मेघमुखान् नागकुमारान्** नभःस्थितान् दृष्ट्वाऽञ्जलिं बद्ध्वा ''अनाक्रान्तपूर्वमस्मद्देशमधुना कोऽप्याक्रमीत् । स यथा गच्छति, तथा कुरुते''त्यूचिरे । तच्छ्रुत्वा **मेघमुखाः** ''अयं देवादी-नामप्यजय्यो **भरत**श्चक्रवर्ती, चक्री च मन्त्रादीनामगोचरो भवति, तथाऽपि युष्माकमनुरोधेन वयं तस्योपसर्गं करिष्यामः'' इत्युक्त्वा तिरोऽभवन् ।



क्षणाच्चाऽञ्जनश्यामा अम्भोदा नभस्तलं व्याप्नुवन्तो जज्ञिरे । ते च तडित्वन्तो गर्जन्तश्च नृपस्कन्धावारोत्सादायाऽम्भसां धाराभिः प्रवर्षितुं प्रारभन्त । मेघजलेन पूर्यमाणे भूतले च रथा अनाव्यन्त, गजादयोऽनक्रायन्त । आदित्यस्तिरोभूतः, पर्वताः प्रणेशुरिव । तदानीं भूतले एकान्धकारता चैकजलभावश्च युगपद् बभूवतुः । तामुत्पातवृष्टिं प्रेक्ष्य चक्र्यपि चर्मरत्नं स्वहस्तेनाऽस्पृशत् । ततश्च तच्चर्मरत्नं द्वादशयोजनान्यवर्धन्त । जलस्योपरिस्थे च तस्मिन् ससैन्यो राजा तस्थौ । तथा चक्री पाणिना छत्ररत्नमपि पस्पर्श । तच्चाऽपि चर्मरत्नवद् ववृधे । छत्रदण्डस्योपरि च ध्वान्तविध्वंसकृते नृपो मणिरत्नं न्यवेशयत् । छत्र-चर्मरत्नयोस्तत्संपुटं दृष्ट्वा ततः प्रभृति लोके ब्रह्माण्डकल्पना जाता । चर्मरत्ने च प्रभाते उप्तानि धान्यानि गृहिरत्नप्रभावतः सायमजायन्त । तथा कुष्माण्डमूल-कादीनि शाकानि फलद्रुमाश्चूतादयश्च दिवामुखे उप्तानि निशामुखे फलवन्ति जातानि । तानि भुञ्जानाश्च जनाः सैन्यश्रमं किमपि नाऽविदुः । नृपश्च प्रासादस्थ इव तत्र स्वस्थः सपरिच्छदस्तस्थौ । तदानीमश्रान्तं वर्षतां **नागकुमारा**णां तेषां सप्ताऽहोरात्राण्यभूवन् ।

''के पापा ममेदृशमुपसर्गं कर्त्तुमुद्यताः ?'' इति नृपस्य भावं ज्ञात्वा सदा सन्निहिताः षोडश सहस्राणि यक्षाः सन्नद्धाः क्रोधाध्माताः **मेघमुखान् नागकुमारा**नेत्याऽब्रुवन्-''यूयं चक्रिणं **भरते**श्वरं न जानीथ ? तस्मिन्नेवमारम्भो युष्माकमापदे स्यात् । तथाऽपि त्वरित-मपयात । अन्यथा मत्कुणा इव वोऽपमृत्युर्भावी'' । तदाकर्ण्य त्रस्ता **मेघमुखा** देवा मेघबलं संहृत्य ''**भरतं** शरणं गत्वाऽऽश्रयध्व'' मिति किरातानादिशन् । तद्वचनाद् म्लेच्छा भग्नेच्छाः सन्तो **भरतं** शरणायो-पजग्मुः । तथा मणिराशीन् स्वर्णपुञ्जान् लक्षशोऽश्वांश्चोपायने **भरत**स्य नत्वाऽर्पयामासुः। ''अतः परं त्वदाज्ञावशवर्तिनः स्थास्यामो वयम्''

इति प्रार्थयामासुश्च । **भरतो**ऽपि तदुपायनं स्वीकृत्य तान् सत्कृत्य विसर्जयामास । एवं गिरि-सागरान्तं **सिन्धो**रुत्तरनिष्कुटं नृपाज्ञया साधयित्वा **सुषेणः** समाययौ । तत्र भोगान् भुञ्जानो महीपतिश्चिरं तस्थौ ।

अन्यदा नृपस्याऽऽयुधशालाया भास्वरं चक्रं निरक्रामत् । **क्षुद्रहिमव**द्गिरिं प्रति गच्छतस्तस्य मार्गेण नृपोऽपि ययौ । कतिभिः प्रयाणकैः स **क्षुद्रहिमा**द्रेर्दक्षिणं नितम्बं प्राप । तत्र च भूर्ज-देवदार्वादिव्याप्ते वने शिबिरं संस्थाप्य **क्षुद्रहिमवत्कुमार**मुद्दिश्य नृपोऽष्टमं चकार । अष्टमभक्तान्ते च शिबिराद् निर्गत्य वेगतो गत्वा **क्षुद्रहिमा**द्रिं रथशीर्षेण त्रिरताडयत् । तथा वैशाखस्थानकस्थितो नृपो **हिमाद्रिकुमारा**य निजनामाङ्कितं शरं मुमोच । स शरश्च द्वासप्ततिं योजनानि विहायसा गत्वा **हिमाद्रिकुमार**स्य पुरोऽपतत् । स तं शरमालोक्य क्रुद्धोऽपि तं करेण गृहीत्वा तत्र **भरत**नामाऽक्षराणि दृष्ट्वा शशाम । तथा स तं शरमुपायनानि चाऽऽदाय नृपमुपाजगाम । अन्तरिक्षस्थितो नृपाय जय जयेत्युक्त्वा तं शरं देववृक्षपुष्पमालां गोशीर्षचन्दनं सर्वौषधीर्ह्रदजलं बाहुरक्षकान् कटकान् देवदूष्यांशुकानि च समर्पयामास । ''स्वामिन् ! उत्तरदिक्प्रान्ते तवाऽऽयुक्त इवाऽहमस्मी''-त्युक्त्वा विरतो नृपेण सत्कृत्य व्यसृज्यत ।

ततः स ततोऽद्रे रथं वालयामास । **ऋषभकूटा**द्रिं गत्वा च तं रथशीर्षेण त्रिर्हत्वा तत्र रथं स्थापयित्वा पाणिना काकिणीरत्नमाददे । ततोऽवसर्पिण्यां तृतीयारप्रान्ते चक्री **भरतो**ऽस्म्यह''मित्यक्षराणि तत्पूर्वकटके लिखित्वा निजं शिबिरमागत्याऽष्टमभक्तान्तपारणं विधाय **क्षुद्रहिमवत्कुमार**स्याऽष्टाह्निकोत्सवं चक्रे ।

ततः ससैन्यो **भरत**श्चक्रानुगो **वैताढ्य**पर्वतं प्राप । तस्योत्तरनितम्बे शिबिरं सन्निवेश्य **नमि-विनम्या**ख्यविद्याधरेश्वरद्वयं प्रति दण्डयाचकं बाणं मुमोच । तं बाणं विलोक्य तौ विद्याधरेश्वरौ क्रुद्धौ



मिथोऽमन्त्रयताम्-''**जम्बूद्वीप**स्य **भरते** वर्षे उत्पन्नो **भरतः** प्रथमश्चक्री **ऋषभकूटा**द्रौ स्वं नाम लिखित्वा ततो वलितोऽत्राऽऽगतवान् । अस्य **वैताढ्य**गिरेः पार्श्वे कृतशिबिरो जयाभिमानी अस्मत्तोऽपि दण्डजिघृक्षया शरं चिक्षेपे''ति मन्ये । ततस्तयोराज्ञया विद्याधरसैन्यान्युपाययुः । कृतकिलकिलारावा, विचित्ररत्नाभरणा, व्योम्न्यस्खलद्गतय, उदग्दक्षिणश्रेणिस्थभूमिग्रामपुराधिपा, विद्याधरेन्द्रभृत्या **नमि-विनमि**भ्यां सह प्रस्थितवन्तश्च । तौ च सन्नद्धौ युयुत्समानौ **वैताढ्या**दुत्तीर्य **भरते**श्वरमुपाजग्मतुः ।

ततो **भरत**स्तं विद्याधरबलं व्योमन्यपश्यत् । तौ विद्यादृप्तौ विद्याधरेन्द्रौ ''त्वं दण्डमस्मत्तो जिघृक्षसी''ति सोपहासं भाषमाणौ युद्धाय **भरत**माह्वयेताम् । ततो **भरतः** ससैन्याभ्यां ताभ्यां प्रत्येकं युगपच्च विविधैर्युद्धैर्युयुधे । द्वादशवार्षिकेण युद्धेन च जितौ विद्याधरेन्द्रौ प्राञ्जली नृपं प्रणिपत्य ''न कोऽपि त्वत्तः परः शूरः, अज्ञानात् त्वया सह युद्धः कृतः, क्षमस्व, अत्र त्वदाज्ञया दुर्गपालाविव स्थास्याव'' इति समप्रार्थयताम् । ततो विनम्य च **विनमिः** कृताञ्जलिः सालङ्कारां सपरिजनां सर्वाङ्गसुन्दरीं स्त्रीरत्नं **सुभद्रां** स्वदुहितरं **भरता**य समर्पयामास । **नमि**श्चाऽपि महार्घाणि रत्नानि नृपायाऽदात् । ततो राज्ञा सत्कृत्य विसृष्टौ तौ विरक्तौ राज्यानि पुत्रेष्वारोप्य प्रथमजिनपादमूले व्रतं जगृहतुः ।

ततोऽपि प्रस्थितं चक्ररत्नमनुगच्छन् **भरतो मन्दाकिनी**तटं प्राप्य **गङ्गा**सदनस्याऽनतिदूरे सैन्यान्यावास्य **गङ्गां सिन्धु**वदुत्तीर्य सेनापतिना **सुषेणे**न **गङ्गो**त्तरनिष्कुटं साधयित्वाऽष्टमभक्तेन **गङ्गा**मपि प्रासादयत् । **गङ्गा** च राज्ञे रत्नसिंहासनद्वयमष्टोत्तरं रत्नकुम्भसहस्रं च प्रदाय **भरतं** दृष्ट्वा क्षोभं गता प्रेमगद्गदया वाचा तं भृशमभ्यर्थ्य रिरंसमाना सा तं रतिनिकेतनमानीतवती । तया सह विविधान् भोगान् भुञ्जानो नृप एकाहमिव वर्षसहस्रमत्यवाहयत् ।

ततः कथञ्चिदपि **गङ्गां** सम्बोध्याऽनुज्ञाप्य च सबलो **भरतः** **खण्डप्रपाता**भिमुखं चचाल । ततः **खण्डप्रपाता**ख्यगुहां प्राप्य तस्या अनतिदूरे सैन्यं निवेश्य **नाट्यमालं** देवं ध्यात्वाऽष्टमतपश्चक्रे । आसनकम्पनात् सोऽवधिना **भरत**मागतं ज्ञात्वाऽऽगत्योपायनान्यर्पयित्वा सेवां प्रपन्नः । ततो **भरत**स्तत् स्वीकृत्य प्रसादपूर्वकं **नाट्यमाल**सुरं विससर्ज । पारणं कृत्वा तस्य देवस्याऽष्टाह्निकोत्सवं कृत्वा **खण्डप्रपातो**द्घाटनाय **सुषेण**मादिशत् । सेनापतिश्च **नाट्यमालं** ध्यात्वाऽष्टमतपश्चक्रे, पौषधं चाऽग्रहीत् । अष्टमान्ते च पौषधागाराद् निर्गत्य बलिविधिं कृत्वा कृतप्रायश्चित्तकौतुकमङ्गलः स्वल्पनेपथ्यो धूपदहनं दधत् **खण्डप्रपातं** प्राप्य नत्वा पूजयित्वा तत्कपाटेऽष्टमङ्गलीं लिलेख । सप्ताष्टपदान्यपसृत्य कपाटोद्घाटनाय दण्डरत्नमादाय च तेन कपाटमाहतवान्, तत्कपाटद्वयं च विघटितम् । ततो नृपो गजमारुह्य गजकुम्भे मणिरत्नं स्थापयित्वा गुहां प्रविश्य सैन्यैरनुगम्यमानस्तिमिरनाशाय पूर्ववत् काकिण्या मण्डलानि लिखन् ययौ । गुहाप्रत्यग्भित्तेनिर्गत्य प्राग्भित्तिमध्यतो भूत्वा **जाह्नव्या** मिलन्त्यावु**न्मग्ना-निमग्ना**ख्ये नद्यौ मार्गमध्यस्थे प्राग्वत् पद्यया ससेनो ललङ्घे । स्वयमुद्घटितात् तद्गुहादक्षिणद्वाराद् निर्गत्य गुहातो **गङ्गायाः** पश्चिमे तटे स्कन्धावारं निवेश्य निधीनुद्दिश्याऽष्टमतपश्चक्रे ।

ततोऽष्टमान्ते प्रत्येकं यक्षसहस्रेणाऽधिष्ठिता विश्रुता निधयो **भरत**मुपाजग्मुः । ते च **नैसर्पा**द्या अष्टचक्रप्रतिष्ठाना, अष्टयोजनोत्सेधा, नवयोजनविस्तीर्णा, द्वादशयोजनदीर्घा, वैडूर्यमणिकपाटस्थगितमुखाः, काञ्चनाश्चक्र-चन्द्रार्कलाञ्छनाः सन्ति । तेषामेवाऽभिधानैस्तदधिष्ठायकाः पल्योपमायुषो **नागकुमारा**स्तन्निवासिनः सन्ति । तत्र **नैसर्पाद्** शिबिर-पुर-ग्रामादीनां विनिवेशनम् । **पाण्डुकाद्** निधेर्धान्यानां बीजानां मानानां गणितस्य च सर्वस्य सम्भवः । **पिङ्गला**च्च नरादीनामाभरणविधिर्भवति । **सर्वरत्ना**च्च सप्ताऽप्ये-



केन्द्रियाणि सप्त पञ्चेन्द्रियाणि च चक्रिरत्नानि जायन्ते । **महापद्मा**च्च निधेर्वस्त्रादीनां समुत्पत्तिर्जायते । **काला**ख्याच्च निधेर्वर्त्तमानस्य त्र्यब्दभूतभविष्यतीश्च ज्ञानं कृष्यादिकर्माणि च भवन्ति । **महाकाल**निधेश्च प्रवाल-रजताद्याकराणां समुत्पत्तिर्भवति । **माणव**निधेर्योधादिसम्पदो युद्धनीतिर्दण्डनीतिश्च जायते । **शङ्खाद्** निधेश्च चतुर्विधकाव्यादीनां तूर्याणां चोत्पत्तिर्भवति ।

एवं प्रकारास्ते निधय ऊचुः-''**गङ्गामुखमागध**वासिनो वयं त्वद्भाग्यवशीकृतास्त्वामुपागताः, अस्मान् यथाकाममुपभुङ्क्ष्व, प्रयच्छ च । न वयं कदाचिदपि क्षीयामहे'' । ततो निधिषु वशं यातेषु नृपः पारणं चकार । तेषां निधीनामष्टाह्निकोत्सवं च विदधे । **सुषेणो**ऽपि नृपाज्ञया **गङ्गा**-दक्षिणनिष्कुटं साधयित्वा समाययौ । तत्र च **भरतो** लीलया-ऽऽक्रान्तपूर्वापरपयोनिधिर्बहुकालमस्थात् ।

❁ ❁ ❁

अथाऽन्यदा **भरत**स्य साधिताशेष**भरतं** चक्रं गगनस्थितम**योध्यां** प्रति चचाल । **भरतो**ऽपि कृतस्नानो, बलिकर्म विधाय नेपथ्यं धारयित्वा कृतप्रायश्चित्तकौतुकमङ्गलो, गजरत्नमारुह्य नवभिर्निधिभिस्सम्पन्नकोशश्चतुर्दशभिर्महारत्नैः परिवृतो, द्वात्रिंशत्सहस्राभिः परिणीताभिर्नृपकन्याभिस्तावद्भिर्जनपदस्त्रीसहस्रैश्च समन्वितस्तावद्भिर्नृपसहस्रैश्च राजितः, सर्वतोऽप्याहृतैश्चतुरशीतिलक्षगजैस्तावद्भिरश्वै रथैश्च भटानां षण्णवत्या कोटिभिश्च व्याप्तभूतल आद्यप्रयाणदिवसात् षष्टौ वर्षसहस्रेष्वतिक्रान्तेषु सत्सु च चक्रमनुसरन्नचलत् । तत्र तत्र नृपैः समर्पितान्युपायनानि स्वीकुर्वन् पुर-ग्रामादिशोभां पश्यन् शनैः शनै**र्विनीतां** प्राप्तवान् । **विनीता**या नातिदूरे स्कन्धावारं निवेश्य राजधानीं मनसि कृत्वा निरुपसर्गनिमित्तमष्टमतपो विधायाऽन्ते पौषधागाराद् निर्गत्य पारणं चक्रे ।

**अयोध्या**यां च पौरैः पदे पदे तोरणानि बबन्धिरे । कुङ्कुमगन्धसलिलैः पथि पथि सेकश्चक्रे । स्वर्णस्तम्भैर्मञ्चा विदधिरे । एवंविधैः प्रकारैर्हट्टशोभा सम्पादिता । ततो नगरीं प्रवेष्टुकामो नृपो गजरत्नं समारुह्यैकेनाऽऽतपत्रेण धवलेन विराजितश्चामरद्वयवीजितः, सुसूक्ष्मवस्त्राणि वसानो, विचित्ररत्नालङ्कारैरलङ्कृतो, नृपैः परिवारितो, वैतालिकैर्जयजयारावपूर्वकं कीर्त्यमानो, माङ्गल्यतूर्यैः कृतमाङ्गलिकध्वनिः प्रचचाल सः । चिरायातं तं द्रष्टुं ग्रामादिभ्य आगतैर्जनैः सोत्सुकं वीक्ष्यमाणः, कैश्चिन्मुदा स्तूयमानः; कैश्चिच्चामरैरिवाऽञ्चलैर्वीज्यमानः, कैश्चिन्मस्तकस्थाञ्जलिभिर्वन्द्यमानः,कैश्चित् प्रदीयमानाशीः, कैश्चित् प्रणम्यमानः, कैश्चित् समर्प्यमाणफलपुष्पो **भरत**श्चतुर्द्वारां तां पुरीं पूर्वद्वारेण प्रविवेश ।

तदानीं प्रत्येकमपि मञ्चेषु वाद्यान्यवाद्यन्त, सङ्गीतानि चक्रिरे, मुदिताभिः पौरस्त्रीभिर्लाजाः प्रचिक्षिपिरे । पोरैः पुष्पमाल्यानि ववृषिरे, समीपमागत्य फलादीनि समर्पयाञ्चक्रिरे च । तथा मञ्चयोर्मञ्चयोरन्तर्गजरत्नं स्थिरीकुर्वन् प्रवरयोषिद्भिः कर्पूरारात्रिकेणाऽभिनन्द्यमानः सर्वसामग्रीसम्भृतं पितुः प्रासादं **भरतः** समासदत् । तदङ्गणे वेत्रिदत्तहस्तो गजरत्नादवतीर्य षोडश सहस्राणि स्वाधिष्ठायकदेवताः सम्पूज्य विसृज्य च द्वात्रिंशतं नृपसहस्राणि चमूपतिं पुरोहितं गृहपतिं वर्धकिं त्रिषष्ट्यधिकशतत्रयं सूदांश्च व्यसृजत् । तथा श्रेष्ठिनोऽष्टादशश्रेणिप्रश्रेणीदुर्गपालान् सार्थवाहांश्च व्यसृजत् । स्त्रीरत्नेन **सुभद्र**या द्वात्रिंशत्सहस्राभिर्नृपकन्याभिस्तावतीभिर्जनपदाग्रणीकन्यकाभिश्चाऽऽवृतो नाटकाद्युत्सवपूर्वकं नृपः प्रासादं प्राविशत् । तत्र सिंहासने क्षणं प्राङ्मुखः स्थित्वा काश्चित् सङ्कथाः कृत्वा पश्चात् स्नात्वा भोजनं कृतवान् । एवं नाटकैः सङ्गीतैरन्यैश्च विनोदैः कमपि कालं योगैर्योगीव स भूपतिर्निनाय ।



अथ सुर-नरा भक्त्या तं विज्ञपयामासुः-''षट्खण्डा भूस्त्वयाऽसाधि, अधुनाऽस्माभिः क्रियमाणं ते महाराज्याभिषेकमनुमन्यस्व'' । राज्ञा ''तथे'' त्यनुज्ञाताः सुरा नगर्या बहिः पूर्वोदग्दिशि मण्डपं व्यधुः । तथा ह्रदादिभ्यो नानातीर्थेभ्यश्च जलं सर्वौषधीर्मृत्तिकाश्चाऽऽनयन् । **भरत**श्च पौषधशालायां गत्वाऽष्टमतपोऽग्रहीत् । अष्टमान्ते च वारणारूढः सपरिजनो गत्वोन्नतमभिषेकमण्डपमन्तःपुरेण सह प्रविश्य सिंहासनं स्नानपीठं च प्रदक्षिणीकृत्य स्नानपीठमारुह्य तत्रत्यरत्नसिंहासने प्राङ्मुख उपाविशत् । द्वात्रिंशत्सहस्राणि नृपाश्च तं पीठमारुह्य बद्धाञ्जलिपुटा वन्दमाना नातिदूरे भद्रासनेषु तस्थुः। सेनापत्यादयश्चाऽपि तं पीठमारुह्य स्वोचितेष्वासनेषु समासीना बद्धाञ्जलिपुटास्तस्थुः ।

ततो नृपस्याऽभिषेकायाऽऽभियोगिकदेवाः समागत्याऽ**ऽदीश्वरं** वासवा इव ते **भरतं** स्वाभाविकैर्वैक्रियैश्च रत्नकलशैरभिषिषिचुः । ततो द्वात्रिंशत्सहस्राणि ते नृपाः शुभे क्षणे **भरत**मभिषिच्य ''जय, विजयस्वे''ति च वर्द्धयामासुः । सेनापत्यादयश्चाऽपि स्तुवन्तो जलैस्तमभ्यषिञ्चन् । ततस्ते गोशीर्षचन्दनरसैरनुलिप्य मूर्धाभिषिक्ताग्रेसरस्य **भरत**स्य मूर्ध्नि शक्रप्रदत्तमृ**षभ**स्वामिनो मुकुटं निदधुः । ततः कुण्डले मौक्तिकहारार्धहारौ देवदूष्ये वाससी च परिधाप्य स्रजं च कण्ठे प्रचिक्षिपुः । ततोऽमूल्यवस्त्रादिभूषितो **भरतो** वेत्रिपुरुषैराह्वाय्याऽऽयुक्तपुरुषान् ''यूयं हयमारुह्य प्रतिपथं पर्यट्येमां **विनीता**नगरीमशुल्कामदण्डामविशद्भटां द्वादशवर्षं यावद् नित्यप्रमोदां कुरुते''त्यादिशत् । कार्यसिद्धिषु चक्रिण आज्ञा पञ्चदशं रत्नमिति तेऽधिकारिणस्तत्क्षणं तथा चक्रुः ।

ततस्तस्माद् रत्नसिंहासनादुत्थाय नृपैः सह स **भरतः** स्नानपीठादुत्तीर्य गजरत्नमारुह्य निजं प्रासादमागत्य स्नानगृहे निर्मलैस्तोयैः स्नात्वाऽष्टमभक्तान्तपारणं चकार । ततो द्वादशवार्षिके तस्मिन्नभिषेको-

त्सवे सम्पन्ने सति स्नातो विहितबलिः कृतप्रायश्चित्तकौतुकमङ्गलो बहिः सभामण्डपप्राङ्गणं गत्वा तान् षोडश सहस्राण्यात्मरक्षकदेवताः सत्कृत्य विसृज्य च प्रासादवरमारूढो वैषयिकं सुखं भुञ्जानोऽस्थात्।

ततस्तस्य चक्रिण आयुधागारे चक्रं छत्रमसिर्दण्डश्चैतानि चत्वार्येकेन्द्रियाणि रत्नानि जज्ञिरे । काकिणीचर्ममणयो नव-निधयश्च श्रीगृहेऽभवन् । तथा तस्य स्वपुर्यां सेनापतिर्गृहपतिः पुरोधा वर्धकिश्चेति चत्वारि नररत्नानि जातानि । **वैताढ्य**गिरेर्मूले गजाश्वरत्ने उदग्विद्याधरश्रेण्यां स्त्रीरत्नमप्युदपद्यन्त । एवं स दुःसहेन प्रतापेन सूर्य इव, नयनानन्ददायिन्या मूर्त्या सोम इव, समुद्र इवा-ऽलब्धमध्यो, **गङ्गा**दिभि**र्जम्बूद्वीप** इव चतुर्दशभिर्महारत्नैरशोभत। नवनिधयश्च तस्याऽनिशं पादाधस्था अभवन् । स सदा षोडश-भिर्देवसहस्रैः पारिपार्श्वकैरावृतो, द्वात्रिंशत्सहस्रनृपोपासितो, नृप-जनपदादीनां कन्यानां चतुष्षष्टिसहस्रैरनिशमरंस्त । तथा स चक्री त्रिषष्ट्यधिकत्रिशतसूपकारवरैः शोभते स्म ।

एवंभूत स **भरतो**ऽष्टादशभिः श्रेणिप्रश्रेणिभिर्लिपिभिः पृथिवीतले **नाभि**भूरिव व्यवहारं प्रावर्त्तयत । तथा रथ-गज-वाजिनां चतुर-शीतिलक्षैः, ग्रामपत्तीनां षण्णवतिकोटिभिर्विराजमानो, द्वात्रिंशतो जनपदसहस्राणां, द्वासप्ततेः पुरवरसहस्राणां, सहस्रोनद्रोणमुखलक्षस्या-ऽष्टचत्वारिंशत्पत्तनसहस्राणां, कर्बटानां मडम्बानां च चतुर्विंशति-सहस्रसङ्ख्यानां, विंशतिसहस्राणामाकराणां, षोडशखेटसहस्राणां, चतुर्दशसम्बाधसहस्राणां, षट्पञ्चाशदन्तरद्वीपानाम्, एकोनपञ्चाशतः कुराज्यानां **भरत**क्षेत्रमध्येऽन्येषामपि च शासिता स **विनीता**यां स्थितोऽखण्डं राज्यं कुर्वन्नभिषेकोत्सवप्रान्ते स्वीयान् स्मर्तुं प्रववृते ।

ततो निजपुरुषाः षष्टिं वर्षसहस्राणि विरहाद् दर्शनोत्सुकान् निजान् राज्ञोऽदर्शयन् । ततः कृशां म्लानां प्रणष्टलावण्यां



पाण्डुक्षामकपोलां **बाहुबलिनः** सोदरां **सुन्दरीं** नामग्राहं स्वपुरुषैर्दर्श्यमानां स ददर्श । तां तथाविधां प्रेक्ष्य **भरतः** सकोपं स्वायुक्तानवोचत्-"किं मद्गृहे भक्ष्यान्न-पान-फलादीनि न सन्ति ? येनैषा **सुन्दरी**दृशीं दशां गता ? यद्येषा रोगिणी चेद् भिषग्वरा ना सन्ति ? ओषधयो **हिमा**द्रावपि न लभ्यन्ते किम् ? दरिद्रतनया-मिवेमां क्षामां पश्यन् वैरिभिरिव भवद्भिर्वञ्चितोऽस्म्यहम् ।

ततस्ते प्रणम्य **भरतं** प्रोचुः-"देवस्य सर्वमप्यस्ति, किन्तु देवस्य दिग्विजयगमनादारभ्यैषा प्राणत्राणाय केवलमाचाम्लान्येव कुरुते । प्रव्रज्यानिषेधकालाच्चाऽऽरभ्यैषा भावतः संयतैव तिष्ठति"। ततः "प्रविव्रजिषसी"ति **भरते**न पृष्टा सा "एवमेवे"त्युदतरत् । ततो **भरतो**ऽवोचत्-"प्रमादेनाऽऽर्जवेन वाऽहमस्या इयत्कालं व्रतविघ्नकरोऽभवम् । असावेव तातपादानामनुरूपमपत्यं, विषयासक्ता वयं के ? आयुर्विनश्वरतरं जानन्तोऽपि जना विषयैषिणो भवन्ति, अनेनाऽऽयुषा मोक्षसाधनमेव साधु"। ततो मुदितेन राज्ञा व्रतायाऽनुज्ञाता सा तपःकृशाऽप्यकृशेव जाता ।

अत्रान्तरे च विहारक्रमाद**ष्टापद**गिरावागत्य देवकृते समवसरणे देशनां कुर्वाणमृ**षभ**स्वामिनं ज्ञात्वा गिरिपालका द्रुतं **भरता**य विज्ञपयामासुः । तदाकर्ण्य प्रमुदितो नृपो गिरिपालकाय पारितोषिकं दत्त्वा "जिनेश्वरो विहरन्निहाऽऽजगामे"ति **सुन्दरी**मुवाच । तथा तस्या निष्क्रमणाभिषेकं कारयामास । सा **सुन्दरी** कृतस्नान-विलेपना वस्त्रे परिधायाऽलङ्कारान् मुमोच । तथा याचकेभ्यो यथेष्टं प्रदाय श्वेतवस्त्रोपशोभिता सा शिबिकामारुरोह । ततो नरेन्द्रेण सपरिच्छदेनाऽनुगम्यमाना, चामराभ्यां वीज्यमाना, श्वेतच्छत्रोप-शोभिता, वैतालिकैः स्तूयमाना, भ्रातृजायाभिर्गीतमङ्गला, वरस्त्री-भिरुत्तार्यमाणलवणा, पूर्णपात्रैर्विराजमाना **सुन्दरी अष्टापद**गिरिं

प्रापत् । **भरत-सुन्दर्यौ** तम**ष्टापद**गिरिं दृष्ट्वा स्वाम्यधिष्ठितं नितरां मुमुदाते । ततस्तौ तं शैलमारुह्य चतुर्द्वारं समवरणं प्राप्योत्तरद्वारेण तत्र प्रविश्य जिनं त्रिः प्रदक्षिणीकृत्य पञ्चाङ्गस्पृष्टभूमिकौ प्रणेमतुः । **भरत**श्च जिनं स्तुत्वा च पूर्वोत्तरस्यां दिशि यथोचितभुवमुपविवेश । **सुन्दर्य**पि वन्दित्वा स्तुत्वा च दीक्षां याचितवती । जिनेश्वरश्च ''साधु साधु महासत्त्वे'' ! इति तामभिनन्द्य सामायिकसूत्रोच्चारपूर्वकं तस्यै दीक्षामनुशासनात्मिकां देशनां च ददौ । ततः सा मोक्षप्राप्तमिवाऽऽत्मानं मन्यमाना व्रतिनीनां मध्येऽनुज्येष्ठं निषषाद ।

ततो **भरतो** स्वामिनो देशनां श्रुत्वा प्रणम्य चाऽ**योध्या**नगरीं प्रति मुदितो ययौ । अधिकारिभिश्च आगताः स्वजनाः समदर्श्यन्त, अनागताः स्मारिताश्च । ततो **भरते**श्वरोऽभिषेकोत्सवेऽप्यनागतान् भ्रातॄन् प्रति प्रत्येकं दूतान् प्राहिणोत् । ''राज्यानि समीहध्वे चेद् **भरतं** सेवध्व''मिति दूतैः कथितास्ते सर्वेऽपि समालोच्याऽवदन्– ''तातेन नो **भरत**स्य च विभज्य राज्यं दत्तं, ततोऽस्माभिः सेव्यमानो **भरतो** नोऽधिकं किं करिष्यति ? अस्माकं मृत्यु–जरा–व्याधि–तृष्णादीन् हनिष्यति किम् ? बलादस्मद् राज्यं जिघृक्षति चेद् वयमपि तस्य भ्रातर एव, किन्तु तातमविज्ञपय्य तेन योद्धुं नोत्सहामहे'' इत्येवं दूतमुक्त्वा तेऽ**ष्टापदा**चले समवसरणे स्थितं **वृषभ**स्वामिनमुपाजग्मुः । तं च त्रिः प्रदक्षिणीकृत्य शिरसा प्रणम्य बद्धाञ्जलयः स्तुत्वा व्यजिज्ञपन्–''तातपादेन यथार्हं संविभज्य पृथक् पृथक् सर्वेभ्यः राज्यानि दत्तानि, वयं तै राज्यैः सन्तुष्टास्तिष्ठामः, किन्तु **भरतः** स्वराज्येनाऽपहृतैरन्यराज्यैश्च न सन्तुष्यति । सोऽस्माकमपि राज्यान्याच्छेतुमिच्छति । स हि– ''त्यज्यन्तामाशु राज्यानि सेवा वा क्रियतां ममे''ति दूतैरस्मान् परानिवाऽऽदिदेश । वयं कथं तातदत्तानि राज्यानि तद्वचोमात्रेण



त्यजामः? तत्सेवामपि कथं कुर्मः? यतो वयमधिकर्द्धिषु निरीहाः । अतोऽत्र युद्धावसरः समुपस्थितोऽस्ति किन्तु वयं तातपादाननापृच्छ्य न किञ्चित् कर्तुमीश्महे'' ।

ततो जिनेश्वरोऽपि तानादिदेश–''वत्साः ! वीरैर्द्रोहकारिणा वैरिणा योद्धव्यम् । वैरिणश्च राग–द्वेष–मोहकषायाः । सेवा च धर्मस्यैव विधातव्या, यया शाश्वतानन्दकरं पदं सुलभं भवति । राज्यश्रीस्त्वभिमानफलाऽनित्या च । विषयसुखतृष्णा हि न कदाऽपि शमं यात्यङ्गारकारकस्येव । तथाहि–कश्चिदङ्गारकारकः पयोदृतिमादायाऽङ्गारान् कर्तुं शुष्कजले वनेऽगात् । सोऽङ्गाराग्निसन्तापादुद्भूतया तृषयाऽऽक्रान्तो दृतिजलं सर्वं पपौ । तेनाऽप्यशान्ततृष्णः स स्वप्ने गृहं गतो विभिन्नपात्रस्थानि सर्वाण्यपि जलान्यपात् । ततोऽप्यशान्ततृषो वापी–कूप–तडाग–सरित्–सागरादीनप्यपात् । तथाऽपि तृषा न शान्ता । ततः स मरुकूपं प्राप्तो रज्जुभिः कुशपूलं बद्ध्वा जलार्थं तत्र चिक्षेप । कूपस्य दूरजलत्वेन जलानि मध्ये एव गलितानि । ततः स पूलं निश्चोत्याऽपिबत् । या तृषा सागरादिजलैर्न शान्ता, सा कुशपूलजलेन कथं शम्यात् ?'' तद्वद् वः स्वःसुखानुपशान्ता सुखेच्छा राज्यश्रिया कथं शमनीया ? तस्माच्छाश्वतानन्दमयनिर्वाणप्राप्तिकारणं संयमराज्यमेव युज्यते वः । ततस्तेऽप्यष्टानवतिस्तत्कालोत्पन्नसंवेगवेगा जिनपादान्ते प्रव्रज्यां जगृहुः । ततोऽहो ! धैर्यम् ? अहो ! सत्त्वम् ? अहो ! वैराग्यबुद्धिः ? इति चिन्तयन्तो दूता **भरता**य तद्वृत्तान्तं निवेदयामासुः । **भरत**श्च नदीनां जलानि जलधिरिव तेषां राज्यान्यग्रहीत् ।

*इति भरतचक्रोत्पत्ति-दिग्विजय-राज्याभिषेक-*
*सोदर्यव्रतग्रहणवर्णनात्मकः चतुर्थः सर्गः ॥ ४ ॥*

# पञ्चमः सर्गः

अथ ततः सभागृहं प्राप्तो **भरतः सुषेण**सेनापतिना विज्ञप्तः– ''दिग्विजयं कृत्वाऽपि तव चक्रमिमां पुरीमद्याऽपि न प्रविशति'' । ''अद्याऽपि षट्खण्डे **भरते** ममाऽऽज्ञां को न पालयती''ति **भरते**न पृष्टः सचिवः **सुषेणो**ऽवदत्–''आक्षुद्रहिमवद्गिरि **भरत**क्षेत्रं देवेन निर्जितं, किन्तु चक्रस्य पुर्यामप्रवेशेन सूच्यते–'यदस्ति कोऽपि जेतव्योऽधुनाऽपि '। आ ज्ञातं, **बाहुबलि**रेको जेतव्योऽवशिष्यते। तद् विना विलम्बं तज्जयाय यतध्वम्। रोगवत् स्वल्पोऽपि शत्रुर्नोपेक्ष्यः''।

ततो दावाग्नि–मेघवृष्टिभ्यामद्रिरिव सद्यः कोप–प्रशमाभ्यां समन्वितो **भरतो**ऽब्रवीत्–''एकतोऽनुज आज्ञामुल्लङ्घयतीति लज्जाकरं, कनीयसा भ्रात्रा सह युद्धमित्यप्यनुचितं, तेन सङ्कटे पतितोऽस्मि''।

अमात्योऽवोचत्–''ज्यायसा भ्रात्राऽऽज्ञा देया, कनीयसा च सा पालनीयेति सर्वलोकव्यवहारः । अतः सन्देशहारकं प्रेष्य तमाज्ञापय। स चेद् न पालयति, तदा त्वया स प्रशासनीयः। एवं च लोकाचारानतिक्रमान्नाऽपवादस्ते'' । **भरत**स्तथेति प्रतिपद्य **सुवेग**नामानं दूतमनुशिष्य **बाहुबलिं** प्रति प्रैषीत् ।

ततो रथमारुह्य **सुवेगस्तक्षशिलां** प्रति प्रतस्थे । मार्गे च गच्छतस्तस्य वामं नेत्रं पस्पन्दे। अन्यान्यपि चाऽशकुनानि जातानि। तथाऽपि स ग्राम–नगरादीन् लङ्घयन् तरुखण्ड–सरोवरादिषु



कुत्राऽपि विश्राममकुर्वन् श्वापदादिभिर्भयङ्करां सघनां महाटवीं प्राप। तमुल्लङ्घ्य **भरता**ज्ञानभिज्ञं **बहलीदेशं** प्राप्तवान् । तत्र च **तक्षशिला**नगरीं सर्वतः समृद्धिमतीं प्राप्य सिंहद्वारे द्वारपालेन प्रतिषिद्धस्तस्थौ। ''तव ज्येष्ठभ्रातुर्दूतो द्वारि तिष्ठती''ति निवेदितेन राज्ञाऽनुमतः स **सुवेगो** वेत्रिणाऽन्तः प्रावेश्यत । स च प्रविश्य सपरिजनपरिच्छदं रत्नसिंहासनासीनं तेजसा दैवतमिव **बाहुबलि**नं सविस्मयं ददर्श। ततो नृपं प्रणम्य तत्प्रदर्शिते आसने स उपाविशत्।

ततो **भरता**दिविषयकं कुशलादिप्रश्नं विधाय नृपे तूष्णीके जाते कृताञ्जलिः **सुवेगो** जगाद–''**भरता**धीशः षट्खण्डां पृथिवीं शासदखण्डिताज्ञः सपरिच्छदपरिजनः कुशली, तथाऽप्यन्तर्न प्रमोदते । यो दरिद्रोऽपि कुटुम्बेन सेव्यते, स ईश्वरः । षष्टिवर्ष-सहस्रान्तादागतः स कनीयसां युष्मदादीनामागमनमार्गं निरीक्षते। तत्र सर्वे समाययुः । **भरत**स्य महाराज्याभिषेकं च चक्रुः, किन्तु पार्श्वे निजाननुजानपश्यन् बलवदुत्कण्ठातस्तानाह्वातुं दूतं प्रैषीत् । तत्र केचिद्**भरत**स्य समीपमनागम्य जिनेश्वरपादान्ते दीक्षां जगृहुः । तैः तस्य भ्रातृवात्सल्यलालसा न पूर्यते, भ्रातरि स्नेहश्चेत् तव तर्ह्येहि, नृपस्य हृदयप्रमोदं देहि । गुरौ शूरैरपि सभयैरिव वर्त्तितव्यम् । चक्रवर्त्ती हि नृपैरवश्यं सेवनीयः। स्वस्य वीरमानितया चक्रवर्तिनो-ऽवमाननं न शुभाय। तस्यैकः सेनापतिर्दण्डपाणिः **सुषेणो**ऽपि न केनाऽपि सोढुं शक्यस्तर्हि **भरत**स्य चक्रधरस्य का कथा ? नृपा ह्याज्ञासारा ज्ञातिमपि न त्यजन्त्याज्ञाभङ्गे सति । तस्मात् तेजसा वयसा च श्रेष्ठो ज्येष्ठश्च स राज्यकामेन त्वयाऽवश्यं सेवनीयः'' ।

एतच्छ्रुत्वा **बाहुबलि**रुवाच–''साधु दूत ! त्वं वचनचतुरोऽसि। कथमन्यथा मदग्रेऽपीत्थं वक्तुं समर्थः ? ज्यायसस्ताततुल्यस्य भ्रातुः कनीयसि स्नेहो युज्यत एव । किन्तु महाविभवः सोऽल्पविभवैर-

स्माभिरागतैर्लज्जिष्यते । तस्मादस्माकं तत्र गमनं नोचितम् । कनिष्ठाश्चाऽन्ये भ्रातरो 'ज्येष्ठेन भ्रात्रा युद्धमनुचित'मिति तातपादाननुययुः । अहं तु न तथा भ्रातृविनयी । गुरुर्हि गुरुगुणैर्हीनो लुब्धश्च न विनयास्पदम् । तस्य सेनानीः स स्वयं वा न मम तेजस्विनो भयायाऽलम् । स हि **भरतो** बाल्ये पादयोर्गृहीत्वा गगने प्रक्षिप्तो दूरं गत्वा भुवि पतन् 'प्राणहीनो मा भू'दिति मया पुष्पवद् गृहीतः, तत् तेन न विस्मर्तव्यम्। ततो याहि दूत !, **बाहुबलि**र्न कस्याऽपि सेवको भविता" ।

ततो मनसि क्षुब्धोऽपि धैर्यमालम्ब्य समुत्थाय च **सुवेग**स्तस्मात् सभाभवनाद् निर्गतः । तथा क्रुद्धस्य **बाहुबलि**नस्तारशब्दानुमानतः सैनिकैः पदे पदे स्वमृत्युमिव पश्यन् सत्वरं सिंहद्वाराद्निर्ययौ । त्वरितं रथमारुह्य च "अन्यनृपसामान्यां सेवां कारयितुं **बाहुबलि**नमाह्वयति **भरतः** । तस्य चक्रवर्तित्वाभिमानोऽत्रैव संचूर्णयिष्यते" इत्येवमादि नागराणां कर्णकटुसम्भाषणं शृण्वन्नगराद्निर्जगाम । गच्छंश्च जनपदे सर्वत्र **भरत-बाहुबलि**नोर्विग्रहकथामशृणोत् । सर्वत्र च **बाहुबलौ** नृपे भक्तिमतो मिथः स्पर्धयेव जानपदान् जनान् युद्धाय सज्जीभवतो ददर्श । तेषां ससंरम्भं युद्धोद्योगं पश्यन् **सुवेग**श्चिन्तयामास-"अत्र सर्वे रणाय त्वरन्ते, कोऽपि तादृशो नाऽस्ति, यो युद्धाय न सज्जति । **बाहुबलि**सैन्याग्रे चक्रिसैन्यं लघ्विव प्रतिभाति । अस्य **बाहुबलि**नोऽग्रे चक्रमपि विफलमेव मन्ये । ततोऽनेन विरोधिता दुष्परिणामा । सति च युद्धे दूतभावेनाऽत्राऽहमेव दूषितः स्या"मित्येवमादि चिन्तयन् स कतिपयैर्दिवसै**र्विनीतां** प्राप्य द्वारपालेन सभायां नीतः प्रणम्योपविष्टश्च चक्रिणा पृष्टः-"किं मदनुजो **बाहुबलिः** कुशली ? यत् त्वं शीघ्रमेव प्रत्यागतोऽसि, तेन क्षुभितोऽस्मि" ।



ततः **सुवेगो** जगाद-"त्वदनुजस्य **बाहुबलि**नो देवोऽप्यकुशलं कर्तुं न क्षमः । त्वत्सेवार्थं सविनयं स मयोक्तः, किन्तु स न मन्यते । स त्रैलोक्यमपि तृणाय मन्यते । तथा ममोपेक्षयैव **भरतो भरत**क्षेत्रषट्खण्डमग्रहीदिति कथयति, सेवायास्तत्र का वार्ता ? प्रत्युत रणायैव स देवमाह्वयते । स, तस्य कुमाराः, सामन्ता, मन्त्रिणः, पौरा, जानपदा, वनेचराश्च सर्वे एव मानिनोऽन्यविक्रमं सोढुं न प्रभवन्ति । अलं बहूक्तेन, स वीरो नोत्कण्ठया, किन्तु युयुत्सया त्वां दिदृक्षते । अतः परं देवः प्रमाणम् । दूता न मन्त्रिणः, किन्तु सत्यसन्देशवक्तारः"।

ततो युगपद् विस्मयामर्षसमन्वितो **भरतो**ऽब्रवीत्-"सुरासुरादिषु कोऽपि न तत्तुल्यः, एतच्च शिशुक्रीडास्वनुभूतमेव । स त्रिलोकीमपि तृणाय मन्यत इति वास्तवमेव । तेनाऽनुजेनाऽहं सर्वथा श्लाघ्योऽस्मि । स न कस्याऽपि वश्यो भवितुमर्हति । तस्य दुर्विनयानप्यहं सहिष्ये । यदि लोका मामसमर्थं वदिष्यन्ति, वदन्तु। तादृशो हि भ्राता सर्वथा दुर्लभः । मन्त्रिणः किं तूर्ष्णीं स्थिताः? ममैष विचारो युक्तो नवेति ब्रुवन्तु" ।

ततः सेनापति**र्भरत**स्य क्षमया **बाहुबले**रविनयेन चाऽप्रीत उवाच-"**ऋषभ**स्वामिनः सूनोस्तव क्षमा युज्यत एव, किन्तु सा करुणापात्रे, नाऽन्यत्र । यो यस्य ग्रामेऽपि वसति, स तस्याऽधीनो भवति । अयं तु देशमपि भुञ्जानो वचनेनाऽपि न वशे तव । तेजोवधविधायकश्च भ्राता न भ्राता मतः । राजानो हि सर्वथा स्वतेजो रक्षन्ति । तेजोरक्षणायैव च षट्खण्डविजयस्त्वया कृतः । एकत्राऽपि तवाऽविजयो **भरत**क्षेत्रविजयं लोपयति । एकत्राऽपि हि लुप्तशीला सत्यसत्येव कथ्यते । किं च, नहि चक्रिणः प्रतिस्पर्धी

राजा दृष्टः श्रुतो वा ? । तवाऽविनीते च भ्रातरि स्नेह एकहस्तेन तालिकावादनमिव प्रतिभाति । एवं वदतोऽस्मान् देवो निषेधति चेद् निषेधतु । सर्वविजयाभावादेव चक्रमद्याऽपि बहिः स्थितम् । तस्माद् भ्राताऽप्यवशो नोपेक्षार्हः" ।

ततो नृपाशयमालोच्य मन्त्री जगाद–"सेनानीर्यदुक्तवान् तद् युक्तमेव । अयमपि रत्नमेव । अतोऽसमग्रविजयेन कथं तुष्यतु ? तस्माद् देवाज्ञया प्रयाणभेरी ताड्यताम् । देवश्च **तक्षशिलां** प्रति प्रयाणं विदधातु । स्वामी स्वयं गत्वा **सुवेगो**क्तं सत्यमसत्यं वेति परीक्षताम्" ।

ततो **भरत**स्तेषां युक्तं वचः स्वीकृत्य शुभे दिने यात्रिकमङ्गल-पूर्वकं प्रयाणाय गजरत्नमारुरोह । प्रयाणतूर्याणां नादैश्च सर्वाणि सैन्यानि मिलितानि । ततो नरेन्द्र-मन्त्रि-सामन्त-सेनापतिभिः परिवारितो नृपो नगराद् निर्ययौ । यक्षसहस्राधिष्ठितं चक्रं च **भरत**स्य पुरःसरमभूत् । पुर-ग्रामादौ च लोकाः केचिद् "**भरत**स्य **बाहुबलिं** प्रति प्रयाणं न युक्तं, यतोऽनुजो जितोऽनुजेन वा जित इत्युभयथाऽपि महीपतेरयश एवे"त्यूचुः । नृपश्च चक्रानुगो गच्छन् कतिपयैर्दिवसैः सूर्योऽन्यराशिमिव **बहली**देशमासदत् । तस्य देशस्य प्रवेशप्रदेश एव शिबिरं निवेश्याऽवतस्थे च । **बाहुबलि**रपि चरपुरुषै**र्भरत**मागतमज्ञासीत् ।

❀ ❀ ❀

अथ **बाहुबलि**रपि प्रयाणवाद्यमवीवदत् । कृतयात्रिकमङ्गलो गजमारुरोह च । स देवैरिन्द्र इव नृपैः कुमारैः सचिवैरन्यैरपि भटैश्च परिवव्रे । तथा गजाश्व-रथ-पदाति-सैन्यानि च तत्र लक्षशः समीयुः । ततः स तैरोजस्विभिरुदायुधैः सैन्यैः पृथ्वीं वीरमयीमिव कुर्वन् चचाल । शीघ्रं च दूरमपि स्वदेशसीमानं प्राप्तो **गङ्गा**तटे **भरत**शिबिरादनतिदूर एव स्वशिबिरं निवेशयामास । प्रातश्च चारणै-**र्भरत-बाहुबली** अन्योन्यमतिथी इव युद्धोत्सवाय निमन्त्रयामासतुः ।



ततो रात्रौ **बाहुबलि**र्नृपाद्यनुमत्या स्वसुतं **सिंहरथं** सेनापतिं चक्रे । तस्य मूर्ध्नि स्वयमेव रणपट्टं निवेशितवान् सः । ततः **सिंहरथो बाहुबलिं** प्रणम्य निजावासं ययौ । तथा **बाहुबलि**रन्यानपि नृपान् रणार्थमादिश्य व्यसृजत् ।

इतश्च **भरतो**ऽपि नृप-सामन्ताद्यनुमत्या **सुषेणा**य युद्धदीक्षामदात् । स च **भरता**ज्ञामादाय निजावासमियाय । तथा **भरतो** नृप-सामन्ता-दीनाहूय युद्धार्थमेवमादिशत्–"भवद्भिरयं **सुषेणः** सावधान-महमिवाऽनुसर्त्तव्यो युद्धे । भवद्भिश्च बहवो नृपाः किरातादयश्च वशंवदा विहिताः । किन्तु ते **बाहुबलि**पदातितुल्या अपि नाऽऽसन् । **बाहुबले**रेकोऽपि ज्येष्ठः पुत्रः **सोमः** समीरस्तूलानीव सैन्यान्युत्क्षेप्तुं समर्थः । तस्य कनिष्ठः **सिंहरथ**श्च बलेनाऽकनिष्ठ एव । किं च **बाहुबले**रपरेऽपि पुत्र-पौत्रादयः प्रत्येकमक्षौहिणीमपि जेतुं समर्थः । तथा तस्य सामन्तादयः सैन्यानि चाऽन्यनृप-सेनापतितुल्यानि । तस्य व्यूहोऽपि युद्धे वज्रवदभेद्यो भवति । तस्माद् भवन्तः सर्व एवा-ऽभिगच्छन्तं **सुषेण**मनुगच्छन्तु" । तदा **भरत**स्याऽमृतोपमवचसा सर्वे ते हर्षात् प्रमुदिता नृपेण विसृष्टाः स्वस्वावासं ययुः ।

अथ **भरत-बाहुबल्यो**र्द्वयोरपि वीरा रणमुद्दिश्य ससज्जुः । ते स्वानि स्वानि कृपाण-चापादीन्यायुधानि देवानिवाऽऽनर्चुः । शस्त्राग्रे तूर्याणि वादयामासुः । ते स्वशरीराणि सुरभिभिरुद्वर्त्तनैर्मार्जयामासुः । ललाटेषु कस्तूरीमिश्राणि तिलकानि चक्रुः । प्रातर्भावियुद्धकथया च सैन्यद्वयेऽपि केऽपि निद्रां नाऽऽपुः । क्रमात् प्रभाते सूर्योदये च जाते द्वयोः सैन्ययो रणतूर्याणां महान् प्रणादोऽभूत् । तेन रणतूर्येण प्रेरिता उभयपक्षयोः सैन्याः सन्नद्धा बभूवुः । तदानीं विश्वं समन्ता-दुत्थितैस्तुमुलैः शब्दमयमिव, सर्वतः प्रेङ्खद्भिरायुधैर्लोहमयमिव चाऽऽसीत् । वैतालिकाश्च प्रतिगजं प्रतिरथं प्रत्यश्वं च वीराणा-

मुद्दीपनाय पूर्वेषां वीरपुरुषाणां चरित्राणि स्मारयन्तो युद्धफलं कथयन्तो भ्रेमुः ।

अथ **बाहुबलिः** स्नात्वा देवागारे देवमर्चितुं प्रययौ । तत्र **ऋषभ**स्वामिप्रतिमां भक्त्या गन्धवारिभिरस्नपयत् । दिव्यया गन्ध-काषाय्या तां ममार्ज । यक्षकर्दमेन प्रतिमाया विलेपनं च चकार । तथा स विचित्रैर्माल्यैर्जिनमानर्च । सौवर्णे धूपदहने दिव्यं धूपं ददाह। ततः कृतोत्तरासङ्गो दीप्रप्रदीपकमारात्रिकं गृहीत्वोत्तार्य च प्रणम्य कृताञ्जलिः स्तुत्वा पुनर्नत्वा च देवागाराद् निरगात् । तथा वज्रकवचं परिधाय शिरसि शिरस्त्राणं निधाय पृष्ठे लोहनाराचपूरितौ तूणीरौ बद्ध्वा धनुरादाय पुरोहितैः स्वस्तीत्याशास्यमानो गोत्रवृद्धाभिर्जय-जयेत्युच्यमान, आप्तैर्नन्द-नन्देत्यभिनन्द्यमानो, बन्दिभिर्जय-जयेत्युच्यमानश्च महागजमारुरोह सः ।

इतश्च **भरतो**ऽपि देवागारं गत्वा **युगाधीश**स्य प्रतिमां स्नपयित्वा, देवदूष्येण मार्जयित्वा, गोशीर्षचन्दनैर्विलिप्य, विकस्वरैः कमलैरर्चयित्वा, धूपं धूपयित्वा, आरात्रिकमुत्तार्य, नमस्कृत्य बद्धा-ञ्जलिः स्तुत्वा, भक्त्या पुनर्नत्वा च देवागाराद् निरीय कवचमङ्गे निवेश्य, शिरस्त्राणं शिरसि निधाय, पृष्ठे तूणीरौ बद्ध्वा, वामहस्तेन धनुरादाय च बन्दिवृन्दैः स्तूयमानः सो गजरत्नमारुरोह ।

ततो द्वावपि **भरत-बाहुबली मागधे**भ्यो द्रव्याणि प्रयच्छन्तौ, निजान् सैन्यान् पश्यन्तौ, बाणं बिभ्राणौ, रणवार्त्तां च कुर्वाणौ स्वस्वसैन्यमध्यमाजग्मतुः । ततस्तयोः सैन्ये समपदन्यासं चेलतुः । केतुचिह्नैरुपलक्ष्य नामग्राहं प्रतिवीरान् वृण्वन्तोऽन्योन्यमाह्वयमाना द्वयोः सैन्ययोरग्रसैन्या अग्रसैन्यैरमिलन् । यावच्च गजिनो गजिनां, सादिनः सादिनां, रथिनो रथिनां, पत्तयः पत्तीनां, प्रासं प्रासस्या-



ऽसिमसेर्मुद्गरं मुद्गरस्य, दण्डं दण्डस्य चाऽऽमर्षाद् मेलयन्तः सैन्या डुढौकिरे, तावद् नभसि सम्भ्रान्ता गीर्वाणाः समुपागमन् ।

ते च देवा ''भ्रात्रो**र्भरत-बाहुबल्यो**र्विग्रहो नोचित'' इति विचारयन्तो द्वयोः सैनिकान् प्रोचुः-''यावद् युष्माकं स्वामिनौ **भरत-बाहुबली** बोधयामस्तावद**ृषभ**स्वाम्याज्ञया भवद्भिर्न योद्धव्यम्'' । तच्छ्रुत्वा ते सैनिका उभयेऽपि चित्रलिखिता इव तथैव तस्थुः । इमे देवा **भरत**तो **बाहुबलि**तो वेति चिन्तयामासुश्च ते सैनिकाः । देवाश्च ''कार्यं किमपि न नष्टं, सम्प्रति लोकाय भद्र''मिति ब्रुवाणाः प्रथमं चक्रिणमुपाजग्मुः ।

ततो जय-जयेत्याशीर्वादं दत्त्वा तमूचुः-''चक्रिन् ! षट्खण्डे **भरत**क्षेत्रेऽप्रतिभूपो भूपो भवान्, किन्तु स्वभ्रात्रा युद्धं तु स्वहस्तेन स्वहस्तस्य ताडनमेव । किं च युवयोर्युद्धं जगतां नाशायैव सम्पद्येत । करुणावरुणालयस्य **वृषभ**स्वामिन आत्मजयोर्युवयोर्युद्धं सुधाकर-करादग्निवृष्टिरिवाऽत्यन्तमनुचितम् । तस्मादस्माद् घोरात् सङ्ग्रामाद् विरम । निजं निकेतनं व्रज । त्वयि याते तवाऽनुजोऽपि यास्यति । युवाभ्यामुभयेभ्यः सैन्येभ्यश्च शुभं भवतु । भवतोर्युद्धविरामेण जगन्त्यपि सुखं तिष्ठन्त्वि''त्युदित्वा विरतेषु देवेषु **भरत** उवाच-''इमां विश्वहितां वाचं भवतो विनाऽन्ये के ब्रूयुः? किन्तु युद्ध-कारणमन्यथा, भवद्भिश्चाऽन्यथा विचारितम् । **भरत**क्षेत्रे न कोऽपि प्रतिमल्लो मम । **बाहुबलि**स्त्वहमेव । भाग्यवशादेव पृथग्जन्म । स मां प्रति सदैव विवेकी विनयी च । किन्तु स मम राज्याभिषेके नाऽऽगतवान् । ततो दूतः प्रेषितः, स्वयं च लोभ-कोपाभ्यां विना-ऽऽहूतः । तथाऽपि नाऽऽगतवान् । तमन्यादृशमिव जातं वीक्षे । एतच्चक्रं चैकस्मिन्नपि तस्मिन्ननागतेऽन्तर्न प्रविशति । अतः स मम भ्रातैकवारमप्यायातु । अन्यामप्यूर्वीं गृह्णातु । अनुजेन नतेनाऽनतेन

वा न मम मानवृद्धि-ह्रासौ। किन्तु चक्राप्रवेश एव युद्ध कारणं वर्तते"।

ततो देवाः पुनरुचुः-"राजन् ! अल्पेन कारणेन भवादृशां महायुद्ध- प्रवृत्तिर्नोचिता । वयं **बाहुबलि**मुपेत्य बोधयामः। भवानिव सोऽपि यदि किमपि महत् कारणं युद्धस्य कथयेत्, तथाऽप्यधमयुद्धं न कर्त्तव्यम् । अन्यथा निरपराधानां गजादीनां वधपातकेन लिप्येयाथां युवाम्" । 'तथे'ति **भरते** प्रतिपन्ने देवा **बाहुबलि**नमुपाजग्मुः ।

ततोऽधृष्यमूर्तिं तं दृष्ट्वा ते देवाः प्रोचुः- "**बाहुबले** ! चिरं जय, चिरं नन्द । त्वं मर्यादापालको विनीतश्चाऽसि । त्वमपरस्या-ऽप्युच्छेदाय कदाऽपि न प्रवृतः, तज्ज्येष्ठे भ्रातरि भयङ्करोऽयमारम्भो-ऽमृतात् पञ्चत्वमिव कथं सम्भाव्यते ? तत् खलमैत्रीमिव युद्धसंरम्भं त्यज। ज्येष्ठे भ्रातरि प्रणतो भव। तेन हि नितरां श्लाघ्यसे। **भरतो**-पार्जितं चेदं षट्खण्डं **भरत**क्षेत्रं स्वोपार्जितमिव भुङ्क्ष्व । नहि युवयोः किमप्यन्तरमस्ति" ।

ततो **बाहुबलि**राह-"देवाः ! यूयं युद्धे हेतुमज्ञात्वैव वदथ । दीक्षासमये तातो देशान् विभज्याऽस्मभ्यं **भरता**य चाऽदत्त । स्वस्वदेशेन वयं सर्वे सन्तुष्टाः स्म । **भरत**श्चाऽसन्तुष्टः सर्वेषां राज्ञां राज्यानि स्वाधीनीकृतवान्। तैरप्यसन्तुष्टः स स्वानुजानां राज्यान्या-चिच्छेद । भ्रातॄणां पितृदत्तराज्यापहरणेन ज्येष्ठत्वं तेन स्वयमेवा-ऽपाकृतम् । न वयसा गुरुर्भवति, किन्त्वाचारतः । अधुनाऽसौ राज्यकृते मामप्याह्वयते । ममाऽनुजाश्च लुब्धं ज्ञात्वैनं नाऽभजन् । तर्ह्यहं केन गुणेनाऽस्याऽधीनो भवानि ? यदि स स्वविक्रमेण मामधीनं करोति, करोतु। एष क्षत्रियाणां पन्थाः। एवं स्थितेऽपि यदि स पश्चाद् याति, सुखेन यातु, न मम तस्येव लोभः । यदि वैभवान्धः स्यात्, सुखेन न तिष्ठेत्। तस्य सर्वं वैभवं मया हृतमेव जानीथ। ततस्तस्य हितेच्छवो यूयं तं **भरत**मेव युद्धाद् निवारयत। अयुध्यमानेन हि नाऽहं जातुचिद् युध्ये" ।



तद्वचः श्रुत्वा पुनरपि देवा ऊचुः-"चक्राप्रवेशनं हेतुं कृत्वा युद्धाय प्रवर्त्तमानो **भरतः**, युध्यमानेन युध्येऽहमिति प्रतिजानानो भवांश्च न केनाऽपि निरोद्धुं शक्यः । ततो द्वयोरार्षभ्योर्जगत्त्रात्रोरयं युद्धोत्पातो जगत्क्षयायैवोपस्थितः । तथाऽप्युत्तमेनैव युद्धेन योद्धव्यं नाऽधमेन, उग्रतेजसोरुभयोरधमयुद्धे बहूनां लोकानां नाशादकाल एव प्रलयो भवे"दिति । तेन तथेति स्वीकृते देवा नाऽतिदूरे एव तयोर्युद्धं द्रष्टुं स्थिताः ।

अथ **बाहुबले**राज्ञया प्रतीहारो गजस्थः स्वसैनिकान् जगाद-"भो भोः सैनिकाः ! युष्माकं चिरं चिन्तयताम्, अभीष्टं स्वामिकार्य-मुपस्थितमासीत्। परं युष्माकं स्वल्पपुण्यत्वाद् देवै**र्भरते**न सह द्वन्द्व-युद्धार्थं स्वामी प्रार्थितः । अतः स्वामी युष्मान् युद्धाद् निषेधति । युष्माभिस्तटस्थैरेव हस्तिमल्ल इव युध्यमानः स्वामी प्रेक्षणीयः । तत्स्ववाहनानि वालयित्वाऽपक्रमत। शस्त्रास्त्राणि च सङ्क्षिपत" । ततो द्वारपालवचनेन वज्रशब्देनेव समाहता **बाहुबलि**नः सैन्याः "विबुधैरकस्मादागतै**र्भरते**श्वरसैन्येभ्यो लब्धोत्कोचैरिव प्रभुं प्रार्थ्य युद्धोत्सवो रुद्ध" इति मनसि विचिन्तयन्तोऽपासरन् । **भरतो**ऽपि स्वां सेनामपासारयत्। अपसार्यमाणाश्च **भरत**सैन्या "अस्माभिः पूर्वं योधितेन **बाहुबलि**ना भर्त्तुर्युद्धमुचित"मिति परस्परं ब्रुवन्तः समाहूय **भरते**नाऽभाष्यन्त-"न शङ्कनीयं युष्माभिः, सर्वे सम्भूय मम बाहुबलालोकनं कुर्वन्तु"।

ततश्चक्री खनकपुरुषैरतिविस्तीर्णं गभीरं च गर्तमेकमखानयत् । तस्य गर्तस्य तटे चोपविश्य **भरतो** वामे भुजे सहस्रसङ्ख्याका दृढाः शृङ्खला लम्बमाना अबन्धयत् । ततः सैन्यान् "यूयं सबलवाहना मद्भुजबलपरीक्षार्थं मामाकृष्य गर्ते पातयन्तु" इत्युवाच । भूयोभूयश्च चक्रिणैवमादिष्टाः सैनिकाः कथञ्चित् तत् स्वीचक्रुः । ततस्ते सैन्या-

श्चक्रिभुजस्य शृङ्खलाजालमाकर्षन्तश्चक्रिणा तेनैव भुजेन हृद्यङ्गरागं कुर्वता सहैव पातिताः । ततो **भरत**बलेन हृष्यन्तस्ते तद्बाहुशृङ्खला दुःशङ्काश्च तत्यजुः । चक्री च भूयो गजरत्नारूढः समराङ्गणं प्राप ।

❁ ❁ ❁

अथ जगत्क्षयनिवारणाद् मुदिता देवा रणभूमौ रजांस्यपनीय गन्धाम्बुवृष्ट्याऽभिषिच्य कुसुमानि ववृषुः । ततो गजादुत्तीर्य **भरत-बाहुबली** गजाविव गर्जन्तौ रणभूमिं प्रविष्टौ 'दृष्टियुद्धेन योद्धव्य'-मिति प्रतिज्ञाय च सम्मुखावनिमेषाक्षौ तस्थतुः । परस्परं पश्यतोश्चिरं निश्चलविलोचनयोस्तयोर्**भरत**स्याऽक्षिणी न्यमीलताम् । तदा शिरांसि धुन्वाना देवा **बाहुबलि**नि पुष्पवृष्टिं चक्रुः । **बाहुबलि**नो विजये च **सोमप्रभा**दयो वीरा हर्षकोलाहलं चक्रुः । जयतूर्याणि च सैन्यैर-वाद्यन्त । **भरत**सैन्याश्च मन्दतेजसो बभूवुः ।

ततो **बाहुबलिः** ''काकतालीयन्यायेन विजितमिति मा वदः, वाग्युद्धेनाऽपि युद्धस्वे''ति चक्रिणमवोचत् । चरणाहतः फणीव सामर्षो **भरतो** 'भवत्वेव'मित्युदित्वा मेघगर्जितमिव क्ष्वेडानादम-करोत् ।

**बाहुबलि**ना चाऽप्यतिभैरवः सिंहनादो विदधे । एवं क्रमेणोभौ **भरत-बाहुबली** महाध्वनिं चक्राते । तत्र क्रमेण **भरत**स्य शब्दोऽति-हीनोऽभवत् । **बाहुबले**श्च सिंहनादः क्रमशोऽधिकाधिकं ववृधे । शास्त्रीयवाग्युद्धेऽप्येवं वादिना **बाहुबलि**ना प्रतिवादी **भरतो** विजितः।

ततस्तौ बाहुयुद्धार्थं परिकरं बबन्धतुः । तदा **बाहुबले**-र्द्वारपालः-''पृथ्वि ! स्थिरा भव, शेषनाग ! दृढीभूय पृथिवीं धर, दिग्गजाः ! सावधानं पृथिवीं धत्त, यतो वज्रसारो **बाहुबलि**-र्वज्रसारेण चक्रिणा योद्धुमधुनोत्तिष्ठते'' इत्युच्चैरुवाच । ततो महामल्लौ तौ करास्फोटं विदधानौ मिथ आह्वासातां, सलीलपदन्यासं च



चेलतुः । तथाऽन्योन्यं गजाविव गर्जन्तौ कराभ्यां करावास्फालया-मासतुः । क्षणेनाऽयुज्येतां, क्षणेन च व्ययुज्येताम् । क्षणेनोत्पेततुः, क्षणेन निपेततुश्च । ततोऽमर्षादुभावपि धावित्वाऽङ्गेनाऽङ्गं पीडयन्तौ सस्वजाते । मल्लयुद्धज्ञयोस्तयोः क्षणादूर्ध्वमधश्च वेगाद् विपरिवर्त्त-मानयोरसावधोऽसावुपरीति जनैर्न ज्ञातम् । तौ परस्परं बन्धं चक्रतुर्निरासतुश्च । मुहुः पृथिव्यां लुठनतो धूलिधूसरयोस्तयोः पदाघातेन मेदिन्याररराटेव । ततः क्रुद्धेन **बाहुबलि**नैकेन करेण गृहीत्वोत्क्षिप्तो **भरतो** व्योमनि दूरं जगाम । तमुत्पतन्तं वीक्ष्य रणेक्षिणो देवाः पलायामासुः । उभयोरपि सेनयोर्महान् हाहारवो जज्ञे। गगनाद् मेदिनीपृष्ठे पतित्वा कणशो मा विशीर्यतामिति विचार्या-ऽग्रजस्नेहेन **बाहुबलि**स्तद्ग्रहणाय गगनात् पततो **भरत**स्याऽधो भुजौ दधौ । कन्दुकलीलया च निपतन्तं तं जग्राह । भ्रातृरक्षण-विवेकेन च जना **बाहुबलिं** तुष्टुवुः, सुराः पुष्पवृष्टिं चक्रुः । **भरत**श्च विषाद-कोपाभ्यां युगपदयुज्यत ।

अथ **बाहुबलि**रग्रजस्य विषादं हर्त्तुं सगद्गदमुवाच-''महावीर्य ! मा विषीद । युद्धे जय-विजयौ चक्रवत् परिवर्त्तेते । एतावता त्वं न पराजितो नवाऽहं विजयी । अतो रणायोत्तिष्ठस्व'' । **भरतो**ऽपि मुष्टिं प्रगुणयन् ''अयं मम दोर्दण्डो निजदोषमार्जनं करिष्यत्येवे''ति वदन् तेन मुष्टिना **बाहुबले**र्वक्ष आजघान । स च मुष्टिप्रहारो **बाहुबले**रुर-स्यसत्पात्रे दानवद् मुधा जातः । ततो **बाहुबलि**रपि मुष्टिमुद्यम्य चक्रिणमुरःस्थलेऽताडयत् । तेन घातेन च मूर्च्छितो **भरतो** भूमौ पपात । ततो **बाहुबलि**''रग्रजश्चेद् न जीवेद् मम जीवितेना-ऽप्यल''मिति शोचन् साश्रुनयनः स्वमुत्तरीयं व्यजनीकृत्य **भरतं** वीजयामास । ततश्चक्री क्षणादिव लब्धसंज्ञः समुत्थाय पुरतो भृत्यमिव स्थितं **बाहुबलिं** ददर्श ।

ततो **भरतः** पुनरपक्रम्य दण्डमादाय नभसि भ्रमयित्वा **बाहुबलिं** शिरस्यताडयत्। तेन दण्डाघातेन च सशब्दं चूर्णितं तद् **बाहुबलेः** किरीटं भूमौ निपपात। तेन घातेन क्षणं मूर्च्छितो **बाहुबलि**र्नेत्रे उन्मील्य दण्डमादाय भ्रमयित्वा च **भरत**मुरसि निर्दयं जघान। तेन घातेन च भिन्नकवचश्चक्री क्षणं विह्वलोऽचेतन इव जातः। तद्व्यथामवधूय च चक्री पुनर्दण्डमादाय प्रवृद्धक्रोधो भ्रमयन् बाहुपौरुषमालम्ब्य **बाहुबलिं** शिरस्यताडयत्। तेनाऽऽघातेन च **बाहुबलि**र्भूमावाजानु ममज्ज। स दण्डश्च बाहुबलौ समास्फाल्य खण्डशो जातः। मेदिन्यामाजानुमग्नः प्राप्तव्यथश्च **बाहुबलि**र्मूर्धानमधूनयत्। क्षणं किञ्चिन्नाऽशृणोच्च। ततोऽचिरेणैव लब्धसंज्ञो **बाहुबलिः** पृथिव्या निर्गत्याऽतिक्रुद्धो दण्डमादाय भ्रमयन् **भरतं** शिरस्याजघान। तद्दण्डाघातेन च **भरतो** मुद्गराहतकीलवद् भूमावाकण्ठं ममज्ज। तत्सेवकाश्च विषादाद् मेदिन्यां निपेतुः। भुवि नृणां दिवि देवानां च महान् तुमुलो जातः।

क्षणं मुद्रितनेत्रो विवर्णमुखो **भरत**स्तथास्थितः पुनर्मेदिनीमध्याद् निर्गत्य चिन्तयामास-"अहं सर्वेषु युद्धेष्वनेन जितः, एकस्मिन् कोशेऽसी इवैकस्मिन् **भारत**क्षेत्रे द्वौ चक्रिणौ न दृष्टौ न वा श्रुतौ। किं च देवैरिन्द्रो नृपैश्च चक्री विजीयत इत्यश्रुतपूर्वम्। मयाऽविजितो-ऽयमेव चक्रवर्त्ती, नाऽहम्"। एवं चिन्तयतश्च तस्य करे यक्षराजैश्चक्रं समारोपितम्। चक्रिणा प्रहाराय भ्रम्यमाणं तच्चक्रं दृष्ट्वा **बाहुबलि**र्दध्यौ-"मयि दण्डायुधे तस्य चक्रग्रहणं धिक्। देवसमक्ष-मुत्तमयुद्धं प्रतिज्ञाय तत्त्यागं धिक्। भवतु। निजबाहुबलमिवाऽसौ चक्रबलमपि जानातु"। एवं चिन्तयति **बाहुबलौ भरत**श्चक्रं प्राहरत्। चक्रं चाऽऽगत्य **बाहुबलेः** प्रदक्षिणां चकार। यतश्चक्रं चक्रिणः स्वगोत्रजे चरमशरीरे च न प्रभवति। अतः परावृत्त्य चक्रं चक्रिहस्ते समापतत्।



**बाहुबलि**श्चाऽऽमर्षाद् "मयि दण्डायुधे चक्रमोचकमन्यायकारिणं **भरतं** सचक्रमेव मुष्टिना चूर्णयामी"ति चिन्तयित्वा मुष्टिमुद्यम्य धावमानो **भरतं** प्राप्य स्थितश्चेतसि चिन्तयामास-"अहो! राज्यलुब्धेनाऽनेनेव मयाऽपि भ्रातृवधं समारब्धं धिग् धिक्। यत्र भ्रात्रादयो हन्यन्ते, तस्य राज्यस्याऽर्थे को यतेत? किं च राज्यश्रीः प्राप्ता भुक्ताऽपि च न तृप्तये। सावधानं रक्ष्यमाणाऽपि चाऽल्पेनैव छिद्रेण सा राज्यलक्ष्मीः क्षणेनैव नश्यति। अतस्तातोऽपि तां तृणवत् तत्याज। अतः सर्वथा त्याज्यैवेय"मित्येवं मनसि निश्चित्य चक्रिणमुवाच-"भ्रातः! राज्यार्थं द्विषन्निव मया त्वं खेदितोऽसि, तत् क्षमस्व। मम भवहृदे तन्तुपाशतुल्येन भ्रात्रादिना राज्येन च कृतम्। अहं विश्वाभयदानव्यसनिनं तातमेवाऽनुसरिष्यामी"त्युदित्वा महासत्त्वो दक्षाग्रणीः स तेन मुष्टिनैव मूर्ध्नः कचान् तृणवदुद्दध्रे। देवाश्च साधु साध्विति वदन्तस्तस्योपरि पुष्पवृष्टिं वितेनुः। स **बाहुबलि**श्च "सम्प्रति तातपादपद्मोपगमने पूर्वं गृहीतव्रतानां ज्ञानिनामनुजानां मध्ये मम लघुता भविष्यति। अतोऽत्रैव ध्यानाग्निना घातिकर्माणि दग्ध्वा केवलज्ञानमवाप्य च तत्र स्वामिपर्षदि यास्यामी"ति चिन्तयंस्तत्रैव भुजद्वयं प्रलम्ब्य कायोत्सर्गेणाऽऽस्थात्।

**भरत**श्च तं तथा दृष्ट्वा स्वकुकर्म विचार्य च लज्जयाऽधोमुखः साश्रुनेत्रो भ्रातरं प्रणनाम। ततो **बाहुबलि**गुणस्तवनपूर्वकं स्वनिन्दा-मकार्षीत्। "धन्यस्त्वं, येन मय्यनुकम्पया राज्यं त्यक्तम्, अहं पातकी, यदसन्तुष्टस्त्वामुपाद्रवम्। भवबीजं राज्यं ये न जानन्ति, तेऽधमाः। अहं तु विदन्नप्यत्यजन्नधमतर एव। त्वमेव तातपुत्रस्तदनुसर्ता। अहं तु भवादृशो भवेयं चेत् तदैव तातपुत्रः स्याम्"। ततो विषादपङ्कं परिक्षाल्य पश्चात्तापजलेन **भरत**स्तत्पुत्रं **सोमयशसं** तद्राज्ये स्थापयामास। तत्प्रभृति शाखाशतसमन्वितः पुरुषरत्नानामुत्पत्तिकारणरुपः

सोमवंशः प्रावृतत् । **भरत**श्च ततो **बाहुबलिं** सपरिच्छदो नत्वाऽ**योध्या**पुरीं जगाम ।

तत्र च मुनि**र्बाहुबलि**रेको ध्यानमग्नो नासाग्रस्थिरदृष्टिः शङ्कुरिव निष्कम्पस्तस्थौ । स ग्रीष्मर्त्तौ वह्निकणानिवोष्णान् वालुकाकणान् ग्रीष्मर्त्तुवात्यां रविमापादप्रस्रवत्स्वेदबिन्दून्, प्रावृषि झञ्झानिलोग्रान् धारासारान् विद्युत्पातान् वारिपूरांश्च सेहे । मनागपि कायोत्सर्गतो न चचाल । हिमर्त्तौ च हिमसरिति हिमदग्धवृक्षासु रात्रिषु च ध्यानमग्नस्तस्थौ । तस्मिन् वन्यमहिषा विषाणप्रहारपूर्वकं स्कन्धकण्डूयनं व्यधुः । तस्य वपुश्च स्ववपुषाऽवष्टभ्य गण्डका निशि निद्रासुखमन्वभूवन् । पल्लवभ्रान्त्या तच्चरणं कर्षन्तोऽप्यशक्नुवन्तः करिणो विषादं ययुः । चमरीगणाश्च तमुत्कण्टकजिह्वाभिर्लिहन्ति स्म । तथा स शतशाखाभिर्लताभिरभितोऽवेष्ट्यत । तं परितः शरस्तम्बा निबिडं प्ररोहन्ति स्म । प्रावृषि पङ्कनिमग्नयोस्तत्पादयोः कुशसूचयो निर्जग्मुः । लतावेष्टिते तच्छरीरे च शकुनयो नीडानि रचयामासुः । सर्पाश्च तत्र मयूरादित्रस्ताः समारोहन् । इत्थं निष्कम्पं ध्यानेन स्थितस्य विहरतो **वृषभ**स्वामिन इव विनाऽऽहारमेको वत्सरो व्यतीयाय ।

अथ पूर्णे वत्सरे जिनेशो **वृषभ**ध्वजो **ब्राह्मीसुन्दर्या**वाहूयाऽऽदिशत्-''**बाहुबलि**रिदानीं क्षीणप्रचुरकर्मा जातः । किन्तु मोहनीयांशस्य मानस्य सत्त्वात् केवलं नाऽऽप्नोति । युवयोर्वचसा स मानं तत्कालं त्यक्ष्यति । अतस्तस्योपदेशाय युवां गच्छतम् । तस्य समयो वर्त्तते'' ।

ततस्ते द्वे तामाज्ञां शिरसाऽऽदाय प्रभोश्चरणौ नत्वा **बाहुबलिं** प्रति चलिते । प्रभुस्तन्मानं ज्ञात्वाऽपि संवत्सरं यावदुपेक्षितवान् । यतोऽर्हन्तोऽगूढलक्ष्याः समये उपदेशका भवन्ति। ते आर्ये च तत्र गत्वा रजश्छन्नं रत्नमिव वल्लीपरिवेष्टितं तं न ददृशतुः । बहुशोऽन्विष्य



प्राप्य तं निपुणमुपलक्ष्य त्रिः प्रदक्षिणां कृत्वा वन्दित्वोचतुः-''ज्येष्ठार्य ! तातस्त्वामाज्ञापयति; यद् हस्तिस्कन्धाधिरूढानां केवलं नोत्पद्यते'' । एवमुदित्वा ते यथागतं जग्मतुः ।

ततो विस्मितो **बाहुबलि**रचिन्तयत्-''त्यक्तसर्वसावद्ययोगस्य कायोत्सर्गजुषो मम हस्तिस्कन्धारोहणं कुतः ? इमे भगवतः शिष्ये न मृषा कदाऽपि भाषेते । आ ज्ञातं, व्रतगरिष्ठानां नमस्क्रियां कः कर्त्तेति मानगजारूढोऽहमस्मि । तदिदानीमपि गत्वा तान् वन्दिष्ये'' इति चिन्तयित्वा पादमुत्क्षिप्तवान् । लतावल्लीवदभितो घातिकर्मसु त्रुटितेषु तस्मिन्नेव स्थाने तस्य केवलज्ञानमुत्पेदे । ततः स प्रभुसमीपं जगाम । तीर्थकृतः प्रदक्षिणां विधाय तीर्थाय नत्वा तीर्णप्रतिज्ञः केवलिपर्षदन्तर्निषसाद ॥

*इति प्रथमपर्वणि बाहुबलिसङ्ग्राम-दीक्षा-केवलज्ञान-वर्णनात्मकः पञ्चमः सर्गः ॥ ५ ॥*

# षष्ठः सर्गः

अथेतश्च **ऋषभ**प्रभोः शिष्यो **भरता**त्मजो **मरीचि**रेकादशाङ्गाध्येता श्रमणगुणसमन्वितः स्वभावसुकुमारः स्वामिना समं विहरन् ग्रीष्मे सर्वतः सूर्यातपतप्तस्तृष्णाक्रान्तोऽचिन्तयत्–"अहं केवलिन **ऋषभ**स्वामिनः पौत्रश्चक्रिणो **भरत**स्य पुत्रश्चतुर्विधसङ्घसमक्षं च प्राव्राजिषम् । एवं सत्यस्मात् स्थानाल्लज्जया गृहं गन्तुं न युज्यते । श्रामण्यं च मुहूर्त्तमप्युद्वोढुं न शक्यते । सङ्कटे पतितोऽस्मि हा ! । 'अथवाऽस्त्येष पन्थाः, यद् मनो-वाक्-कायदण्डानां जयिन इमे श्रमणाः, तैश्च विजितोऽहं त्रिदण्डिको भविष्यामि । एते सर्वविरताः, अहं देशविरतः स्याम् । एते विगतमोहाः, अहं तु मोहमग्न इति तच्चिह्नं छत्रं धारयिष्यामि । एते निष्कषायाः श्वेताम्बराः, अहं सकषाय इति तत्स्मृत्यै काषायाणि वस्त्राणि धारयिष्यामि । एते पापभीता जलारम्भं त्यजन्ति, मम परिमितेन जलेन स्नानाद्यस्तु" । एवं चिन्तयित्वा तादृशं लिङ्गं स्वीकृत्य स्वामिना सह विजहार । तदा च महर्षिषु विजातीयं तं दृष्ट्वा जनाः कौतुकाद् धर्मं पप्रच्छुः । स साधुधर्ममुपादिशत्, किन्तु स्वयं तदनाचरणेऽशक्तिहेतुं जगाद । तथा स **मरीचि**र्दीक्षार्थिनो भव्यान् प्रतिबोध्य स्वामिसमीपं प्रेषयामास । स्वामी च तेभ्यो दीक्षां ददौ ।

एकदा स्वामिना सार्धं विहरतो **मरीचेः** शरीरे रोग उत्पेदे । किन्तु व्रतभ्रष्टः स मुनिभिर्नाऽपाल्यत । अजातोपचारश्च स व्याधिनाऽधिकं पीडितोऽभूत् । तदा स चिन्तयामास–"ममाऽत्रैव



भवेऽशुभं कर्मोदीर्णं । यदेते स्वेऽपि साधवः परमिवोपेक्षन्ते । एते सावद्यविरताः सावद्यनिरतस्य मे वैयावृत्त्यं कथं कुर्युः ? ततः स्वोपचाराय कमप्यन्यमल्पधर्माणमन्वेषयामि" । एवं चिन्तयन् स कथमपि नीरोगो जातः ।

अन्यदा च **वृषभ**स्वामिनः पार्श्वे **कपिलो** नाम राजपुत्रः समाययौ, स्वामिदेशनां च श्रुतवान् । तत्र कथितो धर्मो न **कपिला**य नितरां रुरुचे । धर्मान्तरं शुश्रूषुश्चेतस्ततो दृष्टिं क्षिपन् **मरीचिं** दृष्ट्वा तत्समीपं गत्वा धर्मं पप्रच्छ । तदा **मरीचि**रूचे–"इह धर्मो नाऽस्ति, धर्मार्थी चेत् स्वामिनं श्रय" । स स्वामिपार्श्वं जगाम । पुनस्तथैव धर्मं शुश्राव । स च स्वकर्मदूषिताय तस्मै नाऽरुचत् । स पुन**र्मरीचि**मुपाययौ । **मरीचि**मपृच्छच्च–"किं तव कोऽपि धर्मो नाऽस्ति, किं व्रतं निर्धर्मं भवेत् ?" तदा **मरीचि**रचिन्तयत्–"दैवादयं कोऽपि ममाऽनुरूपो जातः, असहायस्य ममाऽयं सहायोऽस्तु"। एवं विचिन्त्य "तत्राऽपि धर्मोऽस्ती, अत्राऽपि धर्मोऽस्तीत्युदतरत् । तेनैकेन दुर्भाषितेन च सोऽब्धिकोटीकोटिमानं भवमुपार्जयत् । तथा स **कपिलं** दीक्षयित्वा स्वसहायं चकार । ततः प्रभृति परिव्राजकपाखण्डमभवत् ।

* * *

अथ साग्रं योजनशतं लोकानां रोगक्षयादनुगृह्णननीतिनिवारणाच्च प्रजाः सुखयन्, नैमित्तिकशाश्वतवैरप्रशमात् प्राणिनः प्रीणयन्, अग्रे सर्वसौस्थ्यकारकव्यवहारप्रवृत्त्या परतोऽमार्या च प्रजा आनन्दयननीतिभीतिरहितैः प्रीतैर्जनपदैः क्रियमाणागमनोत्सवो, दुर्भिक्षतो जगद् रक्षन्, जनैर्भृशं स्तूयमानो, भामण्डलं दधानो, व्योम्नि पुरो गच्छता धर्मचक्रेण राजितः, तुङ्गेन धर्मध्वजेन लघुध्वजसहस्रेण च पुरः शोभितो, दिवि स्वयं शब्दायमानेन दुन्दुभिना, पादपीठसमेतेन स्फटिकरत्नसिंहासनेन चोपशोभितो, देवैः सञ्चार्यमाणेषु सौवर्णेषु

कमलेषु पादन्यासं कुर्वाणस्तीक्ष्णाग्रैः कण्टकैरपि स्वयमधोमुखी-भूतैरनाक्लिष्टपरिच्छदः, सर्वैरृतुभिर्युगपदुपास्यमानो, मृदुना शीत-लेनाऽनुकूलेन चाऽनिलेन सेव्यमानो, जघन्यतः कोटिसङ्ख्यैः सुरासुरै राजमान, आतपत्रेण विराजितः, तपसा दीप्यमानैः सौम्यै-र्लक्षशः श्रमणोत्तमैश्च परिकरितः, प्रतिग्रामं प्रतिपुरं भव्यजन्तून् प्रबोधयन्, महीं विहरन्, विश्ववत्सलो भगवान् **वृषभध्वजः** क्रमादे-कदाऽ**ष्टापदा**चलं प्राप । तं च वन्यैर्वनैश्चोपशोभितमष्टयोजनोच्छ्रायं गिरिं प्रभुरारुरोह ।

तत्र च योजनमात्रे क्षेत्रे क्षणात् पूर्वकल्पिते इव कुतोऽपि समाहृत्य स्थापिते समवसरणे प्रभुः पूर्वद्वारेण प्रविवेश । ततः प्रभुस्तत्राऽशोकतरुं प्रदक्षिणीचक्रे । 'नमस्तीर्थाये'ति वदंश्च पूर्वा-भिमुखः सिंहासनमलञ्चक्रे । **व्यन्तर**देवाश्चाऽन्यास्वपि तिसृषु दिक्षु रत्नसिंहासनस्थानि परमेष्ठिरूपाणि विचक्रुः । पूर्वद्वारेण च साधवः साध्व्यो **वैमानिक**स्त्रियश्च प्रविश्य प्रदक्षिणीकृत्य प्रभुं तीर्थं च नेमुः। तत्र प्रथमे प्राकारे धर्मोद्यानमहाद्रुमाः पूर्वदक्षिणदिशि सर्वसाधव उपविविशुः । तेषां च पृष्ठत उपरि **वैमानिक**स्त्रियः, तासां च पृष्ठतः साध्व्य उपाविशन् । दक्षिणद्वारा प्रविश्य च पूर्ववन्नैर्ऋते **भवनेश-ज्योतिर्व्यन्तरा**णां स्त्रियः क्रमादुपाविशन् । पश्चिमद्वारा प्रविश्य च प्राग्विधानेन मरुद्दिशि **भवनेश-ज्योतिष्क-व्यन्तराः** क्रमादवत-स्थिरे । वासवश्च प्रभुं समवसृतं ज्ञात्वा विमानैः सत्वरमागत्योदीच्य-द्वारेण प्रविश्य त्रिः प्रदक्षिणीकृत्य नत्वा स्तुत्वा च पुनः पञ्चाङ्ग-स्पृष्टभूमिः प्रणम्य पूर्वोत्तरस्यां दिशि समुपाविवेश ।

"स्वामी समवसृत" इति शैलपालज्ञापितश्च चक्री तस्मै सार्ध-द्वादशस्वर्णकोटीः पारितोषिकं प्रदाय सिंहासनादुत्थाय सप्ताष्टानि



पदान्यभिमुखं गत्वा नत्वा च पुनः सिंहासने समुपविश्य सर्वान् नृपानाहूतवान् । ततश्च तत्र नृपाः सैन्याश्च सर्वतः समागताः । ततश्चक्री स्नानेनाऽङ्गशौचं विधाय, कृतप्रायश्चित्तकौतुकमङ्गलो वस्त्रनेपथ्यानि महार्हाणि परिधाय, मूर्ध्नि श्वेतच्छत्रेण पार्श्वयोश्च चामराभ्यामुपशोभितो वेश्मान्तवेदिकां प्राप्य तामारुह्य गजरत्नं समारुरोह । तूर्यरवपूर्वकं सान्तःपुरपरीवारोऽ**ष्टापदं** क्षणादागत्य गजादवरुह्योत्तरद्वारेण समवसरणं प्रविश्य प्रभुं दृष्ट्वा त्रिः प्रदक्षिणीकृत्य नत्वा स्तुत्वा च वासवस्य पृष्ठतः समुपविवेश । अपरे नराश्च देवानां पृष्ठतो नार्यश्चाऽपि तत्पृष्ठत उपर्येवाऽवतस्थिरे । द्वितीये प्राकारे च तिर्यञ्चो विरोधिनोऽपि सस्नेहा-स्तस्थुः । तृतीये च नृपादीनां यानश्रेण्यो दर्शनाकर्णनोत्कर्णास्तस्थुः ।

ततः सर्वभाषानुगामिन्या वाण्या प्रभुर्धर्मदेशनां विदधे । तच्छृण्वन्तश्च सर्वे तिर्यङ्-नरा-ऽमरा-ऽसुरा ध्यानस्थिता इव तस्थुः । देशनान्ते च **भरत** आत्तव्रतान् भ्रातॄन् सविषादं पश्यन्नचिन्तयत्-"हा ! एतेषां बन्धूनां राज्यं गृह्णता मयाऽतृप्तेन किं कृतम् ? काको-ऽप्यन्यकाकेभ्योऽन्नादि दत्त्वोपजीवति । अहं त्वमून् विना भोगान् भुञ्जानस्ततोऽपि हीनोऽस्मि । अमी मया दीयमानान् भोगान् गृह्णीयु-श्चेत् शोभनं भवेत्" । एवं विचार्य प्रभोः पादमूले रचिताञ्जलिर्भ्रातॄन् निमन्त्रयामास ।

प्रभुरुवाच-"राजन्! इमे ते भ्रातरो महाव्रतास्त्यक्तभोगाः पुनर्भोगान् न प्रतिगृह्णन्ति" । ततः सानुतापं चक्री पुनश्चिन्तयामास-"अमी यदि भोगान् न भुञ्जते, तथाऽप्याहारं प्राणधारणं भोक्ष्यन्ते" इति विचार्य पञ्चभिः शकटशतैराहारमानाय्य पूर्ववदनुजान् न्यमन्त्रयत् । स्वामिना "आधाकर्माहृतं वस्तु यतीनां न कल्पत" इति निषिद्धश्चक्री पुनरकृता-ऽकारितेनाऽन्नेन तान् न्यमन्त्रयत् । "राजपिण्डो महर्षीणां न कल्पते"

इति पुनः स्वामिना निषिद्धो **भरतो** भृशमनुतप्तवान् । ततो विलक्षं **भरत**मनुलक्ष्य शक्रः-"कतिधाऽवग्रहः स्यादि"ति प्रभुं पप्रच्छ । "इन्द्र-चक्रि-नृपा-ऽगारि-साधुसम्बन्धभेदात् पञ्चधाऽवग्रहः, तेषूत्त-रोत्तरो बलवा"निति प्रभुणा कथितश्च स "ये साधवो विहरन्ति ममाऽवग्रहे, तेषां ममाऽवग्रहमनुजानामि" इत्येवमुदित्वा, प्रभुं नत्वाऽवस्थितः ।

ततो **भरतो**ऽपि "एभिर्यद्यपि मदीयमन्नादि न गृहीतं, तथाऽप्यवग्रहानुज्ञया कृतकृत्यः स्या"मिति विचार्य स्वामिनोऽग्रे स्वमवग्रहमन्वजिज्ञपत्-"मयाऽमुना भक्तपानादिनाऽधुना किं कार्यम्?" इति वासवमपृच्छच्च । "गुणोत्तरेभ्यो दातव्य"मिति शक्रेणोत्तरिते "श्रावका विरताविरता गुणोत्तरा" इति तेभ्यो देयमिति निश्चित्य वासवस्य भास्वदाकृतिकं रूपं दृष्ट्वा विस्मितः स पप्रच्छ-"किं स्वर्गेऽपीदृशेन रूपेण यूयं तिष्ठथ रूपान्तरेण वा ?" ततो देवराजो-ऽब्रवीत्-"राजन् ! स्वर्गे नैतद्रूपं मम । तत्रत्यं रूपं मर्त्यैर्द्रष्टुं न पार्यते" । ततो **भरतः** पुनरप्यूचे-"तव तद्रूपदर्शनकौतुकं मेऽस्ति, तद्दर्शनेन मां प्रीणय" । ततः शक्रोऽब्रवीत्-"त्वमुत्तमः पुमानसि, तत एकमङ्गावयवं दर्शयिष्यामि" । तदनन्तरं स योग्यालङ्कारयुक्तां स्वाङ्गुलीं दर्शयामास । तद् दृष्ट्वा च **भरतो** नितरां मुमुदे ।

ततः शक्रो भगवन्तं प्रणम्य **भरत**मनुज्ञाप्य च तत्क्षणात् तिरो-हितवान् । **भरतो**ऽपि शक्रवत् स्वामिनं प्रणम्याऽनुज्ञाप्य च **विनीतां** प्राप्तो रत्नमयीं शक्राङ्गुलीं न्यस्याऽष्टाह्निकां चकार । ततः प्रभृतीन्द्र-स्तम्भं समुत्तभ्य सर्वत इन्द्रोत्सवः प्रारब्धो लोकैरद्याऽपि प्रवर्त्तते । जिनेश्वरोऽपि भव्यकमलप्रबोधकृद**ष्टापदा**दन्यत्र विजहार ।



अथः **भरतः** श्रावकान् समाहूय "मदीये गृहे प्रतिदिनं भवद्भिर्भोक्तव्यं, कृष्यादि न विधेयम्, अन्वहं स्वाध्यायतत्परैः स्थातव्यं, भुक्त्वा च मत्समीपमागत्य सर्वदा "जितो भवान्, वर्धते भीस्तस्माद् मा हन मा हने"ति पठनीय"मित्युक्तवान् । ते च तथा स्वीकृत्य तद्गृहे प्रतिदिनं भुञ्जन्ति स्म, तद्वचश्च स्वाध्यायमिव पठन्ति स्म । **भरत**श्च प्रतिदिनं तच्छब्दं शृण्वन्नेकदाऽचिन्तयत्-"कषायैर्जितोऽस्मि, तेभ्य एव मम भयं वर्धते । अतः प्राणिनो मा हन्याम् । एते विवेकिनो नित्यमेव स्मारयन्ति, तथाऽपि प्रमादिनो मम धर्मे औदासीन्यं धिक्"। इत्थं चिन्तया च तस्य क्षणं धर्मध्यानं प्रावर्त्तत । किन्तु स भोगफलस्य कर्मणोऽन्यथा कर्तुमनीश्वरत्वाद् भूयोऽपि विषयासक्तो जातः ।

अथैकदा पाचकमुख्यै"र्भूयस्त्वाच्छ्रावकोऽश्रावको वेति नोप-लक्ष्यत" इति विज्ञप्तस्तान् समादिशत्-"यूयमपि श्राद्धाः स्थ, अतोऽद्य प्रभृति परीक्ष्य भोजनं देयम्" । ततस्तैः को भवान् ? श्रावकोऽहं, तद्व्रतानि कति ? पञ्चाऽणुव्रतानि, सप्त शिक्षाव्रतानि चे"त्येवं परीक्षोत्तीर्णा एव **भरत**स्य दर्शयामासिरे । नृपश्च ज्ञान-दर्शन-चारित्रलिङ्गं काकिणीरत्नेन रेखात्रयं शुद्धिलक्षणं विदधे । अर्धवर्षेऽर्धवर्षे च परीक्ष्य प्रवृत्ता नवा अपि श्रावकास्तथैवा-ऽगृह्यन्त, तच्चिह्नाश्च भोजनं लेभिरे । "जितो भवान्"इत्याद्युच्चैः पठन्तश्च माहना इति प्रख्याताः । तथा ते निजान्यपत्यानि साधुभ्यः समर्पितवन्तः। तेषु कैश्चिच्च परीषहाद्यसहिष्णुभिः श्रावकत्वमुपाददे । काकिणीरत्नलाञ्छितैश्च तैस्तथैव बुभुजिरे । तेभ्यश्च "नृपेण दत्तम्" इत्यन्योऽपि लोको महाजनानुसारित्वाद् ददौ । तथा चक्री तेषां स्वाध्यायार्थमर्हत्स्तुति-मुनि-श्राद्धसामाचारीसहितानार्यान् वेदान् विदधे । कालक्रमेण ते माहना ब्राह्मणा इति विश्रुता बभूवुः ।

काकिणीरेखाश्च तेषां यज्ञोपवीततां प्रापुः । एषा स्थितिश्च **भरत**राज्ये-ऽभूत् ।

**सूर्ययशा**स्तु काकिण्यभावतः स्वर्णयज्ञोपवीतानि, अन्ये च **महायशः**प्रभृतयः केचिद् राजतानि, केचित् पट्टसूत्रमयानि, केचिच्च सूत्रमयानि यज्ञोपवीतानि चक्रिरे । **भरतादादित्ययशा**स्ततो **महा-यशा**स्ततः क्रमाद**तिबल-बलभद्र-बलवीर्य-कीर्तिवीर्य-जल-वीर्य-दण्डवीर्या** इत्यष्टौ पुरुषान् यावत् स आचारः प्रवृत्तवान् । एभिश्चाऽष्टभिर्भूपै**र्भरता**र्धं बुभुजे । शक्रोपनीतं भगवन्मुकुटं च मूर्ध्नि धृतवन्तः । शेषैस्तु स मुकुटो महाप्रमाणत्वाद् वोढुं नाऽपार्यत । नवम-दशमार्हतोरन्तःसमये च साधुविच्छेदो जातः । एवं जिनानां सप्तस्वन्तरेष्वेष वृत्तः । वेदाश्च तदाऽर्हत्स्तुति-यति-श्राद्धधर्ममया आसन्। पश्चात् **सुलसा-याज्ञवल्क्या**दिभिरनार्या वेदाः कृताः ।

❀ ❀ ❀

अथेतो **भरतः** श्रावकदानैः कामकेल्याऽपरैश्च विनोदै-र्दिवसानतिवाहयन् तस्थौ । तत एकदा भगवानर्हन् पादचारैरवनिं पावयन्न**ष्टापद**गिरिं प्राप । तत्र तत्क्षणं सुरैर्निर्मिते समवसरणे स्थित्वा धर्मदेशनां चक्रे । आयुक्तपुरुषैर्विज्ञप्तश्च चक्री तेभ्यः पूर्ववत् पारि-तोषिकं दत्त्वा स्वामिनमुपेत्य प्रदक्षिणीकृत्य नमस्कृत्य स्तुत्वा पुनः प्रणम्य च यथास्थानमुपाविशत् । देशनान्ते च नत्वा **भरतः** स्वामिनं बद्धाञ्जलिर्व्यजिज्ञपत्-"प्रभो ! इह **भरते** यूयमिव विश्वहिताः कत्यन्ये धर्मचक्रिणश्चक्रिणश्च भाविनः ? तेषां नगरं गोत्रं पितरौ नामाऽऽयुर्वर्णं मानान्तरे दीक्षागती च ज्ञापय" ।

ततः प्रभुरुवाच-"**भरते**ऽपरे त्रयोविंशतिरर्हन्तः, तथैकादश चक्रिणो भाविनः, गोतमवंशजौ विंशद्वाविंशौ जिनावन्ये च काश्यप-गोत्रजाः, सर्वे मुक्तिगामिनो भाविनः । **अयोध्यायां जितशत्रु-**



**विजया**पुत्रो**ऽजितो** द्वासप्ततिपूर्वलक्षायुष्कः, सुवर्णकान्तिरर्धपञ्चम-धनुःशतोच्छ्रायः, पूर्वाङ्गोनपूर्वलक्षव्रतपर्यायो भविष्यति । मन्निर्वाण-तन्निर्वाणकालयोः पञ्चाशल्लक्षसागरोपमकोट्योऽन्तरम् । **श्रावस्त्यां जितारि-सेनाभूः** स्वर्णकान्तिः **सम्भवः** षष्टिपूर्वलक्षायुष्कश्चतु-र्धनुःशतोच्छायश्चतुःपूर्वाङ्गहीनपूर्वलक्षव्रतपर्यायो भावी, तस्य च त्रिंशल्लक्षसागरोपमकोट्योऽन्तरम् । **विनीता**पुर्यां **संवर-सिद्धार्था**-पुत्रो**ऽभिनन्दनः** पञ्चाशत्पूर्वलक्षायुः, सार्धधनुःशतत्रयोच्छ्रायः,कनक-कान्तिरष्टपूर्वाङ्गोनपूर्वलक्षव्रतपर्यायो भावी, तस्य दशलक्षसागरोपम-कोट्योऽन्तरम् । तथा **विनीता**यामेव **मेघ-मङ्गला**पुत्रः **सुमति**-र्द्विचत्वारिंशत्पूर्वलक्षायुस्त्रिधनुःशतोच्छ्रायो, द्वादशपूर्वाङ्गहीनपूर्वलक्ष-व्रतपर्यायो भावी, तस्य नवलक्षसागरोपमकोट्योऽन्तरम्।

**कौशाम्ब्यां धर-सुसीमा**तनयः **पद्मप्रभो**ऽरुणवर्णस्त्रिंशत्पूर्व-लक्षायुष्कः, सार्धधनुःशतद्वयोच्छ्रायः, षोडशपूर्वाङ्गोनपूर्वलक्षव्रतपर्यायो भावी, तस्य सागरोपमकोटिसहस्राणां नवतिरन्तरम् । **वाराणस्यां प्रतिष्ठ-पृथिवी**पुत्रो हेमकान्तिः **सुपार्श्वो** विंशतिपूर्वलक्षायुष्को, धनुःशतद्वयोच्छ्रायो, विंशत्यङ्गहीनपूर्वलक्षव्रतपर्यायो भावी, तस्य सागरोपमकोटीनां नवसहस्राण्यन्तरम् । **चन्द्रानने महसेन-लक्ष्मणा**-सूनु**श्चन्द्रप्रभो**र्दशपूर्वलक्षायुष्कः, शुभ्रवर्णः, सार्धधनुःशतोच्छ्रायश्चतु-र्विंशत्यङ्गहीनपूर्वलक्षव्रतपर्यायो भावी, तस्य सागरोपमकोटीनां नव शतान्यन्तरम् । **काकन्द्यां सुग्रीव-रामाभूः** शुभ्रवर्णः **सुविधिः** पूर्वलक्षद्वयायुष्क, एकधनुःशतोच्छ्रायोऽष्टाविंशत्यङ्गहीनपूर्वलक्षव्रतपर्यायो भावी, तस्य सागरोपमकोटीनां नवतिरन्तरम् । **भद्रिल**पुरे **नन्दा-दृढरथा**त्मजः कनककान्तिः **शीतलः** पूर्वलक्षायुर्धनुर्नवत्युच्छ्रायः, पञ्च-विंशतिपूर्वसहस्रव्रतपर्यायो भावी, तस्य नव सागरोपमकोट्योऽन्तरम्।

**सिंह**पुरे **विष्णुराज-विष्ण्वोः** पुत्रः कनककान्तिः **श्रेयांसो**ऽशीतिधन्वोच्छ्रायश्चतुरशीतिलक्षवर्षायुष्क, एकविंशतिलक्षवर्षव्रतपर्यायो भावी, तस्य शतसागरोपमषट्षष्टिलक्षषड्विंशतिसहस्रवर्षोनसागरोपमकोटिरन्तरम् । **चम्पा**पुर्यां **वसुपूज्य-जया**त्मजो रक्तवर्णो **वासुपूज्यो** द्वासप्तत्यब्दलक्षायुर्धनुःसप्तत्युन्नतश्चतुःपञ्चाशद्वर्षलक्षव्रतपर्यायो भावी, तस्य चतुःपञ्चाशत्सागरोपमा अन्तरम् । **काम्पील्य**पुरे **कृतवर्म-श्यामा**त्मजः सुवर्णवर्णो **विमलः** षष्टिवत्सरलक्षायुः, षष्टिधन्वोन्नतः, पञ्चदशवर्षलक्षव्रतपर्यायो भावी, तस्य त्रिंशत्सागरोपमा अन्तरम् । **अयोध्यायां सिंहसेन-सुयशोभूः** सुवर्णवर्णोऽ**नन्त**स्त्रिंशदब्दलक्षायुः, पञ्चाशद्धन्वोन्नतः, सार्धलक्षसप्तवर्षव्रतपर्यायो भावी, तस्य नव सागरोपमा अन्तरम् । **रत्न**पुरे **भानु-सुव्रता**त्मजः सुवर्णवर्णो **धर्मो** दशाब्दलक्षायुः, पञ्चचत्वारिंशद्धन्वोच्छ्रायः, सार्धलक्षद्वयवर्षव्रतपर्यायो भावी, तस्य चतुःसागरोपमा अन्तरम् ।

**गज**पुरे **विश्वसेना-ऽचिरा**सुतोऽब्दलक्षायुः **शान्ति**श्चत्वारिंशद्धनून्नतः, स्वर्णवर्णः, पञ्चविंशत्यब्दसहस्रव्रतपर्यायो भावी, तस्य च पल्यचतुर्भागत्रिकोनमब्धित्रयमन्तरम् । तत्रैव **गज**पुरे **सूर-श्रियोः** सुतः स्वर्णवर्णः **कुन्थुः** पञ्चनवत्यब्दसहस्रायुः, पञ्चत्रिंशद्धनून्नतः, सार्धसप्तशताधिकत्रयोविंशतिसहस्राब्दव्रतपर्यायो भावी, तस्य चाऽन्तरं पल्यार्धम् । पुनस्तत्रैव **गज**पुरे **देवी-सुदर्शना**त्मजः स्वर्णवर्णश्चतुरशीत्यब्दसहस्रायुस्त्रिंशद्धनून्नतिर**रनाथ** एकविंशतिवर्षसहस्रव्रतपर्यायो भावी, तस्याऽब्दकोटिसहस्रोनपल्यतुर्यांशोऽन्तरम् । **मिथिलायां कुम्भ-प्रभावती**पुत्रः पञ्चविंशतिधनून्नतिः, पञ्चपञ्चाशदब्दसहस्रायुर्नीलवर्णो **मल्लिनाथ** एकवर्षशतोनपञ्चपञ्चाशदब्दसहस्रव्रतपर्यायो भावी, तस्य च वर्षकोटिसहस्रकमन्तरम् । **राजगृहे पद्मा-सुमित्र**पुत्रः कृष्णवर्णः **सुव्रत**स्त्रिंशद्वर्ष-



सहस्रायुर्धनुर्विंशत्युन्नतिः, सार्धसप्तवर्षसहस्रव्रतपर्यायो भावी, तस्य चतुःपञ्चाशदब्दलक्षाण्यन्तरम् ।

तथा **मिथिलायां वप्रा-विजयभूः** स्वर्णवर्णो **नमिनाथो** दशवर्षसहस्रायुः, पञ्चदशधनून्नतिः, सार्धवर्षसहस्रद्वयव्रतपर्यायो भावी, तस्य षड्वर्षलक्षाण्यन्तरम् । **शौर्य**पुरे **शिवा-समुद्रविजया**त्मजः कृष्णवर्णो **नेमिनाथः** सहस्रवर्षायुर्दशधनून्नतिः, सप्तशतवर्षव्रतपर्यायो भावी, तस्य पञ्चलक्षवर्षाण्यन्तरम् । **वाराणस्यां वामा-ऽश्वसेन**पुत्रः **पार्श्वनाथः** कृष्णवर्णो, नवहस्तप्रमाणः, शतवर्षायुः, सप्ततिवर्षव्रतपर्यायो भावी, तस्य सार्धसप्तशताधिकत्र्यशीतिवर्षसहस्राण्यन्तरम् । **कुण्ड**ग्रामे **सिद्धार्थ-त्रिशला**सुतो **महावीरः** स्वर्णवर्णः, सप्तहस्तप्रमाणो, द्वासप्तत्यब्दायुर्द्वाचत्वारिंशदब्दव्रतपर्यायो भावी, तस्य सार्धवर्षशतद्वयमन्तरम् ।

एषु काश्यपगोत्रिणोऽष्टौ चक्रिणः स्वर्णवर्णा मोक्षगाः । तत्रा**ऽजित**काले**ऽयोध्या**यां **सुमित्र-यशोमती**पुत्रः सार्धधन्वचतुःशतोच्छ्रायो, द्वासप्ततिपूर्वलक्षायुः **सगरो** भावी । **श्रावस्त्यां भद्रा-समुद्रविजया**त्मजः पञ्चाब्दलक्षायुः, सार्धद्विचत्वारिंशद्धनून्नति**र्मघवा, हस्तिना**पुरे **सहदेव्यश्वसेन**पुत्रोऽब्दलक्षत्रयायुः सार्धैकचत्वारिंशद्धनून्नतिः **सनत्कुमार**श्च भाविनौ । एतौ **धर्म-शान्त्यो**रन्तरे तृतीयस्वर्गगामिनौ । **शान्तिः कुन्थुररनाथ**श्चैतेऽर्हन्तश्चक्रिणोऽपि च । **हस्तिना**पुरे **तारा-कृतवीर्य**सुतः **सुभूमः** षष्टिवर्षसहस्रायुर्धनुरष्टाविंशत्युच्छ्रितः, स चाऽ**र-मल्ल्य**न्तरे भावी, सप्तमं नरकं गमी । **वाराणस्यां ज्वाला-पद्मोत्तरा**त्मजः **पद्म**स्त्रिंशद्वर्षसहस्रायुर्विंशतिधनूच्छ्रितः, **काम्पील्ये मेरा-महाहरि**पुत्रो **हरिषेणो** दशवर्षसहस्रायुः पञ्चदशधनून्नतिश्च, तौ द्वौ **मुनिसुव्रत-नम्यो**र्विहरतोर्भविष्यतः ।

**राजगृहे वप्रा-विजया**त्मजो द्वादशधनून्नतो **जय**स्त्र्यब्दसहस्रायु**र्नमि-नेमि**जिनान्तरे भावी । **काम्पिल्ये चुलनी-ब्रह्म**पुत्रः सप्तवर्षशतायुष्को **ब्रह्मदत्तः** सप्तधनून्नतिः श्री**नेमि-पार्श्व**तीर्थान्तरे रौद्रध्यानपरः सप्तमीं नरकभूमिं गामी ।

तत्राऽपृष्टोऽपि प्रभुः प्रसङ्गात् कथितवान्-"त्रिखण्डपृथिवी-पालकाश्चक्र्यर्धविक्रमा नवाऽसिता **वासुदेवा** भाविनः । तेष्वष्टमः काश्यपगोत्रः, शेषा गौतमाः । तेषां सापत्ना भ्रातरो नव सिता बलदेवाः। तत्र **पोतना**ख्ये नगरे **प्रजापति-मृगावत्योः** पुत्रोऽशीतिधनून्नति**स्त्रिपृष्ठो** वासुदेवः **श्रेयांस**जिनविहारकाले चतुरशीत्यब्दलक्षायुरन्त्यं नरकं गामी। **द्वारवत्यां** धनुःसप्तत्युन्नतो **द्विपृष्ठः पद्मा-ब्रह्म**नन्दनो द्वासप्ततिवर्षलक्षा-यु**र्वासुपूज्य**जिनेश्वरे भुवं विहरमाणे षष्ठं नरकं गामी । तत्रैव **द्वारवत्यां** धनुःषष्टिसमुन्नतः षष्टिवर्षलक्षायुः **स्वयम्भूर्विमल**स्वामिकाले **भद्रराज-पृथिवी**देवीपुत्रः षष्ठं नरकं गामी । तथा तस्यामेव नगर्यां **पुरुषोत्तमः** पञ्चाशद्धनून्नतिः **सोम-सीता**पुत्रस्त्रिंशद्वर्षलक्षायु**रनन्त**-जिनकाले षष्ठं नरकं गामी । **अश्व**पुरे **पुरुषसिंहः** पञ्चचत्वारिंशद्धनून्नतः **शिवराजा-ऽमृता**पुत्रो दशवर्षलक्षायु**र्धर्म**जिनकाले षष्ठं नरकं गामी । **चक्र**पुर्यां **पुरुषपुण्डरीकोऽर-मल्ल्यो**रन्तरे **लक्ष्मीवती-महाशिरः**पुत्र एकोनत्रिंशद्धनून्नतः पञ्चषष्टिवर्षसहस्रायुः षष्ठं नरकं गामी । **वाराणस्यां दत्तः** षड्विंशतिधनून्नतः षट्पञ्चाशद्वर्षसहस्रायुस्तज्जिनद्वयान्तर एव **शेषवत्यग्निसिंहभूः** पञ्चमं नरकं गामी । **राजगृहे मुनिसुव्रत-नम्य**न्तरे द्वादशाब्दवर्षसहस्रायुः **सुमित्रा-दशरथ**पुत्रः षोडशधनून्नति**र्नारायण**-स्तुरीयं नरकं गामी । **मथुरा**पुर्यां **नेमिनाथ**काले दशधनून्नतो **देवकी-वसुदेव**पुत्रः **कृष्णः** सहस्रवर्षायुस्तृतीयं नरकं गामी ।



तथा प्रथमो बलदेवोऽ**चलो भद्रा**सुतः पञ्चाशीतिवर्षलक्षायुः, द्वितीयो **सुभद्रा**पुत्रो **विजयः** पञ्चसप्तत्यब्दलक्षायुः, तृतीयो **भद्रः सुप्रभा**पुत्रः पञ्चषष्टिवर्षलक्षायुः, चतुर्थः **सुप्रभः सुदर्शना**पुत्रः पञ्च-पञ्चाशदब्दलक्षायुः, पञ्चमः **सुदर्शनो विजया**सुतः सप्तदश वर्ष-लक्षायुः, षष्ठो **वैजयन्ती**सूनुरा**नन्दः** पञ्चाशीतिवर्षसहस्रायुः, सप्तमो **जयन्ती**पुत्रो **नन्दनः** पञ्चषष्टिवर्षसहस्रायुः, अष्टमः **पद्मोऽपराजिता**-तनयः पञ्चदशवर्षसहस्रायुः, नवमो **रामो रोहिणी**पुत्रो द्वादशाब्द-शतायुर्भविष्यन्ति । तत्राऽष्टौ मोक्षगाः, **रामो ब्रह्मकल्पं** गमिष्यति । तथा स **भरते कृष्ण**तीर्थ उत्सर्पिण्यां सेत्स्यति । तथाऽ**श्वग्रीव-तारक-मेरक-मधु-निशुम्भ-बलि-प्रह्लाद-लङ्केश-मगधेश्वरा** वासुदेवप्रतिमल्लाश्चक्रायुधाः स्वचक्रैरेव वासुदेवकरगतैर्हनिष्यन्ते ।

**भरत**स्तच्छ्रुत्वा स्वामिनं पुनः पप्रच्छ-"अत्र समवसरणे भवानिव कोऽपि तादृशोऽस्ति यस्तीर्थं प्रवर्त्त्य **भरतक्षेत्रं** पावयि-ष्यति ?" भगवानाह-"तव पुत्रोऽयं प्रथमः परिव्राजको **मरीचि**-रार्त्तरौद्रध्यानहीनः सम्यक्त्वयुक्तो रहसि धर्मध्यानं कुर्वन् सम्प्रति कर्ममलिनोऽपि शुक्लध्यानाच्छुद्धिमेष्यति । इहैव **भरत**क्षेत्रे **पोतना**-ख्ये नगरे **त्रिपृष्ठो** वासुदेवानां प्रथमो वासुदेवो भविष्यति । यः क्रमात् **प्रत्यग्विदेहे**षु **मूका**यां पुरि दाशार्हाणां प्रथमो **धनञ्जय-धारिण्योः** पुत्रश्चक्री **प्रियमित्र**नामा भविष्यति । ततश्चिरं भवे संसृत्य भारते **महावीर**नामा चतुर्विंशस्तीर्थकृद्भावी" इति श्रुत्वा स्वाम्यनु-ज्ञामादाय **भरतो** वन्दितुं **मरीचि**मगात् । "त्वां त्रिपृष्ठं प्रियमित्रं वा न, ते इदं जन्म पारिव्राज्यं वा न, किन्तु चतुर्विंशं भाविनमर्हन्तं त्वां वन्दे" इति ब्रुवाणो बद्धाञ्जलिपुटस्त्रिःप्रदक्षिणीकृत्य **भरत**स्तं ववन्दे । ततः प्रभुं नत्वा **भरतोऽयोध्यां** जगाम ।

तत्रस्थो **मरीचिश्च** तच्छ्रुत्वा दर्पमागतस्त्रिः करास्फोटपूर्वकमतिप्रमुदित एवं वक्तुं प्रचक्रमे-"यद्यहं वासुदेवानां प्रथमो, **विदेहेषु** चक्री, **भारते**ऽन्तिमोऽर्हंश्च भविताऽस्मी"त्येतावता पूर्णं मम । मम पितामहोऽर्हतामाद्यो, मम पिता च चक्रिणामाद्योऽहं च वासुदेवानामाद्य इति मम कुलं सर्वश्रेष्ठम्" । एवमात्मकुलाभिमानं कुर्वाणेन तेन स्वकीयं नीचगोत्रमुपार्जितम् ।

❁ ❁ ❁

भगवांश्च **पुण्डरीक**प्रभृतिभिर्गणधरैः परिवृतो विहारव्याजतो महीं पुनानः **कौशलान् मगधान् काशीन् दशार्णान् चेदीन् मालवान् गूर्जरान् सौराष्ट्रां**श्च धर्मं दिशन् **शत्रुञ्जय**गिरिं प्राप । विविधतरुखण्ड-लता-प्रतान-निर्झरादिमनोहरं मूले पञ्चाशद् योजनं शिखरे दशयोजनमष्टयोजनोच्छ्रायं तं गिरिमारुरोह सः । तत्र सुरैः सद्यो निर्मिते समवसरणे धर्मदेशनां कुर्वन् पौरुष्यां व्यतीतायां ततो विरम्योत्थाय देवच्छन्दे समुपविवेश ।

ततश्च स्वामिनः पादपीठे समुपविष्टो गणधराग्रणीः **पुण्डरीकः** सभायां तथैवोपविष्टायां भगवदनुकृत्या धर्मदेशनां कुर्वाणो द्वितीयपौरुष्यां तां समापयामास ।

एवं सत्त्वोपकाराय धर्मदेशनां कुर्वाणः प्रभुर**ष्टापद** इव तत्र कञ्चित् कालं स्थित्वाऽन्यत्र विजिहीर्षुः **पुण्डरीकं** समादिशत्-"वयमन्यत्र विजिहीर्षवः, त्वमत्रैव मुनिकोटिभिरावृतस्तिष्ठ । क्षेत्रप्रभावेण तव सपरिवारस्याऽचिरादेव केवलमुत्पत्स्यते । इहैव च शैलेशीध्यानस्थस्य तव सपरिवारस्य शीघ्रमेव मुक्तिरपि भविता" । तथेति प्रभुवाचं स्वीकृत्य प्रणम्य च स मुनिकोटिसहितस्तत्रैवाऽस्थात् । प्रभुश्च तं तत्र मुक्त्वा सपरिच्छदोऽन्यत्र विजहार ।



ततः परमसंवेगाविष्टः **पुण्डरीकः** श्रमणानभाषत-"अयं गिरिः क्षेत्रप्रभावेण सिद्धिनिबन्धनं वर्त्तते । अतोऽत्र मुक्तेः साधनान्तरं द्रव्य-भावभेदाद् द्विविधा संलेखना कार्या । **द्रव्यसंलेखना**-सर्वोन्मादमहारोगनिदानभूतानां सर्वधातूनां समन्ततः शोषणम् । **भावसंलेखना**- सहजवैरिणां राग-द्वेष-मोहकषायाणां सर्वतच्छेदः"। इत्येवमुदित्वा स मुनिकोटिभिः सह सूक्ष्मबादरान् सर्वानतीचारानालोच्य भूयःशुद्धये महाव्रतारोपणं विधाय "जीवाः क्षाम्यन्तु मे सर्वे, तेषां च क्षान्तवानहम् । मैत्री मे सर्वभूतेषु, वैरं मम न केनचिदि"त्युक्त्वा भवचरमं निराकारमनशनं प्रतिपन्नवान् । क्षपकश्रेणिमारूढस्य तस्य मुनिकोटीनां च क्रमाद् घातीनि कर्माण्यत्रुट्यन्। तथा मासान्ते चैत्रपूर्णिमायां प्रथमं **पुण्डरीक**स्य पश्चाच्च मुनीनां केवलमुत्पन्नम् । ततः शुक्लध्याने स्थितास्तुर्ये पादे ते योगिनः क्षीणाशेषकर्माणो निर्वाणं प्रापुः । ततो देवा भक्त्या तेषां **मरुदेव्या** इव निर्वाणगमनोत्सवं चक्रुः । यथा **वृषभ**स्वामी प्रथमस्तीर्थकृत्, तथा **शत्रुञ्जय**गिरिरपि तदा प्रथमं तीर्थं बभूव ।

❁ ❁ ❁

ततो **भरतः शत्रुञ्जय**गिरौ रत्नशिलामयं चैत्यं कारयामास। तथा **पुण्डरीक**प्रतिमासहितां प्रभो**र्वृषभ**स्य प्रतिमां च तत्र स्थापयामास । भगवांश्चाऽपि नानादेशेषु विहरन् बोधिदानाद् भविनोऽन्वग्रहीत् । प्रभोः केवलज्ञानावधि चतुरशीतिसहस्राणि श्रमणाः, लक्षत्रयं साध्व्यः, सार्धलक्षत्रयं श्रावकाश्चतुःसहस्राधिकसार्धपञ्चलक्षाणि श्राविकाः,सप्तशताधिकसहस्रचतुष्टयं चतुर्दशपूर्विणः, नवसहस्राण्यवधिज्ञानिनः, विंशतिसहस्राणि केवलिनः, षट्शताधिकविंशतिसहस्राणि वैक्रियलब्धिमन्तः श्रमणाः, सार्धषट्शताधिकद्वादशसहस्राणि मनःपर्ययिणो वादिनश्च पृथक् पृथक्, द्वाविंशतिसहस्राण्यनुत्तरविमानोपपातिनो जज्ञिरे। एवं प्रभुरा**दितीर्थकर**श्चतुर्विधं सङ्घं धर्मे प्रजा व्यवहार इव स्थापयामास।

अथ दीक्षाकालात् पूर्वलक्षं क्षपयित्वा स्वमोक्षकालं ज्ञात्वा प्रभुः सपरिच्छदोऽ**ष्टापदं** प्राप्याऽऽरुह्य च दशसहस्रमुनिभिः सह चतुर्दशेन तपसा पादपोपगमनं प्रत्यपद्यत । ततः पर्वतपालकास्तद्वृत्तान्तं **भरतं** विज्ञापयामासुः । **भरत**श्च तच्छ्रुत्वा शोकपीडितोऽश्रूणि मुञ्चन् सान्तः-पुरपरीवारः पादचारेणाऽ**ष्टापदं** प्रति प्रतस्थे । प्रभुं ध्यायन् बाधामगणयन् स वेगेनाऽ**ष्टापदं** प्राप्याऽऽरुह्य च पर्यङ्कासनस्थितं प्रभुं दृष्ट्वा प्रदक्षिणी-कृत्य वन्दित्वा च पार्श्वस्थः समुपास्ते स्म ।

तत आसनकम्पतोऽवधिज्ञानोपयोगेन सर्ववृत्तान्तं ज्ञात्वा शक्राश्चतुष्षष्टिरपि जिनेन्द्रमभ्युपेत्य प्रदक्षिणीकृत्य प्रणम्य च विषण्णास्तत्र चित्रिता इव निषण्णाः ।

अथाऽस्यामवसर्पिण्यां तृतीयारस्यैकोननवतिपक्षेष्ववशिष्टेषु सत्सु माघमासस्य कृष्णत्रयोदश्यां पूर्वाह्णेऽभिजिन्नक्षत्रे चन्द्रयुक्ते पर्यङ्का-सनस्थितः प्रभुर्बादरे काययोगे स्थित्वा बादरौ वाक्-चित्तयोगौ रुद्ध्वा सूक्ष्मकाययोगेन बादरं काययोगं रुद्ध्वा सूक्ष्मवाक्-चित्तयोगौ च रुरोध । सूक्ष्मक्रियं नाम तृतीयं शुक्लध्यानं निरुद्धसूक्ष्मकाययोगं संसाध्य, पञ्चह्रस्वाक्षरोच्चारकालप्रमाणमुच्छिन्नक्रियं चतुर्थं ध्यानं प्रपद्य, सर्वदुःख-परित्यक्तः क्षीणकर्मा केवलज्ञान-दर्शनी निष्ठितार्थोऽनन्तवीर्यसुखर्द्धिको बन्धाभावादूर्ध्वगतिः प्रभुः स्वभावादृजुना मार्गेण लोकाग्रं प्राप्तवान् । अन्ये दशसहस्रमुनयश्चाऽपि प्रपन्नानशनाः क्षपकश्रेणिमारूढा उत्पन्न-केवला मनो-वाक्-काययोगान् रुद्ध्वा क्षणात् परमं पदं प्रापुः ।

स्वामिनिर्वाणकल्याणाच्च नारकाणामपि क्षणं सुखमभूत् । **भरत**स्तु महाशोकाक्रान्तो भूमौ वज्राहतपर्वत इव मूर्च्छितः पपात । महति दुःखे सम्प्राप्तेऽपि तदा रुदितं दुःखशैथिल्यकारणं कोऽपि न



जानाति स्म । अतः शक्रः स्वयं तच्चक्रिणो ज्ञापयन् महापूत्कार-पूर्वकं रुदितं चकार । तमनुसृत्य देवा अपि रुरुदुः । तेषां रुदितं श्रुत्वा चक्र्यपि लब्धसंज्ञ उच्चैः स्वरेण रुरोद । ततः प्रभृति लोके-ऽपि शोके सति तच्छैथिल्यकारणं रोदनं प्रवृत्तम् । **भरत**श्च स्वभाव-धीरोऽपि दुःखितोऽधीरस्तिरश्चोऽपि विलापयन् भृशं विललाप । शोकातिशयाच्च जीवितनिर्विण्णं मुमूर्षुमिव दृष्ट्वा शक्रो बहुभिः सान्त्वनवाक्यैस्तं प्रबोधितवान् । नृपोऽपि धैर्यमालम्ब्य तस्थौ ।

❁ ❁ ❁

अथ शक्रेण स्वाम्यङ्गसंस्कारोपकरणानयनार्थं समादिष्टा देवा आभियोगिका **नन्दनो**द्यानाद् गोशीर्षचन्दनानि काष्ठानि क्षणादानीय पूर्वदिशि चेन्द्रनियोगात् स्वामिदेहार्थं वृत्तां चितां विरच्येक्ष्वाकुकुलोत्पन्नानां मुनीनां कृते दक्षिणस्यां त्र्यस्राकारां च चितां विरच्याऽपरस्यां दिशि चतुरस्रां चितामन्येषामनगाराणां कृते रचयामासुः । ततः शक्रो देवानीतेन क्षीरोदधिजलेन भगवत्तनुं स्नपयित्वा, गोशीर्षचन्दनैर्विलिप्य, हंसचिह्नेन देवदूष्येण वासयित्वा च दिव्यैर्माणिक्यैः सर्वतो भूषयामास । अन्ये देवाश्चाऽन्येषां मुनीनां स्नपनादिकं सर्वं चक्रुः । ततो देवास्तिस्रः सहस्रबाह्याः शिबिका निर्ममुः । ततः प्रणम्य प्रभोर्वपुर्मूर्ध्न्यारोप्य शक्रः स्वयमेव शिबिकायां स्थापितवान् । इक्ष्वाकुकुलजानामन्येषां मुनीनां च वपूंष्यन्ये देवा द्वितीयस्यां तृतीयस्यां च शिबिकायां निहितवन्तः ।

ततो वासवः स्वामिशिबिकामन्ये देवाश्चाऽन्यमुनिशिबिकामुद्धृ-त्याऽप्सरःसु सङ्गीतकं कुर्वाणासु, देवेषु पुरःपुरो धूपघटीर्धारयत्सु, केषुचित् पुरस्तोरणानि कुर्वत्सु, केषुचित् पुरो विलुठत्सु, केषुचित् पृष्ठतो धावत्सु, केषुचिच्च शोकं कुर्वत्सु, तूर्येषु वाद्यमानेषु,शिबिका-मुपचित्यमुपानीय प्राचीनचितायां प्रभोस्तनुं, दाक्षिणात्यायामिक्ष्वा-

कुकुलोत्पन्नमुनिवपूंषि, पश्चिमचितायां चाऽन्येषां मुनीनां शरीराणि शनैः स्थापयामासुः ।

ततो वासवनिदेशाद**ग्निकुमारका**स्तत्कालं चितास्वग्निं, **वायुकुमारा**श्चाऽग्निज्वालनाय वायुं विचक्रुः । शक्राज्ञया च तत्र चितासु देवाः कर्पूरादीनि सर्पींषि मधूनि च कुम्भशो निदधुः । चितानलं चाऽस्थि मुक्त्वा धातुषु दग्धेषु **मेघकुमाराः** क्षीराम्भोभिर्विध्यापयामासुः । ततो वासवः पूजयितुं प्रभोरुपरितनीं दक्षिणां दंष्ट्राम्, **ईशानेन्द्र**श्च वामां दंष्ट्राम्, **चमरेन्द्रो बलि**श्चाऽधस्तनीं दक्षिणां वामां च दंष्ट्राम्, अन्ये देवेन्द्राश्चाऽन्यदन्तान्, अन्ये देवाश्चाऽस्थीनि जगृहुः । याचमानेभ्यः श्रावकेभ्यश्च देवाश्चिताकुण्डत्रयाग्नीन् दत्तवन्तः । ततः प्रभृति तेऽग्निहोत्रिणो ब्राह्मणा जाताः । ते ब्राह्मणाश्च स्वामिचितावह्निं गृहे नित्यमपूजयन् निर्वातं रक्षन्ति स्म च । इक्ष्वाकुवंश्यानामन्येषां च मुनीनां विध्यातौ चितानलौ स्वामिचिताग्निनेक्ष्वाकुचिताग्निना च विध्यातमन्यमुनिचिताग्निं प्रज्वालयन्ति स्म । किन्त्वन्यमुनिचिताग्निमन्यमुनिचिताग्न्योः कदाऽपि न सङ्क्रमयन्ति स्म । स एष विधिरद्याऽपि द्विजेषु प्रवर्त्तते । केचिच्च भस्म लब्ध्वा तद् वन्दिरे । ततः प्रभृति ते भस्मभूषणास्तापसा जाताः । ततश्चितास्थानत्रये देवा रत्नस्तूपत्रयं निर्माय **नन्दीश्वर**द्वीपे च शाश्वतप्रतिमोत्सवं विधाय स्वं स्वं पदं ययुः । तथा शक्राः स्वस्वविमानेषु माणवकस्तम्भोपरिनिर्मिते वज्रसमुद्गके स्वामिदंष्ट्रां निवेश्य निरन्तरं पूजयामासुः । तत्प्रभावाच्च सदा विजयमङ्गलवन्तो बभूवुः ।

❀ ❀ ❀

**भरत**श्च स्वामिचितासन्नभूमौ योजनायामं त्रिगव्यूतोन्नतं प्रासादं **सिंहनिषद्यां** वर्धकिरत्नेन रत्नैरकारयत् । तस्य स्फाटिकानि चत्वारि द्वाराणि, प्रतिद्वारमुभयतो रत्नचन्दनकलशा, रत्नमयास्तोरणा, अष्टमङ्गल्य-



श्चाऽऽसन् । तेषु द्वारेषु मुखमण्डपाः, तेषां पुरः श्रीवल्लीमण्डपान्तः प्रेक्षासदनमण्डपाः, तन्मध्यभागे वज्रमया अक्षवाटाः, तेषु प्रत्येकं रत्नसिंहासनं चाऽभूवन् । प्रतिप्रेक्षामण्डपाग्रं च मणिपीठिका, तदुपरि रत्नमयाश्चैत्यस्तूपसम्मुखीनाः पञ्चधनुःप्रमाणाः सर्वाङ्गं रत्ननिर्मिता **ऋषभा वर्धमाना चन्द्रानना वारिषेणा** च पर्यङ्कासनासीनाः शाश्वतजिनप्रतिमा **नन्दीश्वरद्वीप**चैत्यमध्य इवाऽभवन् । तेषां चैत्यस्तूपानां प्रत्येकं पुरतोऽमूल्यरत्नमयी विशाला चारुपीठिका, तासामुपरि प्रत्येकमिन्द्रध्वजं, तेषां पुरतस्त्रिसोपाना सतोरणा स्वच्छशीतलसलिला **नन्दा** नाम्नी पुष्करिण्यभूत् ।

**सिंहनिषद्या**या मध्यभागे च मणिपीठिकोपरि चित्ररत्नमये देवच्छन्दके उपरि वितानेन पार्श्वतश्च वज्रमयाङ्कुशेन मुक्ताहारशोभितेन समन्विते, प्रान्तेषु मणिमालामनोहरे, भित्तिषु चित्रमणिमयगवाक्षशोभिते, दह्यमानागरुधूमपटलबहले, स्वस्वसंस्थानप्रमाणवर्णधराः शैलेशीध्यानवर्त्तिनश्चतुर्विंशति**र्ऋषभ**स्वामिमुख्यानामर्हतां प्रतिमा अभूवन् । तासु षोडश सुवर्णमय्यः, द्वे राजावर्तरत्नकृते, द्वे स्फाटिक्यौ, द्वे वैडूर्यमणिमय्यौ, द्वे शोणाश्मजे चाऽऽसन् । तासां प्रतिमानां च नखा अङ्करत्नमयाः, नाभीकेशान्तभूजिह्वातालुश्रीवत्सचूचुकं हस्तपादतलानि च सौवर्णानि, पक्ष्माणि नेत्रकनीनिकाः श्मश्रूणि भ्रुवो रोमाणि केशाश्च रिष्टरत्नमयानि, ओष्ठा विद्रुमरत्नमयाः, दन्ताः स्फाटिकाः, शीर्षघट्यो वज्रजाः, नासान्ता लोहिताक्षमणिप्रभाः सौवर्णाः, नेत्राणि रक्तप्रान्तानि चाऽङ्करत्नकृतानि चाऽभवन् । तासां पृष्ठे च प्रत्येकं छत्रधारप्रतिमा यथाप्रमाणं स्फाटिकमणिदण्डं श्वेतच्छत्रं दधती, पार्श्वयोश्च प्रत्येकमुत्क्षिप्तमणिचामरे रत्नमय्यौ चामरधारप्रतिमे, अग्रे च प्रत्येकं कृताञ्जलीनां नागयक्षभूतकुण्डधाराणां द्वे द्वे प्रतिमे चाऽभूवन् ।

देवच्छन्दे च चतुर्विंशती रत्नघण्टिका, माणिक्यदर्पणाः, सौवर्ण्यो दीपिका, रत्नकरण्डकाः, पुष्पचङ्गेरिकाश्चामरसमूहा, विभूषणकरण्डिका, हैमानि धूपदहनपात्राणि चाऽऽरात्रिकाणि च, रत्नमङ्गलदीपा, रत्नभृङ्गारका, रत्नस्थालानि, सौवर्णाः पतद्ग्रहाः, रत्नचन्दनकलशा, रत्नसिंहासनानि, रत्नमय्योऽष्टमङ्गल्यो, हैमास्तैलसमुद्गका, हैमानि धूपभाण्डानि, हैमा उत्पलहस्तकाश्च चतुर्विंशतेः श्रीमदर्हतां पुरो बभूवुः। इत्थं नानारत्नमयं त्रैलोक्येऽप्यतिसुन्दरं मृग-लतादिचित्रैर्भित्तिष्वति-मनोहरं रत्नस्तम्भ-पताका-ध्वज-दण्ड-पद्मरागकुम्भाप्सरः-कुसुमप्रकर-धूपधूम-चैत्यवृक्ष-माणिक्यपीठिकादिविभूषितं तच्चैत्यं **भरता**ज्ञया कलाविदा वर्धकिरत्नेन तत्कालमेव विनिर्मितम् ।

तत्रैव च **भरतो** दिव्यरत्नशिलामयीर्नवनवतेर्भ्रातॄणां प्रतिमाः कारयामास । तत्रैव च ताः प्रतिमाः शुश्रूषमाणामात्मप्रतिमामपि कारयामास । चैत्याद् बहिश्च भगवत एकं, नवनवतिभ्रातॄणां तावत्स-ङ्ख्यकं स्तूपमकारयत् । तत्र च नागरा आशातनां मा कार्षुरिति यन्त्रमयांल्लौहानारक्षकांश्च कारयामास । तैश्च तत् स्थानं नृणामगम्यम-भूत् । दण्डरत्नेन च तत्रर्जूच्चस्तम्भवद्दन्तांश्चिच्छेद, येन सोऽद्रिरना-रोहणीयोऽभवत् । तथा मनुष्यैरलङ्घ्यानि योजनान्तरितानि मेखला-रूपाण्यष्टौ पदानि गिरिं परितः कारयामास । ततः प्रभृति तस्य शैलस्याऽ**ष्टापद** इति संज्ञा जाता । लोके च सोऽद्रि**र्हराद्रिः कैलासः स्फाटिका**द्रिश्च कीर्त्यते ।

एवं चैत्यं कारयित्वा प्रतिमाः प्रतिष्ठाप्य च **भरतः** श्वेतवस्त्र-धरस्तत्र प्रविवेश । प्रदक्षिणां कृत्वा सुगन्धिजलैः सपरिच्छदः प्रतिमाः स्नपयित्वा देवदूष्यैः परिमृज्य गोशीर्षचन्दनैर्विलिलेप । विचित्रै रत्नभूषणैर्दिव्यमाल्य-वस्त्रादिभिश्च सम्पूज्य घण्टां वादयन् धूपं प्रदाय कर्पूरारात्रिकमुत्तार्य प्रणम्य सर्वास्ता प्रतिमा नामोच्चारपूर्वकं स्तुत्वा प्रत्येकमर्हतो नमस्कृत्य च **सिंहनिषद्या**याश्चैत्याद् बहिर्निर्ययौ नृपः ।



ततोऽ**ष्टापदा**द्रेरुत्तीर्याऽ**योध्यां** प्रति प्रस्थाय तां प्राप्य प्रविश्य स्वं सदनमाससाद । तत्र चाऽहर्निशं प्रभुं ध्यायन् शोकमग्नः कुलामात्यैः कथञ्चिदपि प्रबोधितः क्रमाद् राजकार्येषु प्रावर्त्तत ।

❀ ❀ ❀

अथ **भरतः** कदाचित् क्रीडितुं सवधूजनः क्रीडादीर्घिकां ययौ । तत्र च मृगीदृशीभिर्युवतिभिः सह जलक्रीडां चक्रे । कदाचिद् विलासमण्डपप्राङ्गणे च सङ्गीतकं कारयामास । कदाचित् प्रेक्षणकानि प्रेक्षाञ्चक्रे च । एवं सांसारिकसुखानि भुञ्जानो **भरतः** प्रभुमोक्षदिनात् पञ्च पूर्वलक्षा अत्यवाहयत् ।

अपरेद्युः कृतस्नानो बलिकर्म विधाय कृतनेपथ्यः सान्तःपुर-परीवारो वेत्रिणीदर्शितमार्गश्च स **रत्नादर्श**गृहं ययौ । तत्र च यथाप्रमाणं प्रतिबिम्बितं सर्वाङ्गं ददर्श । तत्र स्वं प्रेक्षमाणस्य तस्याऽङ्गुल्या एकस्या अङ्गुलीयकं निपपात, तच्च **भरतो** नाऽज्ञासीत् । क्रमेण वपुः पश्यंश्च तामङ्गुलीमनङ्गुलीयकामपश्यत् । "अङ्गुली किं विशोभे" ति चिन्तयन् भूमौ पतितमङ्गुलीयकं ददर्श । "अन्यान्यङ्गान्यप्याभरणैर्विना विशोभानि किम् ?" इति परीक्षितुं सोऽपराण्यप्याभरणानि मोक्तुमारेभे । मुकुटादिपाद-कटकान्तत्यक्तसर्वाङ्गभूषणं शीर्णपर्णं द्रुममिव स्वं गतश्रीकमपश्यत् । ततोऽचिन्तयत्-"भूषणादिभिर्वपुषः श्रीः कृत्रिमैव । अन्तर्मलदूषितस्या-ऽस्य शरीरस्य बहिश्चिन्त्यमानं किमपि शोभनं न वर्त्तते । इदं च शरीरं कर्पूरादीनपि दूषयत्येव । येन विषयेभ्यो विरज्य तपस्तेपे, तेनैव शरीरफलं जगृहे" । इत्येवं चिन्तयतः सम्यगपूर्वकरणक्रमात् क्षपक-श्रेण्यारूढस्य शुक्लध्यानं प्राप्तस्य च तस्य घातिकर्मक्षयात् केवल-ज्ञानमुत्पेदे ।

तदानीमेव चाऽऽसनकम्पतो वासवो भक्त्या समुपेत्य "केवलिन् ! द्रव्यलिङ्गं प्रतिपद्यस्व, यथा वन्दे, निष्क्रमणोत्सवं च

विदधे" इति **भरत**मुवाच । ततश्च स **बाहुबलि**वत् प्रव्रज्यालक्षणं पञ्चमुष्टिककेशोत्पाटनं विदधे । तथा सन्निहितदेवतयोपनीतं रजोहरणमुख्यमुपकरणमग्रहीत् । ततश्च **भरतो** देवराजेन ववन्दे । तदानीं च **भरतं** श्रिता दशसहस्रराजानश्चाऽपि प्राव्रजन् ।

ततो वासवो **भरत**पुत्रस्याऽऽ**दित्ययशसो** राज्याभिषेकमकरोत्। **भरत**श्च ग्राम-पुरादिषु भव्यान् धर्मदेशनया प्रबोधयन् सपरिच्छदः पूर्वलक्षं विजहार । ततोऽ**ष्टापद**गिरौ गत्वा चतुर्विधाहारप्रत्याख्यानं च विधाय मासान्ते श्रवणनक्षत्रे चन्द्रे सिद्धानन्तचतुष्को **भरतः** सिद्धिक्षेत्रं प्राप्तवान् । एवं स **भरतः** कौमारे पूर्वलक्षाणां सप्तसप्ततिं, माण्डलिकत्वे वर्षसहस्रमेकं, चक्रित्वे चैकवर्षसहस्रोनषट्पूर्वलक्षाणि, समुत्पन्नकेवलज्ञानश्च पूर्वलक्षमत्यवाहयत् । एवं चतुरशीतिपूर्वलक्षमायुरतिवाह्य **भरतो** मोक्षमगात् । शक्रेण च देवैः समं समुदं सद्य एव तन्मोक्षमहिमा विदधे ।

*इति प्रथमपर्वणि मरीचिभवभाविशलाकापुरुष-भगवन्निर्वाण-*
*भरतनिर्वाणवर्णनात्मकः षष्ठः सर्गः ॥ ६ ॥*

स्वामिप्राग्भववर्णनं कुलकरोत्पत्तिः प्रभोर्जन्म चो-
द्वाहादिव्यवहारदर्शनमथो राज्यं व्रतं केवलम् ।
चक्रित्वं भरतस्य मोक्षगमनं भर्त्तुः क्रमाच्चक्रिणो-
ऽप्यस्मिन् पर्वणि वर्णितं वितनुतात् पर्वाणि सर्वाणि वः ॥

इति कलिकालसर्वज्ञश्री**हेमचन्द्राचार्य**विरचित**त्रिषष्टिशलाकापुरुषचरितस्य**
तपोगच्छाधिपति-शासनसम्राट्-बालब्रह्मचारि-कदम्बगिरि-तालध्वज-राणकपुर-
कापरडाद्यनेकतीर्थोद्धारकाचार्यवर्यश्रीमद्विजय**नेमिसूरीश्वर**पट्टालङ्कार-
समयज्ञ-शान्तमूर्त्याचार्यवर्यश्रीविजय**विज्ञानसूरीश्वर**पट्टधर-
सिद्धान्तमहोदधि-प्राकृतविशारदाचार्यवर्यश्रीविजय**कस्तूरसूरीश्वर**शिष्यरत्न-
प्रख्यातव्याख्यातृ-कविरत्नश्रीविजय**यशोभद्रसूरीश्वर**-शिष्यरत्न-
श्रीविजय**शुभङ्करसूरीश्वर**कृते **गद्यात्मकसारोद्धारे** प्रथमपर्वणि
समाप्तं श्रीप्रथमतीर्थकर-भरतचक्रवर्त्तिप्रतिबद्धं प्रथमं पर्व ॥१॥



# कठिनशब्दार्थः

## प्रथमः सर्गः

| | |
|---|---|
| अन्तकः | યમરાજ |
| अभ्यङ्गः | તેલ વિગેરેનું મર્દન |
| अरुणः | સારથિ |
| अलातचक्रम् | ઊંબાડીયું |
| अशस्त्रोपहतम् | શુદ્ધ, નિર્મલ |
| अश्ववारः | ઘોડેસવાર |
| आखण्डलः | ઈન્દ્ર |
| आतपत्रः | છત્ર |
| उटजः | ઝૂંપડી |
| औरसः | પોતાનો પુત્ર |
| कपर्दकः | કોડી |
| करण्डकः | પાંસળી |
| कलभः | મદનિયું |
| कूर्परालेहनम् | કોણી ચાટવી |
| क्रमेलकः | ઊંટ |
| गण्डूपदः | જંતુવિશેષ |
| गलनालम् | ગરનાળું |
| घनवातः | એક પ્રકારનો કઠિન વાયુ |
| जानुदघ्नम् | ઘૂંટણ સુધી |
| तरणिः | સૂર્ય |
| तिरोहितः | છૂપાયેલ |
| दन्दशूकः | સાપ |
| दस्युः | ચોર |
| दुर्वाजिः | દુષ્ટ ઘોડો |
| न्यासीकृतः | થાપણરૂપ |
| पामा | ખરજવું |
| पिष्टोदकम् | લોટવાળું પાણી |
| प्रतिभूः | સાક્ષી |
| प्रदोषः | સન્ધ્યાસમય |
| प्रपा | પાણીની પરબ |
| प्रावृड् | વર્ષાકાળ |
| मरीचिः | કિરણ |
| महोक्षः | બળવાન બળદ |
| वर्म | કવચ |
| वर्षग्रन्थिः | વર્ષગાંઠ |
| विटः | ધૂતારો |
| व्यजनम् | વીંઝણો, પંખો |
| शम्बलम् | ભાથું |
| श्यामाकः | ધાન્યવિશેષ |
| सन्निवेशविशेषः | ચિત્રરચના |
| सर्वंसहा | પૃથ્વી |
| सारणी | નીક |
| सूचीरन्ध्रम् | સોયનું કાણું |
| हुताशनः | અગ્નિ |

## द्वितीयः सर्गः

| | |
|---|---|
| अङ्गदम् | બાજુબંધ |
| अप्राप्तपूर्वी | પ્રથમવાર મેળવેલું |
| अभिगम्यः | મનોહર |
| अर्जकमञ्जरी | અર્જક નામના વૃક્ષનો મહોર |
| अलक्तकरसः | લાક્ષાનો રસ |
| आपातरमणीयम् | શરૂઆતમાં સુંદર |
| उच्छ्रायः | ઊંચાઈ |

| | |
|---|---|
| उत्तालतरङ्गः | ઊછળતાં મોજાં |
| उत्सङ्गः | ખોળો |
| उपनयनम् | વૈદિક સંસ્કાર |
| उल्लोचः | ચંદરવો |
| कुञ्जः | લતા વિગેરેથી ઢંકાયેલું સ્થાન |
| कुन्तलः | વાળ |
| कुविन्दः | વણકર |
| क्रीडनकः | રમકડું |
| गुल्फः | પગની ઘુંટી |
| गोधूमः | ઘઉં |
| चिबुकः | હડપચી, દાઢી |
| चूडाकरणम् | વૈદિક સંસ્કાર |
| धम्मिल्लः | ઓળેલા કેશ |
| धूलिधूसराङ्गः | ધૂળથી ખરડાયેલ શરીર |
| नर्मचतुरः | મજાક કરવામાં હોશિયાર |
| नापितः | હજામ |
| पक्ष्म | પક્ષીની પાંખ |
| पाञ्चालिका | પૂતળી |
| पार्ष्णिः | એડી |
| पिष्टातकः | અબીલ, સુગંધીદાર ભુકો |
| पुष्पचङ्गेरिका | પુષ્પની છાબડી |
| प्रतिलोमक्रमः | પાછલો ક્રમ |
| भुक्तपूर्वम् | પૂર્વે ભોગવેલ |
| भृङ्गारः | સોનાનું જળપાત્ર |
| मदनफलम् | મીંઢોળ |
| महार्घः | બહુમૂલ્ય |
| मुरजाः | મૃદંગ |
| मुष्कः | અંડકોશ |
| यामिकः | ચોકીદાર |
| रहोमन्त्रितम् | ખાનગી ચર્ચા |
| रासहल्लीसकम् | રાસગરબા |
| वर्धकी | સુથાર |
| विवरम् | ગુફા |
| शम्यश्वत्थत्वचौ | ખીજળો અને પીપળાના ઝાડની ત્વચા |
| शरावसम्पुटम् | બે કોડીયા |
| शालिः | ચોખા |
| श्रीदामगण्डम् | માળાનો સમૂહ |
| समीरणः | પવન |
| सव्यपाणिः | ડાબો હાથ |
| स्फुरदधरः | હોઠ ફફડાવતો |

## तृतीयः सर्गः

| | |
|---|---|
| अनुगम्यमानः | અનુસરાતો |
| अन्तरालम् | મધ્યમાં |
| कचः | વાળ |
| काहलः | રણશીંગુ |
| गृहमेधी | ગૃહસ્થ |
| गोपुरम् | નગરનો દરવાજો |
| चतुष्पर्वी | ચાર પર્વતિથિ |
| जिगमिषुः | જવાની ઈચ્છાવાળો |
| जिघृक्षन् | ગ્રહણ કરવાની ઈચ્છાવાળો |
| तरण्डः | નાવ, વહાણ |
| तालवृन्तम् | પંખો, વીંઝણો |
| निस्तुषः | ફોતરા વગરનું |



| | |
|---|---|
| निस्त्रपः | લજ્જારહિત |
| नीलिकारोगः | આંખનો રોગ |
| न्यासापहरणम् | થાપણ ચોરવી |
| पारिपार्श्विकः | સેવક |
| मकरः | મગરમચ્છ |
| मन्मनम् | અવ્યક્ત વચન |
| मातुलिङ्गः | બીજોરુ |
| मार्गगृहस्थाः | રસ્તા ઉપરના ઘરમાં રહેલા |
| वीचिः | મોજાં |
| सात्मस्त्रीकः | પત્ની સહિત |
| सासहिः | સહિષ્ણુ |
| स्यन्दनः | રથ |
| शालभञ्जिका | પૂતળી |

## चतुर्थः सर्गः

| | |
|---|---|
| अङ्गारकारकः | કોલસા પાડનાર |
| आकरः | ખાણ, સમૂહ |
| आजिघांसुः | હણવાની ઈચ્છાવાળો |
| इला | ઈલાયચી |
| इषुधिः | બાણ રાખવાનું ભાથું |
| उत्तानः | મુખ ઉપર કરીને રહેલ |
| उपत्यका | તલેટી |
| उपायनम् | ભેટણું |
| कर्पूरारात्रिकः | કપૂરથી આરતી ઉતારવી |
| कर्बटः | સ્થાન વિશેષ નામ |
| कुन्तः | ભાલો |
| कुशपूलः | ઘાસનો પૂળો |
| कुष्माण्डः | કોળું |
| कोदण्डम् | ધનુષ |
| क्रमुकः | સોપારીનું ઝાડ, કપાસનું ઝાડ |
| चक्रनाभिदघ्नम् | ચક્રનો મધ્યભાગ ડૂબી જાય તેટલું |
| चिरायातम् | લાંબા કાળ પછી આવેલ |
| ज्या | ધનુષની દોરી |
| तिमिङ्गिलः | મત્સ્યવિશેષ |
| तुम्बीफलम् | તુંબડીનું ફલ |
| दर्भसंस्तारकः | ડાભની પથારી |
| दिष्टिः | ભાગ્યયોગે |
| देवदारु | વૃક્ષ વિશેષ |
| द्रढीयसी | વધારે મજબૂત |
| द्वादशास्त्रिकः | બાર ખૂણા |
| पद्या | માર્ગ, રસ્તો |
| पयोदृतिः | પાણીની મશક |
| पांशुः | ધૂળ |
| पाण्डुक्षामः | ધોળા રંગવાળો દુર્બલ થયેલ |
| पुङ्खः | બાણનું મૂળ |
| प्रचारवित् | માર્ગજાણકાર |
| प्रासः | ભાલો |
| भूर्जः | ભોજપત્રનું ઝાડ |
| मञ्चः | માંચડો, ખાટલો |
| मडम्बः | સ્થાન વિશેષ નામ |

युयुत्समानः યુદ્ધની ઈચ્છાવાળો
रथाङ्गनाभिद्वयसं રથના ચક્રનોખીલો ડૂબે તેટલું
रिरंसमाना રમવાની ઈચ્છાવાળી
रोमहस्तकम् પ્રમાર્જનાનું એક સાધન
लवङ्गम् લવિંગ
लाजाः વધાવવા માટેના ચોખા
वायसः કાગડો
वासवः ઈન્દ્ર
वारणारूढः હાથી ઉપર સવારી કરનાર
वेत्रधरः છડી ધારણ કરનાર
वैतालिकः ભાટ, ચારણ
शिञ्जिनी ધનુષની દોરી
शिलीमुखः બાણ
समरः યુદ્ધ, લડાઈ
सिसाधयिषुः સિદ્ધિની ઈચ્છાવાળો
सूपकारः રસોઈયો
सैकतम् પુષ્કળ રેતીવાળો ભાગ
स्कन्धावारः છાવણી, પડાવ
स्थासकः થાપા

**पञ्चमः सर्गः**

उदायुधम् શસ્ત્ર ઊંચા કરવા
कण्डूयनम् ખંજવાળવું
क्ष्वेडानादः સિંહનાદ
खनकपुरुषः ખાડો ખોદનાર પુરુષ
गण्डकः ગેંડો
तूलम् કપાસ, રૂ
लब्धोत्कोचः લાંચ મેળવનાર
व्रतगरिष्ठः વ્રતમાં શ્રેષ્ઠ
शरस्तम्बः બાણનો સમુહ
सत्यसती શીલભંગ થયે સતી પણ અસતી કહેવાય

**षष्ठः सर्गः**

अक्षवाटः શિલ્પની પરિભાષાનો શબ્દ
क्रीडादीर्घिका વાવ
चूचुकः સ્તનનો અગ્રભાગ
दंष्ट्रा દાંત, દાઢ
दशार्हः વિષ્ણુ
निबन्धनम् કારણ
निर्झरः ઝરણું
निष्ठितार्थः કૃતાર્થ
पतद्ग्रहः પાત્ર, ભાજન
प्रतानम् વિસ્તારવાળું
प्रेक्षणकः નાટક
मुमूर्षुः મરવાની ઈચ્છાવાળો
शुश्रूषः સાંભળવાની ઈચ્છાવાળો
श्रीवत्सः પ્રશસ્ત ચિહ્ન
श्रीवल्लीमण्डपः શિલ્પની પરિભાષાનો શબ્દ
समुद्गकः ડાભડો

• • •